श्रीः ।

शास्त्रमुक्तावळी - ७

कार्याधिकरणवादः ।

(प्रथम स्तरंगः ।)

विद्वद्वर्येण श्रीशैलानन्तपूरुष

श्रीरंगाचार्येण

विरचितः ।

श्री कांची प्रतिवादिभयंकरम्

अनन्ताचार्येण

संस्कृतः परिशोधितश्च

श्री सुदर्शनमुद्राक्षरशलायाम्

अमुद्र्यत ।

॥ श्रीकांची ॥

१९०१

इदानीमेतन्मूल्यम् ० — १० — ०

श्रीः

श्रीहयग्रीवायनमः ।

श्रीमतेरामानुजायनमः ।

शास्त्रमुक्तावळी ।

कार्याधिकरणवादः ।

श्रीमान् वेङ्कटशैलाद्धरिरुदयन्नोय दहरदिवि दीप्तः ।
दहतु सुदर्शनमहसा सत्पथसञ्चारिवैरिसन्तमसम् ॥ १ ॥
श्रीरामानुजयोगयनन्तगुरुराट्सौम्योपयंत्राह्वये
योविते रघुना जगत्कुलगुरु यस्यात्र नो मध्यमः ।
आस्तावाधि तथा न आद्यचरमा वाम्नाय सिन्धुद्वयी
पारप्रापणनाविकौ फणिपति स्सोयं विधत्तां जयम् ॥ २ ॥
आध्यात्मिक्यां सरण्यां मम हृदयरथं स्वामियन्त्रस्वरूपा
श्रीश श्रीभाष्यकारो भुवनगुरुनरो रम्यजामातृयोगी ।
सज्जा स्सञ्चारयन्ता मविषम मधुना ऽनुज्झितप्राच्यलेखम्
दुर्मानोद्वृत्तग्राहो न गमयति यथा दुष्पथं वक्रकंपी ॥ ३ ॥
कार्याधिकरणवादं मुमुक्षुजनदेवयानगतिविषयम् ।
शारीरकमीमांसाशास्त्रे श्रीरंगसूरिरातनुते ॥ ४ ॥

इहतावच्छारीरकमीमांसाचतुर्थाध्याय तृतीयपादे षष्ठसूत्रप्रभृति पञ्चदशसूत्रपर्यन्त दशसूत्रचात्मकं कार्याधिकरणं विचार्यते ॥ ५ ॥

अस्मिन्नधिकरणे भगवता भाष्यकारेण सकलाऽप्युपनिषदो भगवच्छास्त्रगीतोपनिष द्भगवत्परांकुशादि दिव्यसूरिसूक्ति श्रीविष्णुपुराण प्रभृतिभि र्यामुनादि श्रीसूक्तिभि र्न्यायतश्च परिशीलयता सकलेतरकुदृष्टीनुद्धूय निर्धारितस्य सिद्धान्तस्य कैश्चिदर्वाचीनै र्व्याकुलीकृतत्वा दीदृशवैयाकुल्याः प्रागभावेन श्रुतप्रकाशिकाया स्तत्कालस्थित शांकर-भास्करीय यादवीयादि मतान्तरशंकाजालमात्र विदळन विश्रान्तत्वा दुक्तवैयाकुलीपरिहारेणोक्त सिद्धान्तदृढिम्ने पुनरयमारम्भः ॥ ६ ॥

इदंचाधिकरणं शास्त्रेषु समन्ततः प्रसिद्धानामैश्वर्यकैवल्यभगवत्प्राप्तिरूपपुरुषार्थार्थिनां त्रिविधाना मधिकारिणां मध्ये कान्नयति पूर्वाधिकरणनिर्णीत आतिवाहिकगणः, कान्वा ननयतीति शंकया प्रवृत्तम् ॥ ७ ॥

इयमत्र विप्रतिपत्तिः – अर्चिरादि रमानवान्तआतिवाहिकगणः – किं हिरण्यगर्भलक्षण कार्यकोटिप्रविष्टापरब्रह्मोपासकान्नयति? उत परब्रह्मोपासकान् ? अथवा परब्रह्मोपासकान् प्रकृतिवियुक्तब्रह्मात्मक प्रत्यगात्मोपासकांश्चोभयानिति? ॥ ८ ॥

अत्र हिरण्यगर्भोपासका ऐश्वर्यार्थिनः, परब्रह्मोपासका भगवत्प्राप्त्यर्थिनः, प्रकृतिवियुक्त ब्रह्मात्मक प्रत्यगात्मोपासकाः कैवल्यार्थिन इति विवेकः ॥ ९ ॥

अत्र प्रथमः पक्षोबादरेः, द्वितीयः पक्षो जैमिनेः, तृतीयस्सिद्धान्तिपक्षो बादरायणस्य ; एवमस्मिन्नधिकरणे प्रथमादिसूत्रपंचकं - बादरिपक्षपरम्, षष्ठादिसूत्रत्रयं जैमिनिपक्षपरं, ततस्सूत्रद्वयं बादरायणपक्षपरमित्यपि बोध्यम् ॥ १० ॥

तत्राप्रामाण्यातिशया त्प्रथमपूर्वपक्षतया बादरिपक्ष मुपन्यस्यति प्रथमं सूत्रपंचकेन –

सू – कार्यं बादरिरस्य गत्युपपत्तेः ॥ १ ॥ (४ - ३ - ६) इत्यादिना ॥ ११ ॥

कार्यं – कार्यकोटिप्रविष्टं हिरण्यगर्भलक्षणमपरंब्रह्म, उपासीनमातिवाहिकगणो नयतीति बादरिराचार्यो मन्यते । अस्य - कार्यब्रह्मोपासीनस्यैव । गत्युपपत्तेः - परिच्छिन्नदेशवर्ति स्वप्राप्यप्राप्तये मार्गविशेषेण देशविशेषगमनोपपत्तेरिति प्रथमसूत्रार्थः ॥ १२ ॥

अत्र - विषयवाक्येषु " सएनान् ब्रह्मगमयती "त्यादिपूपासकानामुपस्थितत्वात् सिद्धान्तसूत्रच्छायानुरोधाच्चो पासकवाचक द्वितीयान्तोपासीन पदाध्याहारः । अस्येत्येकवचनेन परामर्शानुरोधादेकवचनान्ताध्याहारः

नयतिपद मितिपदंच सिद्धान्तसूत्रादाकृष्टम् । पूर्वाधिकरणोपस्थिता-तिवाहिकविषय मातिवाहिकगणपदं नयति पदानुगुण्यायैकवचनान्त मध्याहृतम् । इतिपदाक्षिप्तम्मन्यत इति पदमन्वयपूर्तये समा्तं । एवमेवोत्तरत्राप्यूहनीयमिति बोध्यम् ॥ १३ ॥

एतत्सूत्रभाष्ये" कार्यमुपासीनानेव गमयतीति बादरिराचार्यो मन्यत" इत्यत्र बहुवचनान्तोपासीनशब्देनोपासकनिर्देशस्तु पूर्वं विप्रतिपत्तिवाक्ये बहुवचनान्तशब्देन तद्ग्रहणात् तदनुरोधेनार्थोपन्यास मात्रतात्पर्येण; अन्यथा - सूत्रे अस्येत्येकवचनान्त शब्देनोपासक परामर्शास्वारस्यस्य दुष्परिहरत्वात् ॥ १४ ॥

सूत्रे - एकवचनान्तोपासीन पदमेवाध्याहर्तव्य मित्यभिप्रायेणैवच तत्सूत्रभाष्यएवान्ते - " कार्यन्तु हिरण्यगर्भरूपं ब्रह्मोपासीनस्य परिच्छिन्नदेशवर्तिप्राप्य प्राप्त्यर्थं गमन मुपपद्यते, अतोऽर्चिरादिरातिवाहिकगणस्तमेव नयती " ति सूत्रार्थोपसंहारे एकवचनान्तशब्देनैवोपासकस्य नयतिकर्मतया निर्देशः कृतः ॥ १५ ॥

अतएव चैतत्सूत्रदीपे सूत्रपदयोजनाया मेकवचनान्तोपासीनपद मेवोपात्तम् ॥ १६ ॥

यथोक्तं तत्र - " सूत्रार्थस्तु-कार्यं हिरण्यगर्भमुपासीन मातिवाहिको गणो नयतीति बादरिराचार्यो मन्यते, अस्यैव गत्युपपत्ते"रिति ॥ १७ ॥

यद्यपि, अस्य - कार्यब्रह्मणएव, गत्युपपत्तेः - मार्गविशेषेणदेशविशेषं गत्वा प्राप्त्युपपत्तेरिति व्याख्याने बहुवचनान्तोपासीन पदाध्याहारेपि न दोषः, सारग्रन्थोप्येतदभिप्रायकएव स्वरसतः प्रतिभाति; तथापि - गतिशब्दस्य गमनार्थकतायाः तत्समभिव्याहृत पष्ठ्याः कर्त्रर्थकतायाश्च स्वारसिकत्वात्तदाश्रित्य यथोक्तयोजनव्याख्यानं भाष्यदीपयोरादृत मित्यवधेयम् ॥ १८ ॥

ननु-कार्यशब्दः प्रकृतिमण्डलान्तःपातिकृत्स्न कार्यवर्गवाचीति-सर्वएवैश्वर्यार्थिनः कार्योपासकत्वेन विवक्षितुं योग्याः, प्रत्याख्यास्यंतेच

सिद्धान्तसूत्रे प्रतीकालम्बनत्वेनोद्धृत्य सर्वएवैते । एवंस्थिते कार्यशब्दः कथमिह हिरण्यगर्भमात्रविषयतया व्याख्यात इतिचेत्? इदमत्रावधेयम्, 'सएनान् ब्रह्मगमयती' त्यत्र ब्रह्मशब्दविवक्षितस्यैवेह कार्यशब्देन निर्देशात्, तस्यचोत्तरसूत्रेषु हिरण्यगर्भरूपताया अभिव्यक्तत्वाच्चायं कार्यशब्दो हिरण्यगर्भविषयः, द्वितीयसूत्रे ऽर्चिरादिमार्गगामिनां प्राप्यस्थानस्य चतुर्मुखलोकरूपत्वाभिधाना च्चतुर्थपंचमसूत्रयोः तेषामाप्रळयं चतुर्मुखलोके स्थित्वा ततस्तदध्यक्षेण हिरण्यगर्भेण सह परब्रह्मप्राप्तिप्रतिपादनमुखेन श्रूयमाणापुनरावृत्ति निर्वाहात्, तृतीयसूत्रे कारणवाचकब्रह्मशब्दस्य कार्यभूतहिरण्यगर्भपरत्व निर्वाहाय तस्य प्रथमजत्वलक्षण ब्रह्मसामीप्यरूपोपचार बीजोपपादनाच्च दर्शितब्रह्मशब्दस्य हिरण्यगर्भपरतया बादर्यभिप्रेतताहि स्फुटा। बादरिरपि - अर्चिरादिमार्गेण गच्छतां ब्रह्मलोकप्रजापतिसभावेश्मादिप्राप्तिश्रवणात्तस्यच ब्रह्मलोकैश्वर्यव्यतिरिक्तैश्वर्यार्थिष्वनुपपन्नतां ब्रह्मलोकैश्वर्य व्यतिरिक्तैश्वर्यार्थिना मप्यर्चिरादिमार्गगामित्वे धूमादि-मार्गप्रतिपादक शास्त्रस्य निरवकाशत्वापत्तिश्च पर्यालोच्यैवार्चिरादिमार्गस्य ब्रह्मलोकैश्वर्यार्थिमात्रविषयतां तादृशमार्गप्रतिपादक प्रकरणस्थ ब्रह्मशब्दस्य चतुर्मुखमात्रविषयताञ्चाभिप्रैयाय । कार्यशब्देनेह चतुर्मुखनिर्देशस्तु तदाक्षिप्तकारणब्रह्मणोऽपरिच्छिन्नस्य प्राप्तये क्वचिद्गमनानुपपत्तिः, परिच्छिन्नस्य कार्यब्रह्मणश्चतुर्मुखस्यप्राप्तये तदुपपत्तिः, ब्रह्मगमयतीत्यादौ कारणवाचकशब्देनोपचारा त्कार्यनिर्देश इत्यादि बादरिपक्षाभिप्रेतांश द्योतनार्थः । सिद्धान्तसूत्रे सर्वेषा मपि प्रतीकालम्बनत्वेन ग्रहणन्तु - तुल्यन्यायत्वेनेतरदृष्टान्तेन चतुर्मुखलोकैश्वर्यार्थिनामपि प्रतिषेधलाभाय । तस्मात्कार्यशब्दो यथोक्तार्थपरएव व्याख्येय इति ॥ १९ ॥

सू - विशेषितत्वाच्च ॥ २ ॥ (४ - ३ - ७ ॥)

द्वितीयसूत्रस्यास्य प्रथमसूत्रान्वितस्याय मर्थः, विशेषितत्वाच्च-

अर्चिरादिमार्गगामिप्राप्यस्य तद्विषयशास्त्र एवानन्यथासिद्धैश्शब्दै श्चतुर्मुखलोकसभावेश्मादिकार्यरूपतया परस्माद्ब्रह्मणो व्यावृत्तत्वेन दर्शितत्वाच्च, कार्यमुपासीनमेव नयत्यातिवाहिकगण इति बादरिर्मन्यतइति ॥ २० ॥

शास्त्रञ्च - बृहदारण्यकाष्टमाध्याय द्वितीयब्राह्मणपंचदश खण्डिकायां-"पुरुषोऽमानवएत्य ब्रह्मलोकान् गमयती"ति श्रवणम् । १ । छान्दोग्याष्टमनपाठक चतुर्दशखण्डे - " प्रजापतेस्सभां वेश्म मपद्य" इति श्रवणंच । २ । इत्येवमादिकम् ॥ २१ ॥

अत्र बृहदारण्यकवाक्ये अर्चिरादिगामिप्राप्यविषय ब्रह्मलोकशब्दस्य चतुर्मुखलोकपरत्वा द्बहुवचनाविरोधेन कर्मधारयमाश्रित्य परब्रह्मपरत्वाभिधानासम्भवात् , तथाभिधानेपि लोकशब्दास्वारस्यस्य दुर्वारत्वात् , छान्दोग्यवाक्ये अर्चिरादिना गतस्य स्पष्टमेव प्रजापति सभावेश्मादि प्रपत्त्यनुसन्धान दर्शनाच्च , अर्चिरादिमार्गगामिनां चतुर्मुखतल्लोकसभावेश्मादिप्राप्ति रनन्यथासिद्धाद्यवगम्यते ॥ २२ ॥

ब्रह्मणस्सर्वगतस्य क्वचित्परिच्छिन्नं लोकविशेष सभावेश्मादिकंच-न प्रामाणिकम् , नवा ब्रह्मप्राप्तुस्तत्प्राप्तये क्वचि द्गमनं युक्तम् , सर्वगतत्वाद्ब्रह्मणः ; नापि निश्शेषाविद्याविनिर्मुक्तस्य ब्रह्मोपसम्पन्नस्य अवश्यभंगुरस्थूलपदार्थमय लोकविशेषादिप्राप्तिरूपैश्वर्य विशेषानुभवलक्षणः पुरुषार्थो युक्तः , तथासति मोक्षस्यानित्यत्वापत्तेरितिहि बादरेराशयः ॥ २३ ॥

अतएवहि - उत्तरत्र चतुर्थपादे " अभावं बादरिराह ह्येव" मिति दशमसूत्रे मुक्तस्य देहेन्द्रियाद्यभावो बादर्यभिमतः प्रतिपाद्यते ॥ २४ ॥

तथाच - अर्चिरादिमार्गप्रस्थितानां क्वचिद्गमनप्रतिपादनलिंगा-श्चतुर्मुखलोक सभावेश्मादिप्राप्तिप्रतिपादनालिङ्गा श्चार्चिरादय आतिवाहिकपुरुषा न परब्रह्मोपासकाना मतिवोढारः , अपितु हिरण्यगर्भलक्षणकार्यब्रह्मोपासकाना मैश्वर्यविशेषार्थिना मेवेति सूत्रद्वयाभिप्रायः ॥ २५ ॥

अर्चिरादिगतिप्रतिपादकवाक्येषु "स एनान् ब्रह्म गमयती"ति श्रूयमाणस्य नपुंसकब्रह्मशब्दस्य परब्रह्मवाचकस्य पुल्लिङ्गब्रह्मशब्दप्रयोगविषयहिरण्यगर्भपरत्वानुपपत्ति शंकापरिहारं तृतीयसूत्रेणाह ॥ २६ ॥

सू - सामीप्यात्तु तद्व्यपदेशः ॥ ३ ॥ (४ - ३ - ८ ॥)

तुशब्द उक्ताशंकाव्यावृत्त्यर्थः ॥ २७ ॥ तद्व्यपदेशः - तस्य हिरण्यगर्भस्य नपुंसकब्रह्मशब्देन व्यपदेशः, यद्वा - तेन-नपुंसकब्रह्मशब्देन, व्यपदेशः - हिरण्यगर्भनिर्देशः, सामीप्यात्तु - हिरण्यगर्भस्य परब्रह्माव्यवहितकार्यत्वेन तत्सन्निहितत्वात्सम्भवतीति बादरिर्मन्यत इति सूत्रार्थः ॥ २८ ॥ कारणवाचकस्योपचारात्कार्ये प्रयोग इत्यभिप्रायः ॥ २९ ॥

हिरण्यगर्भस्य प्रथमजत्वलक्षणं परमपुरुषाव्यवहित कार्यत्वंच "यो ब्रह्माणं विदधाति पूर्वं योवैवेदांश्च प्रहिणोति तस्मै" इति श्वेताश्वतरोपनिषदादिषु प्रसिद्धम् ॥ ३० ॥

अथार्चिरादि मार्गगामिनां हिरण्यगर्भप्राप्तेरेव स्वीकारे तेषाममृतत्वप्राप्तिच पुनरावृत्ति प्रतिपादक शास्त्रविरोधस्स्यात्, ब्रह्माण्डोदरवर्तिसर्वलोकानां विनाशशास्त्राद्द्विपरार्धावसाने हिरण्यगर्भविनाशात्पुनरावृत्ते रवर्जनीयत्वात । अमृतत्वप्राप्तिशास्त्रं छान्दोग्ये अष्टमप्रपाठके षष्ठखण्डे षष्ठखण्डिकायां - "तयोर्ध्वमायन्नमृतत्वमेती"त्येव मादिकं, अपुनरावृत्तिशास्त्रञ्च तत्रैवचतुर्थप्रपाठके पंचदशखण्डे षष्ठखण्डिकायां"सएनान् ब्रह्मगमयत्येषदेवपथो ब्रह्मपथ एतेन प्रतिपद्यमाना इमम्मानव मावर्तं नावर्तंते नावर्तंत" इत्येवमादिकम्, ब्रह्माण्डोदरवर्तिसर्वलोकविनाशशास्त्रन्तु-गीताष्टमाध्याये " आब्रह्मभवनाल्लोकाः पुनरावर्तिनोर्जुन" त्येवं जातीयकम्, तस्मात्परब्रह्म प्राप्तिरेवार्चिरादि मार्ग-गामिनां वक्तव्येत्याशंकां परिहरति चतुर्थेनसूत्रेण ॥ ३१ ॥

सू - कार्यात्यये तदध्यक्षेणसहातः परमभिधानात् ॥ ४ ॥ (४-३-९)

सन्दर्भानुगुण्येनात्र–सः, अधिगतविद्यः,प्राप्नोति, इति पदत्रयमध्याहार्यम् ॥३२॥ सः–अर्चिराद्यातिवाहिकगणेनहिरण्यगर्भलक्षणंकार्यब्रह्म नीतस्तदुपासीनः पुरुषः। कार्यस्य-ब्रह्मलोकस्य, अत्यये- विनाशदशायां, तदध्यक्षेण सह–कार्यब्रह्मलोकाधिपतिना विदुषा हिरण्यगर्भेण सह।अधिगतविद्यः - स्वयमपि प्राप्तपराविद्यस्सन् । अतः - कार्याद्ब्रह्मलोकात् । परं–परब्रह्म । प्राप्नोति । अभिधानात्–श्रुत्यैव तथा प्रतिपादनात। इति बादरिर्मन्यतइति सूत्रार्थः ॥३३ ॥

श्रुतिश्च "तेब्रह्मलोकेतु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे" इत्येवंरूपा तैत्तरीयकोपनिषदि षष्ठप्रश्नदशमानुवाकद्वाविंशखण्डिकागता, एवं जातीयकान्याच ॥ ३४ ॥

अस्मिन्नेवार्थे स्मृतिमपि प्रमाणयति पंचमेन सूत्रेण ॥ ३५ ॥

सू – स्मृतेश्च ॥ ५ ॥ (४ - ३ - १० ॥)

स्मृतेश्च – महर्षिस्मरणाच्च, स कार्यात्यये तदध्यक्षेण सहाधिगतविद्योतः परं प्राप्नोतीति बादरिर्मन्यत इतिसूत्रार्थः ॥ ३६ ॥

स्मृतिश्च " ब्रह्मणा सहते सर्वे संप्राप्ते प्रतिसंचरे । परस्यान्ते कृतात्मानः प्रविशन्तिपरं पद " मित्यादिरूपा ॥ ३७ ॥

श्रुतौ'परान्तकाल'इत्यत्र स्मृतौ 'परस्यां त'इत्यत्रच स्थलद्वयेपि परशब्दो ब्रह्मायुःपरः, श्रुतौ ' परामृतादिति ' ल्यब्लोपे पञ्चम्यन्तम् , परामृतं प्राप्येत्यर्थकमिति बादर्यभिप्रायः ॥ ३८ ॥ स्मृतौ कृतात्मान इति पदमेव पूर्वसूत्रेऽधिगतविद्यपदाध्याहारबीजम् ॥ ३९ ॥

इदमत्र चतुर्थपञ्चमसूत्रतात्पर्यम् – सत्यलोकोपलक्षितांडाधिपतेश्चतुर्मुखस्य द्विपरार्धावसानकाले नाशेप्यर्चिरादिमार्गप्रस्थितानां चतुर्मुखप्राप्तिस्वीकारे न तेषाममृतत्वापुनरावृत्तिश्रवणविरोधः , आप्रळयं चतुर्मुखलोके स्थितानां तत्रैवाधिगतविद्यानां तेषां चतुर्मुखेन

विदुषासाकं तदायुषोऽन्ते मोक्षस्वीकारेण तदुपपत्तेः, श्रुत्या स्मृत्या-च तेषां तथा मोक्षप्राप्तेः प्रतिपाद्यमानत्वाच्चेति ॥ ४० ॥

तथाचेदमत्र बादरेराचार्यस्य तात्पर्यं पंचसूत्र्या निष्पद्यते – औपनिषद्विद्याप्रकरणस्थगतिश्रुतिषु श्रूयमाणोऽर्चिरादिरमानवान्त आतिवाहिकगणो हिरण्यगर्भलक्षणकार्यब्रह्मोपासकानेव नयति, तेषामेव देशविशेषप्रतिनियत हिरण्यगर्भैश्वर्यप्राप्तये गमनोपपत्तेः। नहि परब्रह्मोपासकानां तत्प्राप्तये क्वचिद्गमन मुपपद्यते, परस्य ब्रह्मणस्सर्वगतत्वात्। एवं - ब्रह्मलोकान् गमयतीति, प्रजापतेस्सभां वेश्मप्रद्य, इतिच परिच्छिन्नस्थूलवस्त्वात्मक लोकविशेष प्रजापतिसभावेश्मादिप्राप्तिश्रवणात्तेषां च भंगुरताया अवश्यम्भावात्, उपनिषत्सु ब्रह्मविद्याम्मोक्षएव पुरुषार्थः, सचा नन्तास्थिरफलरूप इति प्रतिपादनाच्च अर्चिरादिगति रपरब्रह्मोपासक विषयैव । परब्रह्मोपासकास्तु क्वचिद्गमननिरपेक्षा स्सर्वगतमस्थूलत्वादिगुणकमनन्तं स्थिरं परं ब्रह्मैव यथास्वदेशमेव प्रतिपद्यन्त इति न तेषां गत्यपेक्षा। उक्तश्रुतौ ब्रह्मलोक शब्दस्य बहुवचनान्तत्वेन 'एतं ब्रह्मलोकं न विन्दती'त्यादिष्विव कर्मधारयाश्रयणेन ब्रह्मपरत्वमपि न सम्भवदुक्तिकम्। एवमर्चिरादिमार्गेण गतस्य 'प्रजापतेस्सभां वेश्म प्रपद्य' इति प्रजापतिशब्दित हिरण्यगर्भ सभावेश्मप्रपदना नुसन्धानश्रवणेन हिरण्गर्भोपासकत्वमेवास्य सुनिर्णयम्। इत्थं दर्शितहेतुभि र्हिरण्यगर्भोपासकस्यैवाऽऽतिवाहिक गणनेयत्वे निश्चितेसति ' स एनान् ब्रह्मगमयती'त्यत्र कारणवाचको ब्रह्मशब्दः कार्यऔपचारिको निर्वाह्यः। एवमेतस्यामृतत्व प्राप्त्यपुनरावृत्तिश्रवणश्च 'तेब्रह्मलोकेत्वि'त्यादि श्रुत्या 'ब्रह्मणा सहते सर्वे' इत्यादिस्मृत्याच अर्चिरादिवर्त्मना चतुर्मुखलोकं गत्वा तत्र विदुषा चतुर्मुखेन साक मुपासनमनुष्ठाय तदायुरवसाने तेनैव सहामृतत्वापुनरावृत्तिप्राप्तिपरं निर्वाह्यम्। तस्माद्धिरण्यगर्भलक्षण कार्यब्रह्मोपासकानेव नयत्यर्चिरादिरातिवाहिक गण इति ॥ ४१ ॥

अथ बादरिमते परब्रह्मोपासकानां गत्यनुपपत्तिः । १ । स्थूलवस्तुमय लोकविशेष प्राप्यत्वानुपपत्तिः । २ । ब्रह्मशब्द परब्रह्मपरत्वविरोधि समानप्रकरणस्थ ब्रह्मलोकशब्दबहुवचनानुपपत्तिः । ३ । तथाभूत प्रजापतिसभावेश्म प्राप्तिप्रतिसन्धानानुपपत्तिः । ४ । परमात्ममुख्यवृत्त ब्रह्मशब्द गौणवृत्तिकल्पनं । ५ । अर्चिरादिगत पुरुषामृतत्वा पुनरावृत्तिश्रवणविलम्बितविषयत्वकल्पनं च । ६ । इत्येतेषडर्थाः स्वपक्षसाधकतया भिमताः प्राधान्येन, लोकशब्दगतिश्रवणाभ्या मर्चिरादिगतिशास्त्रस्य ब्रह्मोपासकविषयत्वव्यवच्छेदात्परस्य ब्रह्मणो मुक्तप्राप्यलोकविशेषानंगीकारएवतु मुख्यनीजं श्रुत्यन्यथानयनस्ये त्यवगम्यते ॥ ४२ ॥

अथ जैमिनिपक्षस्यां शिकप्रामाण्येन बादरिपक्षादुत्कृष्टतया द्वितीयपक्षत्वेन तत्पक्षमुपन्यस्यति षष्टादिसूत्रत्रयेण ॥ ४३ ॥

॥ सू ॥ परं जैमिनिर्मुख्यत्वात् ॥ ६ ॥ (४ - ३ - ११ ॥)

परं - परब्रह्म , उपासीनमेवं नयत्यातिवाहिकगणइति जैमिनिराचार्यो मन्यते । मुख्यत्वात् - ब्रह्मगमयतीत्यादिष्वर्चिरादिमार्गगामि प्राप्यविषयत्य ब्रह्मशब्दस्य परस्मिन्नेव ब्रह्मणि मुख्यवृत्तत्वादिति षष्ठसूत्रार्थः ॥ ४४ ॥

इदमत्राभिप्रेतं-ब्रह्म गमयतीत्यत्र ब्रह्मपदश्रुतिप्रबलां गत्युपपत्तिसमानप्रकरणस्थ ब्रह्मलोकशब्दबहुवचन श्रवणप्रजापतिसभावेश्मादिप्राप्तिप्रतिसन्धानादि रूपं लिंगंदुर्बलं नहि बाधितुं क्षमते, ब्रह्मशब्दोहि-परस्मिन्नेव ब्रह्मणि मुख्यवृत्तः, तत्रापि नपुंसकलिंगोयं निरूढलक्षणयापि न चतुर्मुखपरोभवितुमर्हति, पुंलिंगस्यैव तस्य तथाप्रयोगदर्शनात , नापि कारणे परब्रह्मणि मुख्यस्यास्य - अपरे कार्यब्रह्मणि स्वारसिकलक्षणया प्रवृत्तिर्युक्ता , विना मुख्यार्थबाधं तदयोगात् ; नच गत्यनुपपत्तिः प्रमाणम् - नित्यसिद्धस्यापि ब्रह्मणो यथावद्वेदनाय कालविशेषापेक्षावत् सर्वगतस्यापि तस्य प्राप्तये

देशविशेषापेक्षाया अपि न्यायानुगृहीतेन गतिशास्त्रेणैव दुरपह्नवं सिद्धे ब्रह्मोपासकानांतत्प्राप्तये देशविशेषंप्रति गमनस्योपपन्नतरत्वात्; ब्रह्मलोकान् गमयतीत्यत्र लोकशब्दबहुवचनश्रवणमपि नानुपपन्नम्, ब्रह्मगमयतीत्यनेन समानप्रकरणस्थेन प्राप्यस्य ब्रह्मणएकत्वे निश्चिते बहुवचनस्य अदितिः पाशानिति वदुपपत्त्या – निषादस्थपतिन्यायप्राप्तस्य कर्मधारयस्य ' एतं ब्रह्मलोकं न विन्दती' त्यादिष्विवात्रापि-निर्बाधत्वात् ; मुक्तप्राप्यानां परब्रह्मासाधारण शुद्धसत्त्वद्रव्यमयाप्राकृतलोकानां बहूनां श्रुतिस्मृतीतिहासपुराणादि प्रमाणगणसिद्धानां दुरपह्नवतया षष्ठीतत्पुरुषाश्रयणेपि बाधकाभावाच्चेति ॥ ४५ ॥

षष्ठीतत्पुरुषसमासोपि समानप्रकरण श्रुत्यन्तरानुगुणएव, बृहदारण्यकोपनिषदि सप्तमाध्याये दशमब्राह्मणे- "यदावैपुरुषोस्माल्लोकात्प्रैती" त्यादिके - "सलोकमागच्छत्यशोकमहिमं तस्मिन् वसतिशाश्वतीस्समा" इत्यत्र ब्रह्मशब्दासमभिव्याहृत लोकशब्देन प्राप्यस्थानविशेषस्यैव विवक्षितत्वात् ; प्रश्नोपनिषदि पंचमसत्यकामप्रश्ने पंचमखण्डिकायां – "ससामभिरुन्नीयते ब्रह्मलोकं सएतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षत " इत्यत्र ब्रह्मलोकशब्देन पुरुषमीक्षतइत्युक्त परमपुरुषोक्षितृस्थानस्यैव विवक्षितत्वाच्च ॥ ४६ ॥

'पुरुषमीक्षत' इति ब्रह्मप्राप्तेः पृथगभिहितत्वात्-प्रश्नोपक्रमे 'कतमंवावसतेन लोकं जयती' ति प्राप्यस्थानस्यैव जिज्ञासितत्वात्-उपसंहारेप्युक्तब्रह्मलोकविषयश्लोके 'ससामभिर्यत्तत्कवयोवेदयंत' इत्यनेन उक्तब्रह्मलोकस्यं सूरिदृश्यवैष्णवपद रूपतायाः ख्यापितत्वाच्च नात्रत्य ब्रह्मलोकशब्दः कर्मधारयार्हः ॥ ४७ ॥

ईदृशश्रुत्यन्तर संवादमालोच्यैव षष्ठीतत्पुरुषस्यापि सम्भवमभिप्रेत्योक्तं भाष्यकारैरेतत्सूत्रभाष्ये – " परस्य ब्रह्मणः परिपूर्णस्य – सर्वंगतस्य सत्यसङ्कल्पस्य स्वेच्छापरिकल्पिता स्स्वासाधारणा अप्राकृताश्च लाकानात्यन्तायनसन्ति श्रुतिस्मृतीतिहास पुराणप्रामाण्यात् " इति ॥ ४८ ॥

अत्र श्रौतेर्थे यथाश्रुतिप्रतिपत्तव्यत्व न्यायेन परमपुरुषासाधारण लोकस्थापनं मुक्तप्राप्यपरब्रह्मासाधरण लोकविशेषानंगीकारस्य बादरिपक्षाभिप्रेत श्रुत्यंन्यथानयनमुख्यबीजस्य व्युदासाय ॥ ४९ ॥

परब्रह्मासाधारण लोकानामप्राकृतत्वेच्छापरिकल्पितत्वयोरभिधाने न कालकाल्यदृष्टलोकसजातीयत्व बुद्ध्यायत्तमोक्षानित्यत्वशंकाव्युदस्ता, इच्छापरिकल्प्या प्राकृतलोकाना मिच्छासमकालं सर्वदैव सम्भवस्य दुरपह्नवत्वात् ॥ ५० ॥

तथाच प्रथमसूत्रविवक्षिता गत्यनुपपत्तिः, द्वितीयसूत्रविवक्षितासु स्थूलवस्तुमय लोकविशेषप्राप्यत्वानुपपत्ति ब्रह्मशब्द परब्रह्मपरत्वविरोधि समानप्रकरणस्थ ब्रह्मलोकशब्दबहुवचनानुपपत्ति प्रजापतिसभावेश्मप्राप्त्यनुसन्धानानुपपत्तिषु प्रथममनुपपत्तिद्वयं, तृतीयसूत्रविवक्षितम् परमात्ममुख्यवृत्त्या ब्रह्मशब्दगौणवृत्तिकल्पनं, चेत्येते वादरिपक्षार्थाः प्रत्याख्याताभवंत्यनेन सूत्रेण ॥ ५१ ॥

अत्र मुक्तप्राप्यपरमपुरुषासाधारण लोकसाधकतया विवक्षितं प्रमाणजालन्तूत्तरत्र प्रपश्चयिष्यामः ॥ ५२ ॥

॥ सू ॥ दर्शनाच्च ॥ ७ ॥ (४ - ३ - १२ ॥)

प्रथमसूत्रविवक्षित गत्यनुपपत्ति तृतीयसूत्रविवक्षित परमात्ममुख्यवृत्त्या ब्रह्मशब्दगौणवृत्तिकल्पन चतुर्थपंचम सूत्रविवक्षितार्चिरादिगत पुरुषामृतत्वा पुनरावृत्तिश्रवणविलम्बित विषयत्वकल्पनरूपाणां त्रयाणां वादरिप्रतितन्त्रार्थानां प्रतिक्षेपपरं सप्तमं सूत्रम् ॥ ५३ ॥

अस्यार्थः, दर्शनाच्च – शरीरान्मूर्धन्य नाड्यासमुत्क्रम्य देवयानेन गतस्यैव विदुषोऽव्यवधानेनैव परस्यैव ब्रह्मणः प्राप्तेः श्रुत्यैव प्रतिपादनाच्च । परमुपासीनमेव नयत्यातिवाहिकगणइति जैमिनिराचार्यो मन्यतइति ॥ ५४ ॥

अत्र विवक्षिताश्रुतिश्च - छान्दोग्येदहरविद्याया मष्टमप्रपाठक-तृतीयखण्डचतुर्थखाण्डिकागता, द्वादशखण्ड द्वितीयखण्डिकागता च - " एषसंप्रसादोस्मा च्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन-रूपेणाभिनिष्पद्यते " इत्येवं रूपा ॥ ५५ ॥

अत्र शरीरात्समुत्थायेति मूर्धन्यनाड्योत्क्रम्य देवयानेनोद्गमना-भिधानेन गत्यनुपपत्तितर्कानवकाशः ॥ ५६ ॥

ल्यप्प्रत्ययेना व्यवधानाभिधानेना चिराद्गितपुरुषामृततया पुन रावृत्तिश्रवणविळम्बित विषयत्वव ल्पनानवकाशः ॥ ५७ ॥

समानप्रकरणस्थस्यात्रत्यपरंज्योतिश्शब्दस्य मोक्षात्मक स्व-स्वरूपाभिनिष्पत्ति श्रवणानुरोधेन परब्रह्मपरताया अवर्जनीयतया - गतिश्रुतौ - ब्रह्मगमयतीत्यत्र परमात्ममुख्यवृत्त ब्रह्मशब्दगौणवृत्तिक ल्पनानवकाशश्च ॥ ५८ ॥

उक्तश्रुतौ, अस्माच्छरीरात्समुत्थाय - शरीरात्मभावनां परित्य ज्येत्यर्थः, नत्वासनादिव समुत्थायेतीह युक्तमिति कुदृष्टिव्याख्यानं त्वनुपपन्नत्वाद्विवरण श्रुतिविरुद्धत्वाच्च हेयम् ॥ ५९ ॥

शरीरात्मभावनापरित्यागोह्यत्र न पदेनोपस्थाप्यते ॥ ६० ॥

उपरिष्टादुक्तश्रुत्युक्त शरीरसमुत्थानविवरणैदम्पर्यप्रवृत्तोपष्ठख ण्डे पंचमषष्ठखण्डिकयोः - " अथ यत्र तदस्माच्छरीरादुत्क्रामत्य थैतै रेव रश्मिभिरूर्ध्वमाक्रमते - स ओमितिवाहोद्वामीयते - स यावत्क्षिप्येन्म-नस्तावदादित्यं गच्छत्येतद्वैखलु लोकद्वारं विदुषां प्रपदनं निरोधो विदु षाम् ॥१॥" "तदेषश्लोकः शतं चैकाचहृदयस्य नाड्यस्तासाम्मूर्धानमभिनि स्सृतैका। तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्याउत्क्रमणे भवंत्युत्क्रमणेभवं ति "।२।इत्येवंरूपयोः विदुषश्शरीरान्मूर्धन्य नाड्योत्क्रमणं रश्मिभिरूर्ध्वं मा

क्रमणं – प्रणवेन ब्रह्मानुस्मरण पूर्वकं प्रयाणं अविलंबेनादित्योपलक्षितेनार्चिरादिमार्गेण लोकविशेषगत्वामृतत्व प्राप्तिश्च स्पष्टतरं ह्यभिधीयन्ते ॥ ६१ ॥

तदेतत्सर्वमभिप्रेत्यैतत्सूत्रभाष्ये भाष्यकारैः – "दर्शयतिच श्रुतिर्मूर्धन्यनाड्यानिष्क्रम्य देवयानेन गतस्य परब्रह्मप्राप्तिम्" इत्यभिधायोक्त श्रुतिरुदाहृता ॥ ६२ ॥

"तयोर्ध्वमायन्नमृतत्वमेती"ति विवरणश्रुतावायन्निति शतृप्रत्ययेनार्चिरादिमार्गं प्रस्थितानाममृतत्वप्राप्तेः मध्ये लोकविशेषचिरकाल स्थितिलक्षणव्यवधानराहित्यं प्रतिपादयता - एष "सम्प्रासाद"इत्यादिमूलश्रुतौ समुत्थायेति ल्यप्प्रत्ययार्थस्य विवृतत्वादुक्तश्रुतेरर्चिरादिमार्गप्रस्थितानामव्यवधानेनामृतत्व प्राप्तिप्रतिपादकत्वं दुरपह्नवम् ॥ ६३ ॥

एवमुक्त विवरणश्रुत्युपबृंहणभूतया याज्ञवल्क्यस्मृत्या – "ऊर्ध्वमेकः स्थितस्तेषां योभित्वा सूर्यमण्डलम् । ब्रह्मलोकमतिक्रम्य तेन याति परां गतिम्" इति तृतीयाध्यायसप्तषष्ट्यधिक शततमश्लोक रूपया - अर्चिरादिमार्गप्रस्थितानामेकोत्पातेनैव चतुर्मुखलोकमप्यतिक्रम्य तत ऊर्ध्वं गत्वा अमृतत्व प्राप्तिलक्षण परमगतिप्राप्तिं प्रतिपादयन्त्या– तेषां न चतुर्मुखःप्राप्यः, नवा तत्र चिरकालं स्थित्वा महता विलम्बेन पश्चादमृतत्वप्राप्तिरिति प्रतीतेः; छान्दोग्योपनिषदि षष्ठप्रपाठके चतुर्दशखण्डे द्वितीयखण्डिकागतया· "तस्य तावदेव चिरं यावन्नविमोक्ष्ये अथ सम्पत्स्यइति"इति सद्विद्याप्रकरणस्थश्रुत्या – सद्विद्यानिष्ठस्य मोक्षप्राप्तेर्देहपात मात्रावधिविलम्बप्रतीतेश्च , विदुषः शरीरादुत्क्रान्तस्य लोकविशेष चिरकालवासलक्षणव्यवधानमन्तरेणैव ब्रह्मप्राप्तिः प्रस्फुटा ॥ ६४ ॥

एवम्मुण्डकोपनिषदि प्रथममुण्डके द्वितीयखण्डे – एकादशख–

ण्डिकायां – "तपःश्रद्धे येह्युपवसन्त्यरण्ये शान्ताविद्वांसो भैक्षचर्यां चरन्तः । सूर्यद्वारेण तेविरजाःप्रयान्तियत्रामृत स्सपुरुषोह्यव्ययात्मा"– इत्येवं रूपायां सूर्योपलक्षितार्चिरादि मार्गगामिनां विदुषां अमृतत्वाव्ययात्मत्वविशेषित परमपुरुषतल्लोकावेव प्राप्यौ नतु द्विपरार्धावसानकाल विनाशि हिरण्यगर्भ तल्लोकाविति प्रस्फुटमेवाभिधीयते ॥ ६५॥

नचायं पुरुषो हिरण्यगर्भइति शक्यं वक्तुम् – प्रकरणविरोधादमृतत्वा व्ययात्मत्व श्रुतिविरोधाच्च ॥ ६६ ॥

अस्मिन् हि प्रकरणे एतत्खण्डिकातः प्रागण्डान्तर्वर्ति चतुर्मुख लोकान्त सर्वप्राप्याणामन्तवत्त्व मभिधाय, एतत्खण्डिकायां परविद्याकार्यानन्त स्थिरफलपरमपुरुषप्राप्तिं प्रस्तुत्य, एतदुपरिष्टात – "परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायादि"त्यादिना पूर्वोक्तान्तवत्फल निन्दानुवादेन– "येनाक्षरं पुरुषं वेदसत्यं प्रोवाचतां-तत्त्वतो ब्रह्मविद्यामि"त्यन्तेन – अनन्तस्थिरफलब्रह्मप्राप्तिफला दर्शितखण्डिकोक्तपरमपुरुषविषयणीपराविद्याहि विधीयते ॥ ६७ ॥

अमृतत्वाव्ययात्मत्व विशेषितोक्त पुरुषविशेषएवहि अक्षरं पुरुषं वेदसत्यमिति परविद्याविषयश्शब्दतो ऽर्थतश्च प्रत्यभिज्ञायते ॥ ६८॥

एवं तृतीयमुण्डके प्रथमखण्डे - "सत्यमेव जयते नानृतं सत्येन पन्थाविततो देवयानः । येनाक्रमन्त्यृषयो ह्याप्तकामायत्र तत्सत्यस्य परमं निधानम्"इति षष्ठखण्डिकायां देवयानगामिनां विदुषां सत्यशब्दवाच्य परब्रह्मसम्बन्धि परमपदमेव, प्राप्यं नापरब्रह्मस्थानमिति स्फुटतरंश्रूयते;सत्यशब्दवाच्यं परमेव ब्रह्मेतितु-"बृहच्च तद्दिव्यमचिन्त्यरूपं सूक्ष्माच्च तत्सूक्ष्मतरं विभाति । दूरात्सदूरे तदिहान्तिकेच पश्यत्स्विहैव निहितं गुहायाम् ॥ " इत्याद्युत्तरभागेनैव स्पष्टम् ॥ ६९ ॥

अर्चिरादिगामिना ममृतत्वापुनरावृत्तिप्राप्तेर्मध्ये लोकविशेष चिरकालस्थिति विलम्बेन पश्चाद्भावित्वराहित्यं गतिश्रुतिष्वव्यवधानेन त

स्प्राप्तिप्रतिपादनादिव तादृशगतिप्रतिपन्न स्थानविशेषे तदीयस्थिते स्ततऊर्ध्वगमनमन्तरेण तत्रैव कालपरिच्छेदरहितायाः प्रतिपादना- दप्यवगम्यते ॥ ७० ॥

अर्चिरादिमार्गगतानां तद्गतिलब्धस्थानविशेषे कालानवच्छिन्ना- स्थितिश्च बृहदारण्यकोपनिषदि - सप्तमाध्यायदशमब्राह्मणे- "सलोक मागच्छत्यशोकमहिमं तस्मिन् वसतिशाश्वतीस्समाः ,, (१) इति श्रुत्या अष्टमाध्यायद्वितीयब्राह्मण पञ्चदशखण्डिकायां " तान् वैद्युतान्पुरुषोमा नवएत्य ब्रह्मलोकान् गमयतिते तेषु ब्रह्मलोकेषु पराः परावतो - वसन्ति तेषां न पुनरावृत्तिः " (२) इति श्रुत्याचप्रतिपन्ना ॥ ७१ ॥

एतदुक्तंभवति - अर्चिरादिगतिश्रुतिषु क्वचिद्ब्रह्मप्राप्त्या, क्वचि ल्लोकविशेषप्राप्ति तत्रत्य कालानवच्छिन्नवासाभ्यां, क्वचिच्चताभ्याम पुनरावृत्ति सहिताभ्यां , क्वचिच्चामृतत्वप्राप्त्याच, गन्तॄणां चर्यानि रूपण विश्रमो दृश्यते । यद्दिपुनरत्र लोकप्राप्तिश्रवणं चतुर्मुखलोक विषयं अमृतत्वप्राप्तिश्रवणं तत्र चिरकालस्थितिविलम्बेन पश्चान्मो- क्षप्राप्तिविषयं चाभविष्यत् - तदा लोकविशेषप्राप्ति तत्रत्य कालान वच्छिन्न वासाभ्यां विश्रमः , अव्यवधानेन ब्रह्मप्राप्त्यमृतत्व प्राप्त्योः श्रवणं, एकेनैव प्रयाणेन चतुर्मुखलोकमप्यतिक्रम्य परगतिप्राप्तिस्मर णञ्च नाभविष्यत् , अभविष्यच्च क्वचिच्चतुर्मुखलोक चिरकालस्थिति – तदनन्तरमोक्षप्राप्त्यो रुभयोःश्रवणमपि । प्रश्नोपनिषत्पंचमप्रश्न पंचमख ण्डिकायां " ससामभिरुन्नीयते ब्रह्मलोकम् , सएतस्माज्जीवघनात्परा त्परं पुरिशयं पुरुषमीक्षत " इति गन्तॄणामर्चिरादिगति लब्ध ब्रह्मलो कशब्दित स्थानविशेषएव परमपुरुषेक्षितृत्व श्रवणमपि नोपपद्यते । सर्वगतिश्रुतीना मैककण्ठ्यंच न कथंचिदपि सम्भवति । तस्माद्गति श्रुतीनां - गन्तॄणां देशविशेषेव्यवधानेन साक्षात्परब्रह्म प्रापकत्वप रतैव दुरपह्नवासिद्ध्यतीति ॥ ७२ ॥

विदुषउत्क्रान्ति प्रतिषेधादिकं तु चतुर्थाध्यायद्वितीयपादे प्रागेव समाहितम् ॥ ७३ ॥

॥ सू ॥ नच कार्ये प्रत्यभिसन्धिः ॥ ८ ॥ (४ - ३ - १२ ॥)

द्वितीयसूत्रविवक्षित प्रजापतिसभावेश्मप्राप्ति प्रतिसन्धानानुपपत्ति स्थूलवस्तुमय लोकविशेषप्राप्यत्वानुपपत्तिरूपयोः बादरिप्रतित न्नार्थयोः प्रतिक्षेपपरमष्टमं सूत्रम् ॥ ७४ ॥

अस्यार्थः, प्रत्यभिसन्धिश्च - प्रजापतिसभावेश्मप्राप्ति प्रतिसन्धानंच । न कार्ये - न कार्यब्रह्मविषयः , अपितु परब्रह्मविषयएवेति जैमिनिर्मन्यत इति ॥ ७५ ॥

इद मत्र तात्पर्यम् – छान्दोग्याष्टमप्रपाठके - चतुर्दशखण्डे - "प्रजापतेस्सभां वेश्मप्रपद्ये " इति श्रूयमानमर्चिरादिगतस्य प्रजापतिसभावेश्मप्राप्ति प्रतिसन्धानं न कार्यब्रह्महिरण्यगर्भ तत्स्थानप्राप्तिविषयम् , अपितु परब्रह्म तत्स्थानप्राप्तिविषयमेव , वाक्यशेषेतस्याभिसन्धातुः - " यशोऽहंभवामि ब्राह्मणाना " मित्यादिना सर्वाविद्याविलोपपूर्वक सर्वात्मभावानुसन्धान श्रवणात् कायप्राप्तुस्तदसम्भवात् , पूर्वत्र त्रयोदशखण्डे " अश्वइव रोमाणि विधूय पापंचन्द्रइव राहोर्मुखात्प्रमुच्य धूत्वाशरीरमकृतं कृतात्मा ब्रह्मलोकमभिसम्भवामी " त्यभिसम्भाव्यस्य - ब्रह्मलोकस्याकृतत्वश्रवणात् , सर्वबन्धविनिर्मोकस्य साक्षाच्छ्रवणाच्च । प्रजापतिशब्दश्च नात्र चतुर्मुखविषयः – स्ववाक्यएव पूर्वत्र – " आकाशोहवैनामरूपयो र्निर्वहिता ते यदन्तरातद्ब्रह्म तदमृतं स आत्मे " ति प्रकृतपरब्रह्मविषयत्वात् , प्रजापतिशब्दस्य पतिं विश्वस्येत्यादि श्रुतिसिद्धनिरुपाधिकपतित्व शालिनि परस्मिन्नेव ब्रह्मणि मुख्यत्वात् , " प्रजापतिश्चरति गर्भे अन्त " रित्यादिषु परब्रह्मण्येव प्रयोगदर्शनाच्च । तथाच ब्रह्मोपासकस्यार्चिरादिना गतस्य न प्रजापतिसभावेश्मप्राप्ति प्रतिसन्धानानुपपत्तिः – नापि स्थूलवस्तुमयलोकविशेष प्राप्यत्वानुपपत्तिः – अकृतं ब्रह्मलोकमिति नित्यस्य परब्रह्मासाधाणा प्राकृत-

लोकस्य श्रुत्यैव सिद्धस्य तर्केणानपनोद्यत्वा ल्लोकप्राप्तिश्रुतेस्तद्विषयत्वसम्भवा ल्लोकसामान्यस्य क्षणक्षरणशील प्राकृतस्थूलवस्तुमयत्व नियन्धाभावाच्चेति ॥ ७६ ॥

इत्थ मर्चिरादिमार्गगामिना मुपासकानामव्यवधानेन लोकविशेषे परस्यैव ब्रह्मणः प्राप्तौ प्रमाणगणैर्दुरपह्नवं निश्चितायां चतुस्त्रिंशवाक्योदाहृता श्रुतिस्सप्तत्रिंशवाक्योदाहृता स्मृतिश्च न तद्विरोधेनोदेतुं-प्रभवतः ॥ ७७ ॥

चतुस्त्रिंशवाक्योदाहृतश्रुतेश्चायमर्थः; तेसर्वे- उपासकाः । ब्रह्मलोकेतु - ब्रह्मैव लोको ब्रह्मलोकः, कर्मधारयोऽत्र निषादस्थपतिन्यायात् , तस्मिन् - उपास्ये परब्रह्मणि । वर्तमानाः । परान्तकाले - परः-अन्तिमः, योऽन्तकालः - देहावसानसमयः, तस्मिन् - प्रारब्धकर्मभोग हेतुप्राकृतचरमदेहावसान समये । परामृतात - परस्माद्ब्रह्मणउपासनप्रीताद्धेतोः । परिमुच्यन्ति - सर्वस्माद्बन्धाद्विमुच्यन्तइति ॥ ७८ ॥

सप्तत्रिंशवाक्योदाहृतास्मृतिस्तु - नैतल्लोकनिष्पन्नविद्यार्चिरादिमार्गप्रस्थितविद्वद्विषया, किन्तु पुण्यकर्मविशेषेणाहिरण्यगर्भलोकं प्राप्तानां - ‘ तदुपर्यपि बादरायण ’ इति न्यायेन तत्रैव निष्पन्नविद्यानां गतिप्रकारविषया ॥ ७९ ॥

अस्यास्स्मृतेरयमर्थः; तेसर्वे · पुण्यकर्मविशेषेण हिरण्यगर्भलोकं प्राप्ताः पुरुषविशेषास्सर्वे । ब्रह्मणासह - चतुर्मुखेनसाकं । कृतात्मानः- तस्यैव लोके शिक्षितमतयः, अधिगतविद्यास्सन्तइति यावत् । परस्य- चतुर्मुखायुषः । अन्ते । प्रतिसंचरे- महाप्रळये । संप्राप्तेसति । परं पदं- प्रविशन्तीति ॥ ८० ॥

नच दर्शितश्रुतिस्मृत्योर्भिन्नविषयत्वं नोचितम् , तद्घटक कतिपय- शब्दतउभयोरेक विषयतायाः स्वरसतः प्रत्यभिज्ञापनादिति वाच्यम् ; ते- ब्रह्मलोकेत्विति श्रुतौ - ते सर्वइत्यनेन “ वेदान्तविज्ञानसुनिश्चितार्था स्स

न्यासयोगाद्यतयश्शुद्धसत्वा ” इति तत्खण्डिकापूर्वार्धोक्तानां मत्रैव लोके सुदृढपरिनिष्पन्न विद्यानामुपासकानामेव ग्रहणेन “ ब्रह्मणास्सहते सर्व ” इति स्मृतौ चतुर्मुखेन साकं तल्लोकेऽधिगत विद्यानामेवाधिकारिणां ग्रहणेनच तयोर्भिन्नविषयत्वस्यैवावगमेन ब्रह्मलोकपरान्त-कालादि शब्दानां पूर्वोक्तरीत्या स्वरसतएव तत्तदानुगुण्यसम्भवाच्चोक्तस्मृत्या श्रुतेस्समानविषयत्व प्रत्यभिज्ञापकत्वायोगात् ॥ ८१ ॥

तैत्तिरीयोपनिषदि षष्ठप्रश्ने दशमानुवाके “ यस्मात्परंनापरमस्ति किंचिद्यस्मान्नाणीयो नज्यायोस्तिकश्चित् । वृक्षइवस्तब्धो दिवि तिष्ठत्येक स्तेनेदं पूर्णं पुरुषेण सर्वं ” मिति विंशखण्डिकायां सर्वोत्तरेद्युशब्दिते परमपदे सर्वव्याप्तस्य निस्समाभ्यधिकस्य कस्यचित्पुरुष विशेषस्य सद्भावं प्रस्तुत्य तादृशपुरुषप्राप्तिः कस्मिन्देशे भवति केनोपायेन केषामधिकारिणां भवतीत्याशंकायां “ न कर्मणा न प्रजया धनेन त्यागे नैके अमृतत्वमानशुः । परेणनाकं निहितं गुहायां विभ्राजते-यद्यतयोविशन्ति ॥ ” इत्येकविंशखण्डिकायां तादृशपरमपुरुषप्राप्तेरमृतत्वलक्षणायाः परमपदाख्यदेशविशेषभावितां कर्मप्रजाधनाद्यसाध्यतां त्यागसाध्यतां यतिशब्दिताधिकारि विशेषाधिगम्यमानतांच प्रतिपाद्य, ततः – “ वेदान्तविज्ञानसुनिश्चितार्था स्संन्यासयोगाद्यतयश्शुद्धसत्वाः । ते ब्रह्मलोकेतुपरान्तकाले परामृतात्परिमुच्यन्ति सर्वे ॥ ” इति द्वाविंशखण्डिकायां तादृशाधिकारिणां स्वरूपस्य तेषां पूर्वप्रस्तुतपरमपुरुषप्राप्तिप्रकारस्यचैव प्रतिपिपादयिषितत्वेनास्मिन् प्रकरणे पुण्यकर्मणां चतुर्मुखलोकप्राप्ति तत्रत्योपासनानुष्ठान तदनन्तरमोक्षप्राप्ति प्रसंगएव न संगतः ॥ ८२ ॥

ईदृशानुपपत्ति मालोच्यैव भाष्यकारैरेतदधिकरण वेदान्तसारदीपयोरुक्तश्रुतिर्यथोक्तरीत्यैव व्याख्याता ॥ ८३ ॥

नहि खल्वत्रैव वेदान्तविज्ञानसुनिश्चित तत्त्वहितपुरुषार्थानामसंग कर्मयोगानुष्ठानादि लक्षणसंन्यासयोगेन विशुद्धान्तःकरणाना मात्र

याण मुपासनादिलक्षणाभीप्सित परमपुरुषार्थप्राप्तियतनशीलाना म र्चिरादिमार्गप्रस्थिताना मधिकारिणां हिरण्यगर्भलोकप्राप्ति तद्वास त त्रस्थभोगानुभवोपासनादिकं संगतं भवति, तेषां देहावसानसमयएव सकलसुकृतदुष्कृत हानस्य सांपरायाधिकरणसिद्धतया मध्ये चतुर्मुखलोके ब्रह्मप्राप्तिव्यवधायक भोगाद्यसम्भवात, स्वोपासनेनाप्रेप्सित फलप्राप्तौ तत्क्रतुन्यायविरोधात, सएनान् ब्रह्मगमयतीत्यादिकायाः तदानीमेव ब्रह्मप्राप्तिश्रुतेर्विरोधाच्च ॥ ८४ ॥

एवं वेदान्तविज्ञानसुनिश्चितार्था इत्यादिविशेषणवत्तया श्रुताना मधिकारिणां कृतात्मत्वस्या भिव्यक्ततया, कृतात्मना मनित्यचतुर्मुख-लोकप्रहाणेन नित्यस्य परमपदस्यैवाधिगन्तव्यतायाः दर्शितस्मृतावेव कृतात्मानः प्रविशन्ति परं पदमित्यनेन स्पष्टत्वाच्च, तेब्रह्मलोकेत्विति श्रुतौ ब्रह्मलोकशब्दस्य न तादृशाधिकारिप्राप्यतयाऽ नित्यचतुर्मु-खलोकप्रतिपादकत्वं सम्भवति ॥ ८५ ॥

अतएवहि छान्दोग्यश्रुतौ " धूत्वाशरीरमकृतं कृतात्मा ब्रह्मलोकम भिसम्भवामी"तीहैव सतः कृतात्मनोभिसम्भाव्यस्य ब्रह्मलोकस्याकृ-तमिति नित्यत्वं चतुर्मुखलोकाद्व्यावर्तकमभिहितं ॥ ८६ ॥

इत्थमुक्तश्रुतेः प्रकरणबलेनात्रैव वेदान्तविज्ञानसुनिश्चितार्थत्वादि विशेषणविशिष्टाधिकारि विशेषविषयत्वादेव अस्मिन्नधिकरणे बादरि पक्षस्यैव सिद्धान्तरूपताभिमानिभिः परैरपि मुण्डकोपनिषत्तृतीय मु-ण्डकद्वितीयखण्डषष्ठखण्डिकाया मुक्तायामेव श्रुतौ पाठभेदत उक्त प्रकारेण किंचिदानुपूर्वीभेदेनच पठ्यमानायां ब्रह्मलोकपरान्तकालशब्द-योरुक्तरीत्यैव परब्रह्मचरमदेहावसानपरतयैव व्याख्यानं कृतम्, न तु चतुर्मुखलोकतदायुरवसानकालपरतया ॥ ८७ ॥

तत्रत्यपाठभेदस्तु " तेब्रह्मलोकेषु परान्तकाले परामृताः परि-मुच्यन्तिसर्वे " इत्येवं रूपः ॥ ८८ ॥

इदं पुनरत्र बोध्यम्–यथा ब्रह्मलोकान् गमतीत्यत्र ब्रह्मलोकशब्दस्य अदितिः पाशानितिवद्बहुवचनोपपत्त्या कर्मधारयसमासम्, अप्राकृतलोकानामपि बहूनां प्रमाणप्रतिपन्नतया तत्पुरुषसमासंचाश्रित्य द्विविधापि योजना परं जैमिनिरिति सूत्रे भाष्यकारैर्भाषिता; तथेहापि द्विविधा योजना सम्भवति; परान्तकालेतु, ब्रह्मलोके - परब्रह्मासाधारणाप्राकृतनित्यविभूतौ । अवान्तरलोकबहुत्वे प्यप्राकृतविभूत्यैक्य विवक्षयैकवचनं, पाठान्तरेतु लोकबहुत्वाभिप्रायेण बहुवचनं । परामृतात्-परममृतं ब्रह्मप्राप्य, परामृताइति पाठेतु परममृतंब्रह्मसाध्यतया येषामस्ति ते परामृताः – परं ब्रह्मप्राप्ताइत्यर्थइति यथायथं योजनाद्वयेपि पदानामानुगुण्यं बोध्यम् । एकयोजनायाः ब्रह्मलोकान्गमयी त्यत्रोक्तन्यायेन योजनान्तरोपलक्षणत्वेन दर्शितयोजनाद्वयमभिप्रेतमेव भाष्यकृतां । "धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसम्भवामि" "ब्रह्मलोकान् गमयति सलोकमागच्छत्यशोकमहिमं सप्रजापतिलोकं सब्रह्मलोकं ससामभिरुन्नीयते – ब्रह्मलोकं" इत्यादिश्रुत्यन्तरेषु अर्चिरादिगामिनां विदुषामप्राकृतनित्यलोकस्य प्राप्यतया ब्रह्मलोकशब्देन प्रतिपादनानुगुणाच्चेयं द्वितीययोजनाप्यभिप्रेतैव भाष्यकृतां । ईदृशश्रुत्यन्तरसंवादानुरोधेनैव ब्रह्मलोकान्गमयतीत्यत्र द्विविधयोजनाया स्तैरुक्तत्वात्तस्य स्थलान्तरस्थ ब्रह्मलोकशब्दयोजना द्वयोपलक्षणत्वादिति ॥ ८९ ॥

नन्वोक्तस्मृतौ - कृतात्मानस्ते सर्वे ब्रह्मणासहपरस्यान्ते प्रतिसंचरे संप्राप्ते परं पदं प्रविशन्तीति योजना, इत्थंचोक्तस्मृत्यनुरोधेन सर्वेपि विद्वांस इहैवानुष्ठित परविद्याअपि विद्यानिष्पत्तिशेषं चतुर्मुखलोकं चिरकालस्थित्या प्राप्य चतुर्मुखेन साकं महाप्रळयलक्षण तदायुरवसानकालएव परं पदं प्रविशन्तीत्यभ्युपगमे का क्षतिरिति वाच्यं; 'कृतात्मा ब्रह्मलोकमभिसम्भवामि' 'कृतात्मानः प्राविशन्ति परंपद'मिति श्रुतिस्मृत्योःस्वरसतः प्रतिपन्नस्य कृतात्मतायाः परमपदप्राप्ति हेतुत्वस्यापवादायोगात्, अर्चिरादिपथगामिनां विदुषां शरीरावसानएव सकलकर्मविधूननस्य-चतुर्मुखलोकमप्यतिक्रम्या व्यवधानेनैव परब्रह्मप्राप्तेश्च श्रुतिस्मृतिप्र-

तिपन्नतायाः प्रागेव निरूपिततया तद्विरोधस्य दुरपह्नवत्वात्, मध्ये चिर कालं चतुर्मुखलोकस्थिति हेतुकर्माभावेन सर्वेषां विदुषामाधिकारिक-चतुर्मुखेन साकमाप्रळयावस्थानासम्भवाच्च ॥ ९० ॥

"तस्य तावदेव चिरं यावन्नविमोक्ष्ये अथ संपत्स्यइती" ति छान्दोग्यषष्ठप्रपाठक चतुर्दशखण्ड द्वितीयखण्डिकागता श्रुतिर्हि सद्विद्यानिष्ठस्य मोक्षप्राप्ते देहपातमात्रावधि विळम्बं प्रतिपादयन्ती विदुषांमध्ये चतुर्मुखलोकआप्रळयावस्थान लक्षणविळम्बविरहं विशदयति ॥९१॥

तस्माद्विदुषामेव पुण्यकर्मविशेषेण हिरण्यगर्भलोकं भेजुषां-तत्रैवाधिगतविद्यानां प्रारब्धकर्मफलभूत हिरण्यगर्भसायुज्यानुभवावसाने तेनैवसाकं मोक्षस्थानप्राप्तिं प्रतिपादयति सैषा स्मृतिरिति न तया दर्शितश्रुतेः कथंचिदपि समानविषयता सुवचा ॥ ९२ ॥

तथाचोक्तस्मृते रर्चिरादिवर्त्मना हिरण्यगर्भोपासकानां तल्लोकप्राप्तिप्रतिपादकत्वादर्शनात्, प्रत्युतार्चिरादिगतिश्रुतिषु गन्तॄणां हिरण्यगर्भतल्लोकव्यावृत्त परब्रह्मलक्षण परमपुरुषतल्लोकयोरेव प्राप्यत्वप्रातिपादनदर्शनाच्च, परब्रह्मोपासीनानेव नयत्यर्चिरादिरातिवाहिकगणइति जैमिनेराशयः ॥ ९३ ॥

इदमत्र षष्ठादित्रिसूत्र्या निष्पन्नं जैमिनितात्पर्यम्, परविद्याप्रकरणेष्वेवार्चिरादिगतिश्रवणात्, गतिश्रुतिषुच गन्तॄणां प्राप्यस्य कार्यब्रह्मतल्लोकादि व्यावृत्तैः परब्रह्म तल्लोकाद्यसाधारणैरनन्यथासिद्धै र्मुख्यत्रैरेव शब्दैर्निर्देशाच्च, परब्रह्मोपासकाएवार्चिरादिमार्गेण गन्तारः; परमेवच ब्रह्मतेषां प्राप्यं, न कार्यं हिरण्यगर्भादिलक्षणं ब्रह्मेतिनिश्चीयते।

नच परब्रह्मासाधारणशब्दानां कार्यब्रह्मणि लाक्षणिकत्वकल्पनं युक्तम्, अनन्यथासिद्धबीजाभावात्। नच गमनानुपपत्तिः प्रमाणम्, सर्वगतस्य नित्यसिद्धस्यच ब्रह्मणो वेदनस्य "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा नाशकेने" त्यादि शा

स्वाद्वर्णाश्रमधर्मशौचाचार देशकालादिसापेक्षत्ववत्सर्वगतत्वेपि तस्य तादृशवेदनफलभूत निश्शेषाविद्यानिवृत्तिपूर्वकप्राप्ते विशिष्टदेशगतिसापेक्षत्वस्यापि गतिशास्त्रादेव सिध्या गमनस्यानुपपन्नता विरहात् ।

नचाविद्याया अनिवृत्तौ कुत्रापि न ब्रह्मप्राप्तिः, निवृत्तौचात्रैव सा सं म्भवितुमर्हति, सर्वगतत्वाद्ब्रह्मणः; अविद्यानिवृत्तिश्च सत्यां सामग्र्यामत्रैव सम्भवतीति कथमुपपन्नं ब्रह्मप्राप्तये क्वचिद्गमनमिति वाच्यं। गतिशास्त्रेण देशविशेषे ब्रह्मप्राप्तिप्रतिपादकेनैव निश्शेषाविद्यानिवृत्त्यसम्भवे प्रतिपद्यमाने तर्केणैव तत्सम्भवोपपादनायोगात् । नहिखलु लिंगं श्रुतिं बाधितुं प्रभवति, लोके सर्वभावानां स्वाभाविकस्वस्वकार्योत्पादन शक्तिवैचित्र्यस्यदुरपह्नवतयाऽग्निजलादीनां तत्तद्वस्तूनामौष्ण्यशैत्य शुद्धत्वाशुद्धत्व शुद्धिकरत्वाशुद्धिकरत्वादि शक्तिवैचित्र्यवत प्रकृति मण्डलस्याविद्योत्पादनशक्तिः परमव्योमाख्यदेशविशेषस्य तन्निवर्तनशक्तिश्च प्रमाणसिद्धेनापह्नवमर्हतः। स्वाभाविकाविचित्रभावशक्तीनां तर्केण दुरपह्नवताच पराशरेणाप्युक्ता विष्णुपुराणप्रथमांशतृतीयाध्याये– "शक्तयस्सर्वभावानामचिन्त्य ज्ञानगोचराः । यतो ऽतोब्रह्मणस्तास्तु सर्गाद्याभाव शक्तयः ॥ भवन्तितपतां श्रेष्ठ पावकस्य यथोष्णता " इति ॥ किंच विशुद्धतरेणापि सलिलेन पंकिलस्य वस्तुनः पंकमध्यएव सतोमलप्रक्षालनवद्धिययापि संसारिणो जन्तोरविद्योत्पत्त्याकरेप्रकृतिमण्डलएव सतो निश्शेषाविद्याकल्मष निवर्तनमसम्भावितम्, अतस्सभगवान्परमकारुणिकः परंब्रह्मपुरुषोत्तमोनारायणः यथापंकिलं वस्तुप्रक्षाळयितुकामः पंकाद्बहिर्निष्पंकं पंकहरंच विशुद्धतीर्थसलिलंनीत्वा प्रक्षाळयति तद्वदुपासनप्रीत उपासीनानातिवाहिकै रर्चिरादिभिः प्रकृतिमण्डलादूर्ध्वं तत्सम्बन्धविधुरं तत्सम्बन्धगन्धासहिष्णुंच प्रदेशविशेषंनीत्वा निश्शेषाविद्याकल्मषं प्रक्षाळ्य स्वात्मानंप्रापयतीति विदुषां ब्रह्मप्राप्तये गमनमुपपन्नं। अपिचानुभूयमानातिरोहित तत्तद्वस्तुसन्निकर्षविशेषस्यैव तत्तद्वस्तुप्राप्तिरूपत्वा त्तथाविधसन्निकर्ष विशेषलक्षणाया – विशदतरब्रह्मप्राप्ते स्तत्स्वरूपाच्छादक वितत सततपरिणामप्रकृतिमण्डले ऽसम्भावितया विदुषां ब्रह्मप्राप्तये प्रदेशविशेषगमनाभि

धान मुपपन्नतरमेव । प्रकृतेः परस्ताद्व्यतिरोहितं ब्रह्मसमन्ततोदीप्त-मिति श्रूयते । यथोक्तं छान्दोग्ये तृतीयप्रपाठके त्रयोदशखण्डे- "अथ यद् तः परोदिवोज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु-लोकेष्वि" ति । मुण्डकोपनिषदि द्वितीयमुण्डके द्वितीयखण्डेच " यस्स-र्वज्ञस्सर्वविद्यस्यैषमहिमाभुवि । दिव्ये ब्रह्मपुरेह्येष व्योमन्यात्माप्रति ष्ठित " इत्यारभ्य – " हिरण्मये परे कोशे विरजं ब्रह्मनिष्कलम् । त-च्छुभ्रं ज्योतिषां ज्योति स्तद्यदात्मविदो विदुः ॥ न तत्र सूर्यो भाति नचन्द्रतारकं नेमाविद्युतो भान्ति कुतोयमग्निः । तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाती " त्यन्तंच । पुरुषसूक्तेच श्रुतम् - " वेदाहमेतं पुरुषं महान्तमादित्यवर्णतमसःपरस्ता " दिति । अतः प्र-कृतिमण्डले ब्रह्मणस्तिरोहितत्वा दुपरिष्टात्समन्ततो दीप्तत्वाच्च तत्प्राप्त ये तमसः परस्ताद्गमनमावश्यकमेव । अतएव विद्वान् शरीरात्मूर्ध-न्य नाड्यानिष्क्रम्य देवयानेनोर्ध्वंगत्वा तमसः परस्तात्समन्ततोदीप्तं प रब्रह्माख्यं परं ज्योतिः प्राप्यैव स्वस्वरूपाविर्भावलक्षणमोक्षं प्राप्नोतीति स्पष्टमुच्यते छान्दोग्ये - "एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परंज्यो तिरुपसम्पद्य स्वेनरूपेणाभिनिष्पद्यत" इति । अतएवच तैत्तिरीयोपनिष दानन्दवल्ल्यां – " ब्रह्मविदाप्नोति पर " मित्युपक्रमाभिहित प्राप्तिविश दीकरणार्थं " अथातोनुप्रश्ना "इति प्रश्नानुपक्षिप्य,"उताविद्वानमुंलोकंप्रेत्य, कश्चनगच्छती " त्यनेन ब्रह्मविदस्माल्लोकात्प्रेत्यामुं लोकं गच्छतिनवे ति परिचोद्य, अन्तेच " सयएवं वित्, अस्माल्लोकात्प्रेत्य । एतमन्नमयमा-त्मानमुपसंक्रामती " त्यादिकया ब्रह्मोपासीनस्सर्वोपि विद्वानस्माल्लो कात्प्रेत्यान्नमयादि समष्टिव्यष्टिविभूतिकं निरतिशयानन्दं परमात्मानं – प्राप्नोतीति पूर्वोक्तप्रश्नोत्तराभिधानपरया सर्वेषां विदुषां स्थानविशे षे ब्रह्मप्राप्तये अर्चिरादिगतिमत्वं प्रस्फुटमेवाभिहितम् । इत्थंच 'सत्यंज्ञा न' मित्यादिश्रुत्या यो गुहायां निहितं ब्रह्मवेदसपरमे व्योमनि सर्वान्का मान् समश्नुत इति प्रतिपादयन्त्या अस्मिन्लोके निजहृदये ब्रह्मोपास कस्य परमव्योमाख्यदेशविशेषे भोगप्राप्त्यभिधानेन उपासकोऽस्माल्लो कात्परमपदं गत्वा ब्रह्मप्राप्नोतीत्युक्तं भवतीति ह्युदाहृतोदीच्य विव

रणेन निष्पद्यते । तस्माद्देशविशेषावच्छिन्नातिरोहित परब्रह्मसन्निकर्ष विशेषलक्षण ब्रह्मप्राप्तये ब्रह्मविदां गमनमवर्जनीयमिति सिद्धम् । 'ब्रह्मलोकान्गमयती'त्यत्र बहुवचनलोकशब्दश्रवणमपि ब्रह्मगमयतीत्यत्र ब्रह्मशब्दस्य न हिरण्यगर्भादिलक्षणकार्य ब्रह्मपरत्वोत्तम्भकं, ब्रह्मलोकानित्यत्र निषादस्थपतिन्यायेन स्वतः प्राप्तस्य कर्मधारयस्याश्रयणे द्वयोरपि श्रुत्योःस्वरसतएव सम्भवत्यैककण्ठ्ये षष्ठीतत्पुरुषाश्रयणेन परमात्ममुख्यब्रह्मशब्दस्य स्थलद्वयेपिकार्यब्रह्मणि लक्षणायास्तत्पुरुषस्थले तत्प्रयुक्तलक्षणान्तरस्यच कल्पनाया अन्याय्यत्वात् , समानप्रकरणेनार्थैकत्वे निश्चिते बहुवचनस्य 'अदितिः पाशानि' तिवदुपपत्तेः, परब्रह्म साधारणाना मप्यनेकेषामप्राकृतानां लोकानां श्रुतिस्मृतीतिहासपुराणादिप्रमाणगण सिद्धतया ब्रह्मलोकानित्यत्र तत्पुरुषाश्रयणेपि द्वयोरविरोधेनैव निर्वाहात् , प्रत्युत समानप्रकरणस्थ नानाश्रुतिघटकपरमात्मवाचकशब्द समानकण्ठस्य ब्रह्मगमयतीत्यत्र ब्रह्मशब्दस्य चतुर्मुखपरत्वएव विरोधाच्च । लोकदृष्टयाह्यस्थूल पदार्थविसजातीया आभ्यन्तरसूक्ष्मस्वाप्नपदार्थाः श्रुतिसिद्धाः स्वस्वानुभवमात्र साक्षिका यथा - नापलपितुं शक्याः , तथैव विद्याप्रकरणेषु मुक्तभोग्यतया प्रतिपाद्यमानाः कालानुगुणपरिपाक प्राकृतसकलपदार्थ विसजातीया स्तर्कपदवीदवीयांस ईश्वरनित्यमुक्तानां केवलेच्छानुगुणपरिपाका भोग्यभोगोपकरण भोगस्थानरूपाश्शुद्धसत्वमया अप्राकृता अपि पदार्थाना पलपितुं शक्याः, अनाघ्रातदोषगन्धापौरुषेय वेद तन्मूलस्मृतीतिहासपुराणादि रूपशास्त्रप्रामाण्यादेव । ईश्वरोपिहि शास्त्रैकप्रमाणको निरधारिशारीरकशास्त्रे । अमीषांच पदार्थानां कालकृतविनाशव्यवस्था वैधुर्येण सर्वदैवमुक्तेच्छानुगुण परिपाकतया न कदाचिन्मुक्तैश्वर्यहानिरिति नमोक्षानित्यत्वप्रसंगः । अतएवहि श्रूयते छान्दोग्येष्टमप्रपाठके द्वितीयखण्डे-" सयदि पितृलोककामो भवती" त्यादि । नच परिच्छिन्नत्वमनित्यत्वनियतमिति वाच्यम् ; नियामकाभावात् । अणुपरिमाणतया शास्त्रसिद्धेषु प्रत्यगात्मसुव्यभिचाराच्च । इत्थंच गतिश्रुतिषु ब्रह्मलोकशब्दस्य अर्चिरत्यातिवाहिक नीयमानपुरुष चरमप्राप्यविषयस्य

लोकपरत्वेपि न चतुर्मुख लोकपरता, किन्तु परमपुरुषा साधारण प्रकृतिमण्डल बहिर्भूत परमाकाशविषयतैव, तस्यैव चरमप्राप्यस्थान त्वात, परब्रह्मोपासकस्या र्चिरादिपथगामिन स्तत्क्रतुन्यायविरोधेन परमप्राप्यस्थानतया चतुर्मुखलोक प्रतिपादनायोगाच्च । यच्च त्यर्चिरादि मार्गगामिनां चतुर्मुखलोके चिरंस्थित्वाऽ धिगतविद्यानां पश्चाच्चतुर्मुखेन साकं तदायुरवसाने परमपदप्राप्तिस्वीकारेण तेषां श्रूयमाणामृतत्व प्राप्तेच पुनरावृत्ति सांगत्यसमर्थनम् । तदसाधु । गतिश्रुतिषुक्वापि कुत्रचि त्स्थानेआप्रळयंविळंब्यततस्तदूर्ध्वस्थानान्तरप्राप्तिप्रतिपादनादर्शनात,मार्ग प्राप्तचरमस्थानविशेषएवा पुनरावृत्त्यमृतत्वप्राप्तयो रव्यवधानेनैव संभवप्रातिपादनात्, तेषां प्रथमं हिरण्यगर्भलक्षणकार्यब्रह्मोपासकत्वस्य पश्चा दर्चिरादिवर्त्मना हिरण्यगर्भलोकं गत्वा तत्राधिगत परविद्यत्वस्यच क्वापि प्रतिपादनादर्शनात , प्रत्युत परविद्याप्रकरणेन परब्रह्मोपासक त्वस्यैवावगमात्, एष संप्रसादइत्यादि श्रुतौ तद्विवरणभूतायां 'अथ यत्रैतदस्माच्छरीरा दुत्क्रामती' त्यादिकायां 'तयोर्ध्वमायन्नमृतत्वमेती'त्यन्तायांच श्रुतौ, तदुपबृंहणभूतायां 'ऊर्ध्वमेकस्थित' इत्यादिस्मृतौच शरीरा न्मूर्धन्य नाड्या निष्क्रम्य देवयानेन गच्छतां विदुष एकप्रस्थानेनैव चतुर्मुखलोकमप्यतिक्रम्य परमस्थानेऽव्यवधानेनैवा मृतत्वा पुनरवृत्तिसिद्धिं प्रतिपादयन्त्यां यथोक्तस्य कृत्स्नस्यार्थजातस्य प्रस्फुटमेवाभिधानाच्च । तेब्रह्मलोकेत्वित्यादिश्रुतिश्च स्वप्रकरणानुगुण्या दुदाहृत सकलश्रुत्यैककण्ठ्याच्च परब्रह्मोपसकानामेव विद्यायोनि चरमशरीरावसानकाले सर्वबन्धविनिर्मोकाभिप्रायैव , ब्रह्मलोक इत्यस्य कर्मधारयत्वे ब्रह्मण्युपास्ये वर्तमाना इत्यर्थस्य तत्पुरुषत्वे परमपदइत्यर्थस्यच संभवात , परान्तकाळइत्यस्य अन्तकालेच मामेमेवेति गीताप्रयोगाद्यानुगुण्येन चरमशरीरावसानकाल इत्यर्थसम्भवाच्च । ब्रह्मणासहेत्यादिस्मृतिस्तु पुण्यकर्मविशेषेण हिरण्यगर्भसायुज्यं गतानां तत्रैवाधिगतविद्यानां तेनैव साकं तदायुरवसाने परम

पदप्राप्तिपरा । नपुनरनयो श्श्रुतिस्मृत्योर्हिरण्यगर्भोपासकाना मर्चि रादिगत्या तल्लोकप्राप्तिप्रतिपादनं किंचिदपि दृश्यते । अर्चिरादिगतिश्रुतीनां सर्वासां परविद्याप्रकरणस्थत्वात् तादृशगत्या प्रवृत्तानां शरीरावसानकालएव सकलकर्मधूननस्य भोक्तव्यकर्मविशेष शालिनां तादृशगत्यभावस्यच निर्णयाच्च तादृशगते र्हिरण्यगर्भोपासकविषयत्वं तादृशगत्यागतानां मध्ये लोकविशेषे कर्मफलभोगविशेषेण चिरकाल विलम्बितत्वं वा नहि कल्पयितुं शक्यं । एतेनोक्तश्रुतिस्मृत्योः अत्रैवाधिगतपरविद्यानामपि विदुषां अर्चिरादिगत्या चतुर्मुखलोकं प्राप्य तत्राप्रळयं स्थित्वा लब्धविद्यापरिपाकविशेषाणामेव चतुर्मुखेन साकं पश्चा त्परमपदप्राप्ति परत्वशंकापि दूरोत्सारिता । तत्क्रतुन्यायेन परब्रह्मोपासकानां चतुर्मुखलोके भोक्तव्यभोगशेषाभावेन तत्र विळंबे कारणाभावाच्च । एवं प्रजापते स्सभां वेश्म प्रपद्य इत्यभिसन्धानमपि परब्रह्मविषयमेव । आकाशो हवै नामरूपयो र्निर्वहितेति पूर्वप्रकृतपरब्रह्मविषयत्वा त्प्रजापतिशब्दस्य । प्रजापतिशब्दोहि निरुपाधिकः पतिं विश्वस्येत्यानुक्तनिरुपाधिकजगत्पतौ परब्रह्मण्येव मुख्यः । प्रजापति श्चरति गर्भे अन्तरित्यादिषु परमात्मविषयः प्रयुक्तश्च उत्तरत्रवाक्यशेषे । प्रजापतिसभावेश्मप्रपत्त्रस्यास्य यशोहं भवामि ब्राह्मणाना मित्यादिना सर्वाविद्या त्रिशोकपूर्वक सर्वात्मभावाभिसन्धानात , पूर्वत्र अश्व इव रोमाणीत्यादिश्रुतौ अस्यैव प्रस्थानदशायाम् सर्वपापविधूननपूर्वक मभिसंभाव्यतयानुसंहितस्य ब्रह्मलोकस्या कृतत्वानुसन्धानश्रवणात , प्रस्थानदशायां प्राप्यत्वेनानुसंहितस्य प्राप्तिदशायां प्राप्तत्वनानुसंहितस्य चैकताया आवश्यकतया अकृतं कृतात्मा ब्रह्मलोक मभिसंभवामीत्यत्र ब्रह्मलोकशब्दस्य प्रजापते स्सभां वेश्म प्रपद्य इत्यस्यत्र समानविषयत्वावश्यकत्वाच्च नायं प्रजापति शब्दो हिरण्यगर्भ विषयो भवितु मर्हति । नखलु हिरण्यगर्भतल्लोकयो स्सर्वपाप

विधूननपूर्वकं प्राप्यत्वमकृतत्वंवा संगच्छते , नापि तत्प्राप्तस्य सर्वाविद्या विमोकपूर्वकं सर्वात्मभावानुसन्धानं वा युज्यते , तयोरनित्यतायाः तत्प्राप्तस्य पुण्यपापफलभोगा विद्या संबन्ध पुनरावृत्तीनांच श्रुतिस्मृतिप्रतिपन्नत्वात् । तस्मा दुक्तै र्हेतुभिः परब्रह्मोपासकानेवार्चिरादिगणो नयतीत्यंगीकार्यमिति ॥ ९४ ॥

ब्रह्मपदमुख्यवृत्त्याश्रयणेन बादरिं प्रतिक्षिपतो जैमिने रयमशयोऽवगम्यते । श्रौतोह्यर्थो यथाश्रुत्येव प्रतिपत्तव्यः, प्रमाणान्तरागम्यत्वात् । इत्थंच ब्रह्मणइव तदनुबन्धिनां लोकविशेषादीनामपि नापलापो युक्तः, श्रौतत्वाविशेषात् । अतएवच देशविशेषावच्छिन्नब्रह्मप्राप्तये ब्रह्मविदामेवार्चिरादिवर्त्मना गमनमपि न तर्केण व्याहन्तुमर्हम् । एवंच सति स्वरसवाहितापि श्रुतीनां नपरित्यक्ता भवतीति ॥ ९५ ॥

अत्र बादरिजैमिन्यो रुभयोरपि गतिश्रुतिघटक ब्रह्मशब्दस्य कार्यब्रह्मपरत्व परब्रह्मपरत्वविवादेऽपि कार्यब्रह्मोपासकान् वा परब्रह्मोपासकान्वा एकोपासकानेव नयत्यर्चिरादिगणः, नतु भिन्नभिन्नोपास्योपासकान् द्विविधान् , प्राप्यस्य ब्रह्मण एकस्यैव श्रवणात् , तद्य इत्थं विदुरिति येचे मेऽरण्यइतिच विभागो यथाकथंचि देकविधोपासकानामेव अंगांगिभावोपासनभेदमात्रविषयतयावा उपासनाकारभेदमात्रविषयतया वा नेय इत्येवाभिप्रायइति बोध्यम् ॥ ९६ ॥

॥ ९ ॥ सू ॥ अप्रतीकालंबना न्नयतीति बादरायण उभयथाच दोषा त्तत्क्रतुश्च ॥ ४ ३ १४ ॥

अथान्ते भगवान् बादरायणः परमसिद्धान्तभूतम् स्वपक्षं नवमादि सूत्रद्वयेनाह ॥ ९७ ॥

अप्रतीकालम्बनान् – प्रतीकं–परमप्राप्यादर्वाचीनंवस्तु, अचित्तत्वं तन्मिश्रं चित्तत्वंवा, आलम्बंते - प्राप्यतयोपासतइति प्रतीकालम्बनाः ! तेनभवन्तीत्य प्रतीकालम्बनाः, तान् -परमप्राप्य भूतमेव वस्तु अचि

द्वियुक्तं चित्तत्वम्, परं ब्रह्मंवा प्राप्यतयोपासीनान्, पंचाग्नि विच्छाब्दित प्रत्यागत्मविद्यानिष्ठाः परमात्मविद्यानिष्ठाश्चे त्युभयविधानपीति यावत। न यत्यातिवाहिक गणइति बादरायणो मन्यते। उभयथाच – बादरिपक्ष जैमिनिपक्षयो रुभयोरपि। दोषात–श्रुतिविरोधात्। तत्क्रतुश्च - तथोपासीनस्तथैव प्राप्नोतीत्ययं न्यायश्च इहभवतीतिच बादरायणोमन्यत इति सूत्रार्थः ॥ ९८ ॥

इदमत्र तात्पर्यम्। कार्यमुपासीनान्नयतीति बादरिपक्षे छान्दोग्योपनिषदष्टमप्रपाठके तृतीयखण्ड चतुर्थखण्डिकायां द्वादशखण्ड द्वितीयखण्डिकायांच स्थितायाः 'एष संप्रसादो ऽस्माच्छरीरात्समुत्थाय परं ज्योति रुपसंपद्य स्वेन रूपेणा भिनिष्पद्यत' इति श्रुतेः एवं जातीयानामन्या सांच बहूनां श्रुतीनां विदुषश्शरीरा न्मूर्धन्य नाड्या निष्क्रम्य देवयाने नोर्ध्वंगतस्या व्यवधानेन परस्यैव ब्रह्मणः प्राप्तिं प्रतिपादयन्तीनां विरोधोदुष्परिहरः। कार्यब्रह्मोपासकस्यसाक्षा त्परब्रह्मप्राप्ते रयोगात्,यथावस्थितस्वरूपाविर्भावलक्षण मोक्षप्राप्ति श्श्रूयमाणतया तासां कार्यब्रह्मपरत्वादिभि रन्यथासिद्धे र्वर्णयितु मशक्यत्वात्, अव्यवधानश्रवणेन विळंबस्यापि दुर्वचत्वाच्च। परंब्रह्मोपासीनानेव नयतीति जैमिनिपक्षे छान्दोग्यपंचमप्रपाठक दशमखण्डगतायाः 'तद्य इत्थं विदुः, येचेमे ऽरण्ये श्रद्धातप इत्युपासते' इत्यारभ्य 'सएनान् ब्रह्म गमयत्येष देवयानः पन्था', इती त्यन्ताया श्श्रुतेः, बृहदारण्यकाष्टमाध्याये द्वितीय ब्राह्मणपंचदशखण्डिकारूपायाः 'ते यएतमेवं विदु येचामी अरण्ये श्रद्धां सत्य मुपासते तेर्चिष मभिसंभवन्तीत्यारभ्य, तान् वैद्युतात्पुरुषो ऽमानव एत्य ब्रह्मलोकान् गमयति ते तेषु ब्रह्मलोकेषु पराः परावतो वसन्ति तेषां नपुन रावृत्ति, रित्यन्ताया श्श्रुतेः, एवं जातीयाना मन्यासांच श्रुतीनां पंचा

ग्निविदाम र्च्चिरादिमार्गेण परब्रह्मप्राप्तिं प्रतिपादयन्तीनांविरोधो दुष्परिहरः । अतः, पंचाग्निविदो ब्रह्मविद श्चोभयविधा स्वय त्यर्चि राद्यिगणइत्यंगीकार्यम् । कथ मेतेषा मुभयेषांपर मर्च्चिरादिपथगा मित्वं- नान्येषा मिति चे दिद मत्र पर्यालोचनीयम् । अर्चिरादिगति शास्त्रे ब्रह्मप्राप्त्यपुनरावृत्तिलक्षण फलश्रवणात् तादृशफलयोग्या ए वार्चिरादिगतियोग्याः, येतु ब्रह्मप्राप्त्यतिरिक्त नश्वरप्राप्यलक्षणप्रतीकं प्राप्यतयाध्यवस्यन्ति, नते तादृशगतियोग्याः, तेषां प्राप्यनाशेन पुन रावृत्ते रवर्जनीयतयो क्तफलयोग्यताविरहात, प्रतीकालंबनव्यतिरि क्तास्तु सर्वएव तादृशगतियोग्याः, तेषां पुनरावृत्तिहेतुप्रतीकावलं बित्वविरहेणोक्तफलयोग्यत्वानपायात, तथाविधाश्चाधिकारिण श्चोभ यविधाएव भवन्तीति तेषामेवार्चिरादिपथगामित्वं सम्भवति - नान्ये षां, अतएव तद्यइत्थंविदु रित्यादिछान्दोग्यश्रुतौ ते यएवमेतद्विदु रित्यादिबृहदारण्यकश्रुतौच अर्चिरादिपथगामिनो विभज्य द्विविधा एव निर्दिष्टा इति । नच - पंचाग्निविदोहि कर्मवशेन भूतसूक्ष्मसंप रिष्वक्तमेव तत इत स्संचरन्तं प्रत्य गात्मान मुपासीना श्श्रूयंते, नच ते प्रतीकालंबनव्यतिरिक्ता भवितु मर्हन्ति, क्षरणशीलाचिन्मिश्रोपासकत्वात्, अतः पंचाग्निविद्ब्रह्मवि दुभयानुगमेन अप्रतीकालम्बनान्नयतीति प्रतिज्ञानं व्याहतम्, किंच-तद्य इत्थं विदुरित्या दिश्रुती ना र्चिरादि पथगामिनां द्विविधत्वप्रदर्शनपरे - अपितु - ये इत्थं विदुः-इमे इत्थं विदन्तर्गताएव ये अरण्ये श्रद्धापूर्वकं ब्रह्मचो पासते - तेऽर्चिषमभिसम्भवन्तीति तदंगभूत पंचाग्निविद्याशब्दित - प्रत्यगात्मविद्यानुष्ठान पूर्वक मंगिभूत ब्रह्मोपासननिष्ठाना मेकविधा धिकारिणामेवार्चिरादिगति प्रतिपादनपरे, अध्यात्मयोगाधिगमेन देव म्मत्वाधीरो हर्षशोकौ जहातीति कठवल्लीश्रुत्या अध्यात्मयोगाधिगमे नेति प्रत्यगात्मविद्यां विधाय देवम्मत्वेति तदंगिकां ब्रह्मविद्यांच वि धाय अंगांगिभावापन्न मुक्तविद्याद्वयं क्रमेणानुष्ठितवतो धीरस्यैव

*

फलप्राप्तिः प्रतिपाद्यते, यद्वा-उपासनाकारभेदमात्रायत्ताधिकारि द्वैविध्या भिप्रायके वा दर्शितश्रुती, इत्थंचोक्तश्रुत्योरुक्तरीत्या निर्वाहा भ्युपगमेन परब्रह्मोपासकमात्र विषयमेव गतिशास्त्रमिति मन्यमानस्य जैमिनेर्वा कार्य ब्रह्मोपासक विषयमेव गतिशास्त्र मिति मन्यमानस्य बादरेर्वा पक्षआश्रयि तु मुचितः, यद्वा-अंगांगिभावानवच्छिन्न भिन्नप्राप्योपासनपर द्विविधोपा सकपरत्वेपि दर्शित श्रुत्यो रुक्तलक्षण पंचाग्निवित् साहचर्येणा र्चिरादि पथगामितया निर्दिष्टा अन्ये हिरण्यगर्भलक्षण कार्यब्रह्मोपासकाएवां गीकर्तु मुचिताः, अवान्तरभेदे प्युभयेषाम प्युपाध्यवच्छिन्न ब्रह्मलक्षण कार्यब्रह्मो पासकत्वाविशेषेण साहचर्येण निर्देशौचित्यात, प्रश्नोपनिषत्पंचमप्रश्ने- एतद्वैसत्यकामपरंचापरंचब्रह्म यदोंकार इत्यत्र कार्यब्रह्मपरेणापरब्रह्म शब्देन प्रकृतिमण्डलान्तःपातिनः कृत्स्नस्य निर्देशा दचिन्मिश्र प्र- त्यगात्मनोपि तदन्तर्भावस्या वर्जनीयतया तदुपासकानां पंचाग्निविदां कार्यब्रह्मोपासकत्वंहि स्पष्टं, अर्चिरादिपथगामिनां कार्यब्रह्मोपा सकत्वएव गतिशास्त्रे तेषां द्विविधत्वनिर्देश उपपद्यते, प्राप्यस्य कार्यब्रह्मणो नानात्वेन तदुपासकानामपि नानाविधत्वसम्भवात्, पर ब्रह्मोपासकत्वेतु तेषां तथाविध निर्देशो न संगच्छतएव, सकलो पाधिविनिर्मुक्तस्य परस्यब्रह्मण एकरूपतया तदुपासकाना मनेक विधत्वा सम्भवेन तद्यइत्थंविदु रित्युक्तानाम प्येकविध परब्रह्मोपा सकत्वाभिधाना सम्भवात्, प्राप्यभेद निबन्धनोपासकनानात्वस्यैव - तद्य इत्थं विदुरित्यादिश्रुतिविवक्षितत्वा दन्यथो पासनाकार भेदमा- त्रनिबन्धनो पासक नानात्वस्य तद्विवक्षितत्वे ऽनन्तविधत्वस्यैव संभ वेन द्विविधत्वनिर्देशासम्भवाच्च, तथाच तद्यइत्थंविदु रित्यादि श्रु- त्योरंगांगिभावापन्नोपासनप रैकविध परमप्राप्योपासकविषयत्वेनवा अंगांगिभावानापन्न भिन्नभिन्नप्राप्योपसनपर द्विविधाधिकारविष- यत्वेन वा द्वेधापि निर्वाहसम्भवेन कार्योपासकविषयमेव गतिशास्त्रमिति

बादरिपक्षएव वांगीकर्तुमुचितः, एवं स्थिते तावेतौद्वावपिपक्षा वुपेक्ष्य प्र-
तीकालम्बनकोटाविव घटितव्यानां पूर्वोक्तलक्षणानां पंचाग्निविदां परब्रह्मो
पासकानांचो भयेषा मर्चिरादिपथगामित्वपरता वर्णन मसंगतमेव,
एतेषां सुदूरपरस्परतारतम्यशालिनां समानस्कन्धव त्साहचर्ये णैकपथ
गामित्व निर्देशानौचित्यात् , अविशेषेण ब्रह्मप्राप्त्यपुनरावृत्ति
श्रवणा नुपपत्तेश्चेति वाच्यम् । तत्क्रतुन्यायसंचारेण वा-
क्यार्थनिर्णये पूर्वोक्त सर्वदोष परिहार संभवात् । एतदुक्तंभवति ।
बादरिपक्ष स्ताव त्सुतरा मयुक्तएव, पूर्वोक्तादेव दुरुद्धराद्दोषस-
हस्रात , कार्यब्रह्मणो नानात्वेपि पंचाग्निवित्साहचर्येणा र्चिरादि
पथगामितया निर्दिष्टाना मन्येषां हिरण्यगर्भलक्षणकार्यब्रह्मोपा
सकत्वेपिच्च भिन्नभिन्नकार्योपासकत्वेना भ्युपगताना ममीषा मु-
भयेषा मविशेषेण सएनान् ब्रह्म गमयती त्येकब्रह्मप्राप्तिश्रवणानुप
पत्तेश्च, नापि दर्शितश्रुत्यो रंगांगिभावापन्नोपासनद्वयशाल्येकविधाधिकारि
मात्रविषयत्वाभ्युपगमपक्षो युक्तः, तद्यइत्थं विदु र्येचेमेरण्ये श्रद्धा
तपइत्युपासत इत्यादिश्रुतौ येचेम इत्यत्रो पासकवाचि पदानुबन्धि-
तया प्रयुक्तचकारे णेह निर्दिष्टोपासकानां तद्यइत्थं विदुरिति पूर्व
निर्दिष्टपंचाग्निविद्भ्यो भेदस्यैव स्फुटं प्रतिपादनेनो भयेषा मभिन्न
त्वासिद्धेः, उपासकैक्यस्योपास्यभेदमात्रस्यच विवक्षितत्वे तद्यइत्थं
विदु र्ये इमे ऽरण्ये श्रद्धातपइति चोपासत इत्युपास्यवाचि पदा
नुबन्धितयैव चकारश्रवणावश्यकत्वाच्च , किंवहुना, यद्युपासकैक्य
मिह विवक्षित मभविष्यत , नाभविष्यदेव तर्हि येचेमइति पु
नरुपासकवाचि पदश्रवणम् , अभविष्यच्च तद्यइत्थं विदु ररण्ये
श्रद्धातपइति चोपासत इत्येवच श्रवणम् , नचैवं श्रूयते , तस्मा
दुक्तश्रुतौ द्वाभ्यां यच्छब्दाभ्यां चकारसहकृताभ्यां विभज्य नि-
र्दिष्टा अर्चिरादिपथगामिनो भिन्नभिन्नमेवोपास्य मुपासीना द्विवि-
धाएवोपासकाइति स्पष्ट मवगम्यते , तेच पंचाग्निविदः पर

ब्रह्मोपासकाश्चे त्युक्तोभयविधाएव । नचात्र पंचाग्निविदा मुक्तरीत्या प्रकृतिविमिश्रं प्रत्यगात्मान मुपासीनानां प्रतीकालंबनत्वावश्यंभावेन ब्रह्मप्राप्त्यपुनरावृत्त्यो रनुपपत्तिः, नाप्यप्रतीकालंबनत्वेन पंचाग्निविद्व ह्मविदा मनुगमो ऽ नुपपन्नः, अर्चिरादिना गतानां ब्रह्मप्राप्त्यपुनरावृत्तिश्रवणा दमीषां चार्चिरादिगतिश्रवणा त्तत्क्रतुन्यायेन प्रकृतिविनिर्मुक्तब्रह्मात्मकात्मानुसन्धानलक्षणोपासनस्यैवा मीषां सिद्धेः, अत एव प्रतीकालंबनत्वायोगाच्च . तत्क्रतुन्यायश्च अथ खलु क्रतुमयः पुरुषो यथाक्रतु रस्मिन् लोके पुरुषो भवति तथेतः प्रेत्य भवतीति छान्दोग्यतृतीयप्रपाठक चतुर्दशखण्ड प्रथमखण्डिकागतश्रुत्या तं यथायथोपासते तथैव भवतीति श्रुत्याच तथोपासीन स्तथैव प्राप्नोतीत्येवं रूपः प्रतिपद्यते , ततश्चो पासनानुरूप मेव फल मुपासकानां सम्भवति नान्यादृशमिति सिद्ध्यति, यदि पुनः ये पंचाग्निविदः प्रकृतिविमिश्रं ब्रह्मात्मकत्वाविशेषितम् प्रत्य गात्मान मेव प्राप्यतयो पासीना इतीष्यते , नो पपद्येते एव तर्हि तेषां श्रूयमाणा ब्रह्मप्राप्तिरपुनरावृत्तिश्च , अनुपासितस्य ब्रह्मणः प्राप्त्ययोगात् , उपासितस्य प्राप्तस्य क्षरणशीलाचिन्मिश्रप्रत्यगात्मलक्षण प्राप्यस्य कदाचित क्षरणा वश्यं भावेन पुनरावृत्ते रवर्जनीयत्वाच्च , अतः पंचाग्निविदः प्रकृति वियुक्तं प्रत्यगात्मानं ब्रह्मात्मक मुपासीना इत्येव न्यायत स्सिध्यति, प्रत्यगात्मनो ब्रह्मात्मकत्वंच यस्यात्माशरीरमित्यादि श्रुतिशतसिद्धम् , पंचाग्निविद्यायां श्रूयमाण भूतसूक्ष्मसम्परिष्वक्तस्यैव सतः प्रत्यगात्मनः द्युलोकपर्जन्यपृथिवीपुरुषयोषारूपेषु पंचस्वग्निषु देव प्राणैर्हूयमानस्य क्रमेण सोमराजाख्यामृतमयदेहिभाव वर्षभावापन्न त्वेनानुसन्धानं ना चिन्मिश्रवेषेण तमुपास्य तथाविधस्यैव तस्य - प्राप्त्यर्थं विधीयते, अपितु यावदचित्संसर्गं प्रत्यगात्मनः कर्मवशेन पुनःपुन रीदृशरीत्या सर्वकश्मलमये संसारएव परवशपरिभ्रम्य,

माणत्वलक्षण दोषदर्शनमुखेन जुगुप्सया सर्वदोषाकर हेया चित्संसर्गस्य परित्याज्यतामनुसन्धाय तादृशाचित्संसर्ग वियुक्तं स्वस्वरूपापन्नं प्रत्यगात्मान मुपास्य तथाविधस्यैव तस्य प्राप्त्यर्थं विधीयते, तथाचानुसन्धानस्याभिसन्धिभेदेन हानार्थस्योपादानार्थस्यच द्विविधस्य सम्भवा दचिन्मिश्रस्य प्रत्यगात्मन स्ततइतस्संचारित्वानुसन्धानं दोषदर्शनविधया प्रकृत्यंशग्रहणार्थं गुणदर्शनविधया प्रकृतिवियुक्तत्व विशिष्ट प्रत्यगात्मस्वरूप प्राप्त्यर्थं चेत्यवगम्यते। तदिदं छान्दोग्यपंचमप्रपाठक दशमखण्डान्ते पंचाग्निविद्याप्रकरणावसाने तस्माज्जुगुप्सेत तदेप श्लोकइत्यारभ्य अथहय एतान् पंचाग्नीन् वेद नसहतैरप्याचरन् पाप्मनालिप्यते शुद्धः पूतः पुण्यलोकोभवति यएवं वेद यएवं वेदेत्यन्तेन ग्रन्थेन सुव्यक्त मुपपादितं । अत्र जुगुप्सेतेति प्रकृतिसंसर्ग जुगुप्सया तद्वियुक्त प्रत्यगात्म तत्त्वोपासनं विधाय शुद्धः पूतः पुण्यलोकोभवतीति लोकविशेषावच्छिन्न प्रकृतिवियुक्तत्व विशिष्टा त्मप्राप्तिलक्षणस्यो पासनफलस्याप्यभिधानात् । इत्थंच पंचाग्निविदां प्रकृतितन्मिश्रयोः प्राप्यतयोपासकत्वलक्षणप्रतीकालम्बनत्व विरहा दपुनरावृत्तिश्रवण मुख्यमेवोपपद्यते । हिरण्यगर्भलक्षणकार्य ब्रह्मोपासकस्यतु नामाद्युपासकवदेव प्रतीकालम्बनतायाः तत्क्रतु न्यायेन पुनरावृत्तेश्चा वर्जनीयतया नार्चिरादिना गतिर्युक्ता । पंचाग्निविदामपि ब्रह्मप्राप्तिश्रवणेपि पंचाग्निविद्भिः प्रकृतिवियुक्तत्वविशिष्टप्रत्यगात्मनः परब्रह्मोपासकैः परब्रह्मणश्च प्रधानप्राप्यतयो पासनेन तत्क्रतुन्यायेनैव प्राप्यभेदसिध्या प्रधानप्राप्यभेदनिबन्धन मुपासक भेदमभिप्रेत्य गतिशास्त्रे गन्तॄणां द्वेधाविभज्य निर्देशोपि सुसंगतो भवति। नचायं द्विधानिर्देश उपासनाकारभेदमात्रायत्ताधिकारिद्वैविध्यपर स्सुवचः, तथासति विद्यानामनेकविधत्वेना नेकविधत्वस्यैव गन्तॄणां वक्तव्यतया द्विविधत्वकथनासामंजस्यादिति। तस्मा द्बादरि जैमिनि पक्षावुभावपि दोषयुक्तावेवेति परंब्रह्मोपासीनान् प्रकृतिवियुक्तं प्रत्य

गात्मानं ब्रह्मात्मकतयोपासीनान् पञ्चाग्निविदश्च नय त्यातिवाहिकगण इत्येवांगीकार्यमिति ॥ ९९ ॥

पंचाग्निविद्यायां विहितस्य भूतसूक्ष्म संपरिष्वक्तप्रत्यगात्म कर्मानुगुण प्रकृतिमण्डल परवशबंभ्रम्यमाणत्वानुसन्धानस्य दोषदर्शनविधया वैतृष्ण्यजननार्थत्वादेव सूत्रकारेणापि शारीरकशास्त्रे प्रथमेनाध्यायद्वयेन मुमुक्षूपास्यं ब्रह्मस्वरूपं निरूप्य तदुप युपासकानां तदुपासनप्रवृत्तिहेतु प्राप्यवस्तुव्यतिरिक्तवैतृष्ण्य प्राप्यतृष्णा सिध्यर्थं दोषगुणपरामर्शपरयोः तृतीयाध्याय प्रथम द्वितीयपादयोः तदन्तरप्रतिपत्त्यधिकरणप्रभृति मुग्धाधिकरण पर्यन्त दोषपरामर्शपर ग्रन्थे प्रथमं पंचाग्निविद्योदित दर्शित जीवपरिभ्रमणविशेष एव विचारितः ॥१००॥

तदिदमुक्तं भाष्यकारैर प्युक्तदोषपरामर्शपर ग्रन्थ कृत्स्नतात्पर्यमनुभाषमाणै रुभयलिंगाधिकरण प्रथमसूत्रभाष्ये 'दोषदर्शना द्वैराग्योदयाय जीवस्या वस्थाविशेषा निरूपिता' इति ॥ १०१ ॥

पंचाग्निविद्योदिते तत्रतत्रसंचारि प्रकृतिमिश्रप्रत्यगात्मानुसन्धाने प्रकृत्यंशानुसन्धानं तस्यहेयतया त्याज्यत्वानुसन्धानरूपं, प्रत्यगात्मानुसन्धानंच तस्योपादेयतया प्राप्यत्वानुसन्धान रूपं, द्युलोकाद्यग्निपंचकाधिकरणकाहुतिपञ्चककर्मत्वलक्षणस्य तत्रतत्रसंचारित्वस्या नुसन्धानं च भयजननेन तत्परिहारार्थमितिच प्रस्फुटमेव भाषितंगीताभाष्येतरेव ॥ १०२ ॥

यथोक्तं तत्र 'अक्षरं ब्रह्मपरमं स्वभावोऽध्यात्ममुच्यते । भूतभावोद्भवकरो विसर्गः कर्मसंज्ञित' इति कैवल्यार्थि ज्ञातव्य विषयाष्टमाध्याय तृतीयश्लोकभाष्ये 'परममक्षरं - प्रकृतिविनिर्मुक्तात्मस्वरूपं, स्वभावोऽध्यात्ममुच्यते, स्वभावः–प्रकृतिः, अनात्मभूतमात्मनि संबध्यमानं भूतसूक्ष्मतद्वासनादिकं पंचाग्निविद्यायां ज्ञातव्यतयोदितम्, तदुभयं प्राप्यतया त्याज्यतयाच मुमुक्षुभिर्ज्ञातव्य' मिति, 'भूतभावो म-

नुष्यादिभावः, तदुद्भवकरोयो विसर्गः - पंचम्यामाहुतावापः पुरुषव चसो भवन्तीति श्रुतिसिद्धो योषित्सम्बन्धजः, सकर्मसंज्ञितः - त-च्चाखिलं सानुबन्ध मुद्वेजनीयतया परिहरणीयतयाच मुमुक्षुभिर्ज्ञातव्य ' मितिच ॥ १०३ ॥

अचित्संसर्गायत्त जरामरणादि सर्वावस्थामोक्षलक्षण कैवल्यार्थि तया गीतातद्भाष्ययोऽस्तत्र तत्र निर्दिश्यमानोधिकारी पंचाग्निविदेवेति-तूदाहृतश्लोक तद्भाष्याभ्यामेव सुव्यक्तम् ॥ १०४ ॥

इत्थंच – तद्यइत्थं विदु र्येचे मेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिष मभिसम्भवन्तीति छान्दोग्यश्रुतेः, ते य एव मेत द्विदु र्ये चामी अरण्ये श्रद्धां सत्य मुपासते तेऽर्चि रभिसम्भवन्तीति बृहदारण्यकश्रुते श्चैव मर्थो ऽनुसन्धेयः । ये – पूर्वोक्ताः पंचा-ग्निविदः, तत् - द्युलोकपर्जन्यपृथिवीपुरुषयोषारूपेषु पंच स्वग्निषु प्राणैः कर्मानुगुण्येन हूयमानं सोमभाव वर्षभावा न्नभाव रेतोभाव गर्भभावरूप दशापंचक मापद्यमानं भूतसूक्ष्मपंचकरूपा चिन्मिश्रं चिद्वस्तु, इत्थं हेयभुता चिद्रूपाविशेषणांशे त्याज्यतया तद्वियुक्ते शुद्धज्ञानानन्दमये तिरोधानविगमेन ब्रह्मात्मकतयापि भासमाने उ-पादेयभूतचिद्रूपविशेष्यांशे प्राप्यतयाच, विदुः –जानन्ति , येचेमे-तत्रतत्रोपनिषत्सु प्रसिद्धा ब्रह्मोपासकाश्च, अरण्ये - विविक्तप्रदेशे, तपः – परंब्रह्म , श्रद्धेति - श्रद्धयाऽधिगन्तव्यमिति , तदेव पु रुषार्थविधया प्राप्यमित्यध्यवसायपूर्वक तत्प्राप्तित्वरालक्षणां श्रद्धां कृ त्वा, तया तदेव प्राप्तव्यमिति मत्वेति यावत , उपासते - भ-क्तिरूपापन्नज्ञानेन विषयीकुर्वन्ति , ते – प्रकृतिवियुक्तं ब्रह्मात्मकं प्रत्यगात्मानं पुरुषार्थविधया प्राप्यत्वेनोपासीनाः पंचाग्निविदः पर मेव ब्रह्म तथोपासीना ब्रह्मनिष्ठाश्चेत्युभये, अर्चिषं – अर्चिरभिमानि नी मातिवाहिकदेवतां, अभिसंभवन्ति - प्राप्नुवन्तीति प्रथमश्रुते

रर्थः. द्वितीयश्रुतेरपि प्रथमश्रुतिघटकपदसमानार्थक पदभेदमात्रघटि ताया यथोक्तरीत्यैवार्थः, श्रद्धां सत्य मुपासत इत्यत्रापि, सत्यम् ब्रह्म, श्रद्धां – श्रद्धयाऽधिगन्तव्यम्, उपासते - पूर्वोक्तलक्षणां श्र द्धां कृत्वा तयाऽधिगन्तव्यत्वेनो पासत इति पूर्वोक्त एवार्थः पर्यवस्यति । अत्रोभयत्रापि श्रद्धाशब्द श्श्रद्धयाऽधिगन्तव्य औप चारिको द्रष्टव्यः । यद्वा- श्रद्धातप इत्युपासत इत्यत्र श्रद्धा तप इतीत्यन्त मुपासनक्रियाकर्मवाचि, तथाच श्रद्धेति श्रद्धासंज्ञं परब्रह्म प्राप्यत्वाध्यवसायपूर्वक तत्प्राप्तित्वरालक्षणं ज्ञानविशेषं, तप इति तपस्संज्ञं परं ब्रह्मच, उपासते - प्रीत्या समाश्रयन्त इ-त्यर्थः, श्रद्धां सत्य मुपासत इत्यत्रच श्रद्धां सत्यं चोपासतइ त्यर्थः, 'तपश्श्रद्धे ये ह्युपवसन्त्यरण्ये शान्ता विद्वांसो भैक्षचर्यां चरन्त : । सूर्यद्वारेण ते विरजाः प्रयान्ति यत्रामृत स्सपुरुषो ह्यव्ययात्मे ' ति मुण्डकोपनिषत्प्रथममुण्डकद्वितीयखण्डश्रुत्यैकार्थ्यात । योजनाद्वयेपि श्रद्धातप इत्युपासतइत्यत्र श्रद्धां सत्यमुपासत इत्य त्रच – परं ब्रह्म तदेकप्राप्यताध्यवसाय पूर्वक तत्प्राप्तित्वरालक्षण– श्रद्धापूर्वकमुपासीनाएव विवक्षिताभवन्तीति ॥ १०५ ॥

उपबृंहितंचैतच्छ्रुतिद्वयं याज्ञवल्क्येन निजस्मृतितृतीयाध्याये– " यएवमेनं जानन्ति येचारण्यकमाश्रिताः । उपासते तप स्सत्यं श्रद्धया परया युताः ॥ क्रमात्ते सम्भवन्त्यर्चि रहश्शुक्लं तथो– त्तरं । अयनं देवलोकंच सवितारं सवैद्युतं ॥ तत्र तत्पुरुषो दिव्योऽमानवो ब्रह्मलौकिकान् । करोति पुनरावृत्ति स्तेषामिह नविद्यत' इत्येवं रूपैर्व– चनैः ॥ १०६ ॥

अत्र तपस्सत्यमिति सामानाधिकरण्य प्रयोगेण छान्दोग्यगत– तपश्शब्द बृहदारण्यकगत सत्यशब्दयो रेकार्थकता, श्रद्धया परया

युता इत्यनेन दर्शितश्रुत्योः श्रद्धाग्रहणस्य ब्रह्मोपासने ब्रह्मणि-श्रद्धापूर्वकत्वप्रतिपादनपरत्वाच्च स्पष्टीकृता ॥ १०७ ॥

परमं योमहत्तप इति सहस्रनामपाठात् सत्यं ज्ञानमनन्तं ब्रह्मे त्यादिषु ब्रह्मणि सत्यशब्दश्रवणात स्ववाच्योपासकानां श्रूयमाणब्रह्मप्राप्त्यनुगुण्याच्च दर्शितश्रुतिगत तपस्सत्यशब्दयो र्ब्रह्म-परत्वम् ॥ १०८ ॥

एवं गीताशास्त्रे ऽ पुनरावृत्तिलक्षणा र्चिरादिपथगामितया निर्दिष्टानां द्विविधाधिकारिणां अक्षराव्यक्तशब्दित प्रत्यगात्मोपासके-भ्यः पंचाग्निविद्भ्यो ऽन्येषां श्रद्धापूर्वकं परमपुरुषोपासकत्वेन निर्देशा त्तादृश शास्त्रस्य दर्शितश्रुतिद्वयोपबृह्मणत्वाच्च पंचाग्निविदित रोपास्यविषयौ दर्शितश्रुतिगत तपस्सत्यशब्दौ परब्रह्मपरावश्यंभवितुमर्हतः ॥ १०९ ॥

तत्रहि द्वादशाध्याये दर्शितद्विविधाधिकारिस्वरूप परायां प्रथमादिसप्तश्लोक्यां 'एवं सततयुक्ता ये भक्ता स्त्वां पर्युपासते । येचा प्यक्षरमव्यक्तं तेषांके योगवित्तमा ' इति प्रथमश्लोके ऽ र्जुनप्रश्नपरे-त्वां पर्युपासत इति भगवदुपासकत्वेन, 'मय्यावेश्यमनोयेमां नित्ययुक्ता उपासते । श्रद्धया परयो पेता स्ते मे युक्ततमामता' इति तादृशप्रश्नसमाधानपरे द्वितीयश्लोके श्रद्धापूर्वक भगवदुपासकत्वेनच-पंचाग्निविदन्येषां निर्देशः कृतः ॥ ११० ॥

अस्मिन् शास्त्रे ऽ ष्टमाध्याये प्रागर्चिरादिपथगामितया निर्दिष्ट द्विविधाधिकार्यनुवाद परत्वात , श्रद्धया परयोपेता इत्यनेन श्र-द्धातपइत्युपासत इत्यादिमत्यभिज्ञापकत्वा च्चेयं सप्तश्लोकी दर्शित श्रु त्युक्त द्विविधाधिकारि परैवे त्यतो दर्शितश्रुतिगत तपस्सत्यशब्दौ गीताशास्त्रे भगवतैव परब्रह्मपरौ व्याख्यातौ भवतः ॥ १११ ॥

अत्र दर्शितद्विविधाधिकारिणां मध्ये पंचाग्निविदा मुपासनस्य ज्ञानयोगरूपत्वं ब्रह्मनिष्ठाना. मुपासनस्य भक्तिरूपत्वंच श्रुतिस्मृतिविवक्षितम् ॥ ११२ ॥

अतएव, 'श्रद्धातपइत्युपासते, श्रद्धां सत्यमुपासते, उपासते तप स्सत्यं श्रद्धया परया युताः, एवं सततयुक्ता ये भक्ता स्त्वां पर्युपासते, मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते। श्रद्धया परयोपेता इत्यादिश्रुतिस्मृतिभि र्ब्रह्मनिष्ठाना मुपासनस्य भक्तियोगरूपत्वं, 'तद्यइत्थं विदुः, ते यएवमेतद्विदुः, यएव मेनं जानन्ति, येचाप्यक्षरमव्यक्तम्, येत्वक्षरमनिर्देश्य मव्यक्तम् पर्युपासते। सर्वत्रग मचिन्त्यंच कूटस्थ मचलं ध्रुवम् ॥ सन्नियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः' इत्यादि श्रुतिस्मृतिभिः पंचाग्निविदा मुपासनस्य ज्ञानयोगरूपत्वं चावगम्यते ॥ ११३ ॥

अतएवच तत्तदधिकारिस्वरूपनिरूपणपरप्रकरणेषु पंचाग्निविदां ज्ञानयोगः ब्रह्मनिष्ठानां भक्तियोगश्च तत्रतत्राभिधीयते ॥ ११४ ॥

अत्र यद्यपि येचाप्यक्षरमव्यक्त मित्यत्र भक्ता स्त्वां पर्युपासत इत्यतः पर्युपासतइति पद मनुवर्तते, येत्वक्षरमित्यादिवचनेच तत्पदं स्वतएव तिष्ठति, तथापि तत्रत्यं पर्युपासतइतिपद मनुसन्दधत इत्येतावन्मात्रार्थकं, नतु भजन्तइत्यर्थकं, तद्य इत्थं विदुः, यएव मेनं जानन्तीत्यादिश्रुतिस्मृत्यैकार्थ्यात्, अन्यथा भक्ता स्त्वां पर्युपासत इत्यत्र भक्ता स्सन्तोभजन्त इति पौनरुक्त्येनानन्वयापत्तेश्च। किंच-स्वापेक्षयोत्कृष्टपूज्यविषयक प्रीतिरूपापन्नोपासनस्यैव भक्तिरूपत्वेन स्वात्मानुसन्धानरूपोपासनस्य भक्तिरूपत्वं न कथंचिदपि संभवति, तस्मा त्प्रोक्तस्थले पर्युपासत इति पदम् भक्तियोगार्थक मित्यनुसन्धेयम् ॥ ११५ ॥

इदं पुनरत्रावधेयम् । यद्यप्युदाहृतश्रुतिस्मृतिषु ब्रह्मनिष्ठो पासनविषये प्युपासतइति पदमेव दृश्यते , तच्च नावश्यं भक्तिरूपस्यैवोपासनस्य वाचकम् , तथाविधोपासनवाचकत्वनैयत्याभावस्या नुपदमेवोक्तत्वात् , प्रमाणांतरैककंठ्येन तस्येह तथात्वमिति चे त्पंचाग्निविदुपासनविषयशब्दस्यापि तत्सुवचम् , 'चतुर्विधा भजन्ते मां जना स्सुकृतिनोऽर्जुन । आर्तो जिज्ञासुरर्थार्थी ज्ञानीच भरतर्षभ ॥ ' इति भक्तियोगस्य चतुर्विधाधिकारिसाधारणताया गीतत्वात । तथापि श्रद्धादिपद सहकृत तादृशपदस्य श्रद्धापूर्वक ब्रह्मोपासक-वाचिनः भक्तिरूपोपासन वाचकता नैयत्यात दर्शितश्रुतिस्मृतिषु-ब्रह्मनिष्ठानां भक्तिरूपस्यैव ब्रह्मोपासनस्य सिद्धिर्निष्प्रत्यूहा, श्रद्धा-पूर्वकस्य ब्रह्मोपासनस्यहि भक्तिरूपता नियता, तत्तद्गुणानुसन्धा-नाद्यधीनया रुच्या कश्चित्पदार्थं स्वप्राप्यपुरुषार्थत्वेन परिगृह्य तदेकप्रियतया तद्विश्लेषासहिष्णो रचिरेण तत्प्राप्तये तत्साधनत्वेन विश्वासिते तदुपासनादौ यात्वरा तस्याएव श्रद्धा शब्दार्थत्वेन प्रकृते ब्रह्मनिष्ठ स्वशेषित्व निरस्तनिखिलदोषत्व समस्तकल्याणगुणाक-रत्वाद्यनुसन्धान जनित तदेकप्रियत्वाध्यवसाय तन्मूल तत्प्राप्तिविलम्बा सहिष्णुत्वाधीन साधनत्व विश्वासपूर्वक तत्प्राप्तिसाधनानुष्ठानत्वरा-पूर्वक तदुपासनस्यैव श्रद्धापूर्वकब्रह्मोपासनरूपताया अत्र विवक्षितत्वेन तदृशोपासनस्य शेषित्वाभिमत विषयक प्रीतिरूपोपासनत्वलक्षणं भक्तित्वं दुरपह्नवमेव । प्रकृतिवियुक्त प्रत्यगात्मोपासनस्य तु तन्नसम्भवति , प्रत्यगात्मन स्स्वात्मानं प्रति शेषित्वेनाभिमतत्वाभावात श्रद्धाया उक्तलक्षणप्राप्यत्वराधीन साधनत्वविश्वासपूर्वक तत्प्राप्ति साधना नुष्ठान त्वरा रूपत्वं भाष्यकारैरेव तत्र तत्रोच्यते ।

यथोक्तम् गीतासु सप्तदशाध्याय द्वितीयश्लोकभाष्ये 'यत्र रुचि स्तत्र-श्रद्धा जायते, श्रद्धाहि स्वाभिमतं साधयत्येतदिति विश्वासपूर्विका साधने त्वरेति'। षष्ठाध्यायान्तिमश्लोकेपि 'श्रद्धावान् भजते योमां स मे युक्ततमोमत' इत्युत्तरार्धभाष्ये 'श्रद्धावान्-अत्यर्थं मत्प्रियत्वेन क्षणमात्र विश्लेषासहतया मत्प्राप्तिप्रवृत्तौ त्वरावान्, योमां भजत' इत्युक्त्यापि श्रद्धाया उक्तरूपता व्यक्ता । ईदृशाविश्लेषासहिष्णुता लक्षण त्वरापूर्वक प्राप्यभूत शेष्युपासनस्य भक्तिरूपत्वादेवहि 'पुनर्विश्लेषभीरुत्वं परमाभक्ति रुच्यत'इति भक्तिस्वरूप निर्वचनमपि संगच्छते। पंचाग्निविदान्तु प्रत्यगात्मनएव पुरुषार्थतयाभिमतत्वेन ब्रह्मप्राप्त्युपायतया भगवद्भक्तियोगस्याभिमतत्वेपि ब्रह्मण्युक्तलक्षणश्रद्धापूर्वक ब्रह्मोपासकत्वं नास्त्येव, प्रकृतिवियुक्तप्रत्यगात्मन्येव तेषां तथाविध श्रद्धासम्भवात् । अतएवहि दर्शितश्रुतिस्मृतिषु श्रद्धापूर्वकब्रह्मोपासकत्वेन पंचाग्निविद्व्यावृत्ततया ब्रह्मनिष्ठानां निर्देशः श्रद्धातप इत्युपासते श्रद्धां सत्यमुपासतइत्यादिना क्रियते । भाष्यकारैरप्युक्तश्रुत्यादिषु श्रद्धापूर्वकब्रह्मोपासकत्वं पंचाग्निविद्व्यावृत्ततया भिप्रेतम्मत्वानैः तादृशश्रुत्यर्थं मनुवद्भि रनियमाधिकरण भाष्ये - यइत्थं विदुरिति पंचाग्निविद्यानिष्ठान् येचेमइत्यादिना श्रद्धापूर्वकं ब्रह्मोपासीनां श्चोद्दिश्या र्चिरादिका गति रुपदिश्यत इति तेनैव रूपेण पंचाग्निविद्व्यावृत्ततया ब्रह्मनिष्ठानां निर्देशः कृतः। गीता द्वादशाध्यायावतारिकाभाष्येपि 'अनन्तरमात्मप्राप्तिसाधनभुता दात्मोपासना द्भक्तिरूपस्य भगवदुपासनस्य स्वसाध्यनिष्पादने शैघ्र्यात्सुसुखोपादानत्वाच्च श्रैष्ठ्य' मित्यादिना भाष्यध्यायार्थं संग्रहेण प्रदर्शयद्भिः यथोक्तम् पंचाग्निविदुपासन ब्रह्मनिष्ठोपासनयो दर्शित-श्रुत्याद्यभिप्रेतं वैलक्षण्यं स्पष्टतरमेवाभाषि । तस्मा दुक्तोपासन-वैलक्षण्यं दुरपह्नवमेवेति ॥ ११६ ॥

उक्तश्रुतौ तद्य इत्थं विदुरित्यत्र ब्रह्मात्मकतया प्रत्यगात्मनो वेदनं विवक्षितम् – य आत्मनितिष्ठन्नात्मनोऽन्तरो यमात्मानवेद यस्यात्माशरीरं य आत्मानमन्तरो यमयतीत्यादि श्रुत्या प्रत्यगात्मनो ब्रह्मशरीरभूतत-या तदात्मकतयैव विद्यमानत्वा त्तिरोधानभूतप्रकृति वियुक्त शुद्ध प्र-त्यगात्मस्वरूप साक्षात्कारदशायां द्रव्यचाक्षुषे रूपोपलम्भावश्यम्भा वव दन्तर्यामिभूत परब्रह्मोपलम्भावश्यम्भावात् । तमेवं विदित्वाऽति मृत्युमेति नान्यः पन्था अयनायविद्यतइति श्रुत्या निश्शेषसंसार स-म्बन्धनिवृत्ति रूप मृत्युतरणस्य ब्रह्मप्राप्तेश्च ब्रह्मवेदनैक साध्यत्वा वगमेन तदावश्यकत्वा द्देशविशेषावच्छिन्न ब्रह्मप्राप्तिमन्तरेण निश्शे षाविद्यानिवृत्तिलक्षण प्रकृतिवियुक्तत्व विशिष्ट प्रत्यगात्मप्राप्तिरूप-पंचाग्निविद्यापुरुषार्थासिद्ध्यापत्त्या तदर्थं तादृशब्रह्मप्राप्ते रावश्यकत्वे-तत्क्रतुन्यायेना नुपासितस्य प्राप्तययोगेनापि तदुपासना वश्यक त्वाच्च ॥ ११७ ॥

तमिमं पंचाग्निविद्यायां ब्रह्मणोप्युपासनसद्भावं श्रुतिरेव न्या-यानुगृहीता सम्यगवगमयति ॥ ११८ ॥

'श्रद्धा तपइत्युपासते' 'श्रद्धां सत्यमुपासते' इत्यादिकाहि श्रु-तिः , सामान्य ब्रह्मोपासकत्वमात्रेण , तद्य इत्थं विदुः, ते य एवमेत द्विदुरिति पूर्वनिर्दिष्ट पंचाग्निविद्भ्यो ब्रह्मनिष्ठानां सम्यग्व्यावृत्त्यसिद्धि; मभिसन्धाय श्रद्धापूर्वकब्रह्मोपासकत्वेन तेभ्य स्तान् व्यावर्त्य प्रतिपा दयन्ती पंचाग्निविद्यायामपि ब्रह्मोपासन सद्भावमवगमय-त्येव ॥ ११९ ॥

एवं – स एनान् ब्रह्मगमयतीति पंचाग्निविदामपि ब्रह्मप्राप्तिं-प्रतिपादयन्ती श्रुतिरपि तत्क्रतुन्यायानुगृहीता तमवगमयति, अनुपा सितस्य ब्रह्मणः प्राप्तययोगात् ॥ १२० ॥

अपिच - एष देव पथो ब्रह्मपथ एतेन प्रतिपद्यमाना इम म्मानव-मावर्तं नावर्तंतेनावर्तन्ते , तेषु ब्रह्मलोकेषु पराः परावतो वसं-ति , तेषां न पुनरावृत्तिः,इत्यादिका अर्चिरादिमार्गगामिना मपुनरावृ-त्ति श्रुतिरपि योवा एतदक्षरं गार्ग्यविदित्वाऽस्मिन् लोके जु-होति यजते तपस्तप्यते बहूनि वर्षसहस्रा ण्यन्तवदेवास्य तद्भवती ति, योवा एतदक्षरं गार्ग्यविदित्वा ऽ स्माल्लोकात्प्रैति सकृपणो ऽथ-य एतदक्षरं गार्गिविदित्वा ऽ स्माल्लोकात्प्रैति स ब्राह्मणइति बृहदार ण्यक पंचमाध्यायाष्टम ब्राह्मणगत श्रुत्यैकार्थ्यानुगृहीता तमवगमय ति । अर्चिरादिगामितया श्रुतानां पंचाग्निविदां स्वविद्यायां ब्रह्मोपा सनाभावे ऽ न्तवत्फलत्वेन पुनरावृत्ते रवर्जनीयत्वेना पुनरावृत्ति श्रव णविरोधापत्तेः ॥ १२१ ॥

एवं गीतास्वप्यष्टमाध्याये , ऐश्वर्यार्थि पंचाग्निवि द्ब्रह्मनिष्ठानां-तत्रापि प्रथमानां पुनरावृत्तिमत्वेन , इतरेषा मपुनरावृत्तिमत्त्वेनच प्र-तिपादितानां पुनरावृत्त्यपुनरावृत्तियोग्य मार्गकथनावसरे, 'यत्र - काले त्वनावृत्ति मावृत्तिंचैव योगिनः । प्रयातायान्तितं कालं व-क्ष्यामि भरतर्षभ ॥ अग्निर्ज्योतिरहश्शुक्ल ष्षण्मासा उत्तरायणम् । तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जना' इत्यत्र , ब्रह्मविच्छब्दे न पंचाग्निविद्ब्रह्मनिष्ठाना मुभयेषां ग्रहणं कुर्वता भगवता यथोक्त रीत्या पंचाग्निविद्यायां ब्रह्मोपासन सद्भाव स्स्पष्टतरमभिहितः ॥१२२॥

तदिदं सर्वमभिप्रेत्यैव भाष्यकारै र्दर्शितगीताश्लोकद्वयावतारि-काभाष्ये , तद्य इत्थं विदुरिति श्रुते र्यथोक्तरीत्या अचिदंशस्य त्या ज्यत्वेन चिदंशस्य प्राप्यत्वेन चानुसन्धानपरत्वं, तत्रापि तत्क्रतु-न्यायानुग्रहीत ब्रह्मप्राप्त्यपुनरावृत्ति श्रवणबलेना चिद्वियुक्तस्यात्मवस्तु नो ब्रह्मात्मकत्वेनानुसन्धान परत्वंच, व्याख्यातम् ॥ १२३ ॥

समर्थितंचानयैव दिशा पंचाग्निविदां प्रकृतिवियुक्त ब्रह्मात्म कात्मानुसन्धायित्व मेतदधिकरण भाष्यदीपसारादिषु ॥ १२४ ॥

इत्थं पंचाग्निविदामपि स एनान् ब्रह्म गमयतीति श्रूयमाणब्रह्मप्राप्तिहेतु ब्रह्मोपासनस्य प्रमाणन्यायसंचाराभ्यां निष्प्रत्यूहं सिद्धेः, तत्क्रतुन्यायस्य प्रत्यक्षश्रुतिबलेन पंचाग्निविद्यायांपरं : बाधेन संकोचमभ्युपगम्या न्यत्राप्रतिहतप्रसरत्व वर्णनं इतरेषा मयुक्तमेवेति-भाष्यकाराशयः । बाधकत्वेनाभिमताया श्रुतेरेव श्रुत्यन्तरैकार्थ्यं मापन्नाया स्स्मृत्युपबृंहिताया न्यायानुगृहीतायाश्च यथोक्तरीत्या पंचाग्निविदामपि ब्रह्मोपासकत्वबोधकत्वात् ॥ १२५ ॥

नच 'एवं पंचाग्निविदामपि ब्रह्मप्राप्तिफल ब्रह्मोपासननिष्ठत्वे ब्रह्मनिष्ठाना ममीषांच कोविशेष' इति वाच्यम् । ब्रह्मनिष्ठानां पुरुषार्थविधया प्राप्यत्वलक्षणस्य परमप्राप्यत्वस्य परस्मिन् ब्रह्मणि पंचाग्निविदां तथाविधप्राप्यत्वस्य प्रत्यगात्मनिच स्वीकारेण वैलक्षण्य सिद्धेः । अन्यथोभयेषां विभज्य निर्देशासांगत्यापाताच्च ॥ १२६ ॥

किंच– पंचाग्निविदुपासने ब्रह्मणः ब्रह्मनिष्ठोपासने प्रत्यगात्मनश्च विषयत्वेपि तयो स्तत्राप्रधानत्वा यत्प्रधानं यदुपासनं तदेव तत्र कर्मतया निर्देष्टव्यम् प्राधान्यद्योतनाये त्याशयेनैव तद्यइत्थं विदु रित्यत्र पूर्वोक्तपरामर्शिना तच्छब्देन प्रत्यगात्मनो वेदनप्रधानकर्मतया 'श्रद्धातप इत्युपासते, श्रद्धां सत्य मुपासत' इत्यत्र तपस्सत्यशब्दाभ्यां परब्रह्मण उपासनप्रधानकर्मतयाच श्रुत्या निर्देशः क्रियते ॥ १२७ ॥

स्मरतिच भगवान् पाणिनिः 'कर्तुरीप्सिततमं कर्म' ति कर्तुः क्रियया प्राप्तु मिष्टतमस्यैव कारकस्य मुख्यकर्मत्वम् ॥ १२८ ॥

इत्थंच पंचाग्निविदामपि स्वोपासनेन ब्रह्मणः प्राप्तु मिष्टत्वेपि प्रत्यगात्मनएव प्राप्तुमिष्टतमत्वं, ब्रह्मनिष्ठानांच प्रत्यगात्मनोपि 'एक आत्मन श्शरीरेभावात्' 'आत्मेतितूपगच्छन्ति ग्राहयन्तिच' 'अविभागेन दृष्टत्वा' दित्यधिकरणेषू पास्य प्राप्य कोटि निविष्टताया निर्णीततया

स्वोपासनेन प्राप्तुमिष्टत्वेपि प्राप्तुमिष्टतमत्वं परस्यैव ब्रह्मणइति दुः रपह्नवमेव प्राप्यवैलक्षण्यम् ॥ १२९ ॥

तद्यइत्थं विदुः, ते यएव मेतद्विदुः, इत्यत्र श्रूयमाणपंचाग्नि विद्या प्रजापतिवाक्यादौश्रुत परविद्यांगभूत प्रत्यगात्मविद्यामात्ररूपा तु नकथंचिदपि निर्वोढुं शक्या। तथासति ब्रह्मनिष्ठानां पंचाग्नि वि दभिन्नतया पंचाग्निविदां गत्युपदेशेनैव तेषां तत्सिद्ध्या येचे- मेरण्ये श्रद्धातपइत्युपासते, येचेमेरण्ये श्रद्धां सत्य मुपासत इति ब्रह्मनिष्ठानां पृथग्गत्युपदेशवैयर्थ्यात् ॥ १३० ॥

पंचाग्निविद्यायाः परविद्यांगभूत प्रत्यगात्मविद्यामात्रत्वे तस्या स्सर्वब्रह्मविदां विदितत्वावश्यकतया पंचाग्निविद्या प्रकरणे प्रवाह णाख्येन जैवलिना पांचालराजेन गौतमंप्र त्युपदिश्यमानाया अस्या स्ततः पूर्वं केनापि ब्राह्मणेना विज्ञातत्वं क्षत्रियपरंपरयैव प्रवर्तमा न त्वंच तेनाऽभिधीयमान मनुपपन्नमेव भवेत्, कालत्रयेपि ब्राह्मणेष्वे व ब्रह्मविद्बाहुल्यश्रवणेन अंगिनिष्ठानां तेषा मंगसद्भावावश्यकतया पंचाग्निविद्या विज्ञानवैधुर्यासंभवात् ॥ १३१ ॥

श्रूयतेहि बृहदारण्यकाष्टमाध्याय द्वितीयब्राह्मणे 'यथेयं विद्ये- तः पूर्वं नकास्मिंश्चन ब्राह्मण उवास तां त्वहं तुभ्यं व क्ष्यामी' ति ॥ १३२ ॥

छान्दोग्येपि पंचमप्रपाठके तृतीयखण्डे 'यथेयं न प्राक्त्वत्तः पु- राविद्या ब्राह्मणान् गच्छति तस्मादु सर्वेषु लोकेषु क्षत्रस्यैव प्रशा सन मभूदिति ॥ १३३ ॥

अप्रतीकालम्बनानित्यत्र अप्रतीकोपासकानित्यनुक्त्वा उपासक पदस्थाने आलम्बनपद प्रयोगा त्प्राप्यतया प्रतीक मुद्दिश्योपासका स्स- र्वेएव प्रतीकालम्बनशब्देन गृह्यन्ते। प्राप्यतया प्रतीकोपासकत्वस्यै व प्रतीकालम्बनत्व रूपत्वात् ॥ १३४ ॥

इत्थंच प्राप्यबुध्या प्रतीकं प्रापकबुध्या अन्यश्चोपासीनाः, प्राप्यबुद्ध्याप्रापकबुध्याच प्रतीकमेवोपासीना श्चे, त्युभाय विथा अपि प्रतीकालंबनशब्देनगृहीताभवन्ति ॥ १२५ ॥

यदि पुनः प्रतीकोपासकपदमिहस्या त्तदा स्वरसतो ऽसंकोचेन प्राप्यतया प्रापकतयाच प्रतीकमुपासीनानामेव बोधस्स्यात् , तथा सति दृष्टयुपासकव्यतिरिक्ताना मर्वाचानैश्वर्यार्थिना मातिवाहिक नेयत्वनिषेधो नसंभवतीति तादृशपदोपेक्षा ॥ १२६ ॥

उपासन वाचिपदस्य सतिं बाधके प्राप्यतया प्रापकतयाच स्वसमभिव्याहृत कर्मवाचिपदार्थ गोचरोपासन परत्वमेवा संकोचन्यायेन स्वरससिद्धं ॥ १२७ ॥

अतएवोक्तं प्रतीकाधिकरणभाष्ये प्रतीकोपासनंहिनाम अब्रह्मणि ब्रह्मदृष्टयानुसन्धानमिति ॥ १२८ ॥

ब्रह्मदृष्टयानुसन्धानं चात्र ब्रह्मणः प्राप्यत्वेन प्रापकत्वेन चाभिसंहितस्य दृदयानुसन्धानरूपंस त्प्राप्यप्रापकविधया प्रतीकानुसन्धान रूपमेव पर्यवस्यति ॥१२९ ॥

अत्रत्य प्रतीकालंबनशब्दो दर्शितालम्बनपद स्वारस्य पर्यालोचनेनैव ब्रह्मदृष्टया स्वरूपेणच प्रतीकानुसन्धायिनां द्विविधानामपि प्रतिपादनपरो व्याख्यात एत दधिकरणभाष्यादिषु ॥ १४० ॥

यथोक्तं भाष्ये – येतु ब्रह्मकार्यान्तर्भूत नामादिकं वस्तु देवदत्तादिषु सिंह्मादिदृष्टिवत् ब्रह्मदृष्टया केवलंवा तत्तद्वस्तूपासते नतान्नयतीति , अचिन्मिश्रं केवलं वाऽचिद्वस्तु ब्रह्मदृष्टया तद्वियोगेन च यउपासते नतान्नयतीतिम्न ॥ १४१ ॥

दीपेप्युक्तम् – प्रतीकालंबनास्तु अचिन्मिश्रं केवलमचिद्वस्तु च सिंह्मदृष्टया देवदत्तवत ब्रह्मदृष्टया स्वरूपेणवा तद्वस्तु य उपासते त इति ॥ १४२ ॥

सारेप्यभिहितम् - अप्रतीकालम्बनाहि नामादिप्राणशब्दनिर्दिष्टप्रत्यगात्मपर्यंतं सर्वंचिदचिद्वस्तुजातं ब्रह्मदृष्ट्या स्वरूपेण वा य उपासते, प्रतीकालम्बना स्तद्व्यतिरिक्ता इति ॥१४३॥

अत्र सर्वत्र ब्रह्मदृष्ट्योपासनं पूर्वोक्तरीत्या प्राप्यप्रापकविषयोपासनरूपम् , स्वरूपेणोपासनंच प्राप्यविषयोपासनरूप, मिति बोध्यम् ॥ १४४ ॥

तथाच - प्रतीकालम्बनत्वेन हिरण्यगर्भलक्षण कार्योपासकस्यापि ग्रहणेन तस्या र्चिरादिगतिनिषेधसिध्या बादरिपक्षः , अप्रतीकालंबनत्वेन पंचाग्निविद् ब्रह्मनिष्ठोभयाविधोपासकग्रहणंकृत्वा तेषामर्चिरादि गति प्रतिपादनेन जैमिनिपक्ष श्च प्रत्याख्यातौ भवतः ॥ १४५ ॥

यद्यपीह बादरिपक्ष व्युदासार्थं हिरण्यगर्भोपासक मात्रस्या र्चिरादिगति निषेध्या- नत्वन्येषां प्रतीकालम्बनानां , तथापि अन्येषां प्रतीकालम्बनानामिव प्रतीकालम्बनताविशेषेणा स्यापि नार्चिरादिगतिरिति दृष्टान्तमुखेन व्युदसनार्थं प्रतीकालम्बनत्वेन सर्वग्रहणमिति बोध्यम् ॥ १४६ ॥

अथ-अंगं प्रतीकोवयवः इत्यादिकोशेनां गपर्यायः प्रतीकशब्दों गिस्थानीय प्राप्यादर्वाचीन प्राप्योपलक्षकः , यद्वा - बृहदारण्यके तृतीयाध्याय पंचमब्राह्मण प्रथमखण्डिकास्थस्य सोन्नमात्तिप्रतीकेनेतिमन्त्रखण्डस्यविवरणभूतेन तदीयद्वितीय खण्डिकास्थेन सोन्नमात्तिप्रतीकेनेति प्रतीकं मुखं मुखेनेत्येतादिति ब्राह्मणेन प्रतीकशब्दस्य मुखशब्देन द्वारपरतया व्याख्यानात, तथा तत्रैवाष्टमाध्याय द्वितीयब्राह्मण तृतीयखण्डिकायां इमइतिह प्रतीका न्युदाजहारेति प्रश्नप्रतिपत्तिद्वारभूत तत्परवर्णावळीपरतया : प्रतीकशब्द प्रयोगाच्च द्वारिस्थानीय-परब्रह्मलक्षणप्राप्य मुखस्थानीय तदर्वाचीन प्राप्योपलक्षको वा भवितुमर्हत्यसौ शब्दः , पक्षद्वयेपि परमप्राप्यादर्वाचीन प्राप्योपलक्षक एवायं भवति । इत्थंच प्रकृतिपुरुषपरब्रह्मलक्षण तत्त्वत्रये -

परमप्राप्यभूता त्परस्माद्ब्रह्मणो ऽर्वाचीन प्रकृतिवियुक्त प्रत्यगात्म त-त्त्वावलम्बिनां पंचाग्निविदां प्रतीकालम्बन शब्दा भिलपनीयानां कथ मप्रतीकालम्बनत्वमिति चे दिदमत्रावधेयम् । परमस्थान प्रकृतिवि-युक्त प्रत्यगात्मस्वरूप भगवत्स्वरूपाणां त्रयाणामपि परमप्राप्यत्वेनै केनैव प्रवृत्तिनिमित्तेन परमपदशब्दवाच्यताया वेदार्थसंग्रहे भाष्य कारैस्समर्थितत्वा त्प्रकृतिवियुक्त प्रत्यगात्मस्वरूपस्य परमप्राप्यत्वमेव सम्भवति न प्रतीकत्वं , यथोक्तं तत्र, 'एतदुक्तं भवति , क्वचित्परम स्थानं परमपदशब्देन प्रतिपाद्यते , क्वचित्प्रकृतिवियुक्तात्मस्वरूपं , क्वचिद्भगवत्स्वरूपंच . तद्विष्णोः परमं पदमिति परमस्थानं , सर्ग स्थित्यन्तकालेषु त्रिधैवं संप्रवर्तते । गुणप्रवृत्त्या परमं गुणं तस्या गुणं महदिति प्रकृतिविनिर्मुक्तात्मस्वरूपं , समस्तहेयरहितं वि-ष्ण्वाख्यं परमं पदमित्यत्र भगवत्स्वरूपं , त्रीण्यप्येतानि परमप्राप्य-त्वेन परमपदशब्देन प्रतिपाद्यन्ते, कथं त्रयाणां परमप्राप्यत्वमिति-चेत, भगवत्स्वरूपं परमप्राप्यत्वादेव परमपदशब्दवाच्यम्, इतरयो-रपि भगवत्प्राप्ति गर्भत्वादेव परमपदत्वं , सर्वकर्मविनिर्मुक्तात्मस्वरू-पं वाप्तिर्हि भगवत्प्राप्तिगर्भा , त इमेसत्याः कामा अनृता पि धा नाइति भगवतो गुणगणस्य तिरोधायकत्वेना नृतशब्देन स्वकर्मणः प्रतिपादना'दिति । अत्र भगवत्प्राप्तिं निमित्तीकृत्य-त्रयाणां परम प्राप्यत्वं प्रतिपादयतां भाष्यकृता मिदं तात्पर्यम् । यस्मिन् प्राप्ये प्राप्ते सर्वस्मात्परं तत्त्वं नप्राप्तंभवति, पश्चात्प्राप्तव्यतये-व चावशिष्यते, तदेवच प्रतीकशब्दवाच्य मर्वाचीन प्राप्यम् , य-स्मिन् प्राप्ते सर्वस्मात्परं तत्त्वं प्राप्तमेवभवति, पश्चात्प्राप्तव्यतया च नावशिष्यते, तत्परमप्राप्यमेव , अत्र भगवत्स्वरूपस्य स्वयं परतत्त्व रूपत्वेन तत्प्राप्तेः परतत्त्वप्राप्तिरूपत्वा त्तस्य स्वतएव परमप्राप्यत्वं, स्थानविशेष प्रकृतिवियुक्तात्मस्वरूपयो र्भगवत्स्वरूपतिरोधायकनिश्शेषा विद्यानिवृत्त्या प्राप्तिसमकालमेव भगवत्प्राप्तिनैयत्येन परमप्राप्यत्वसंभ-वति, एतदभिप्रायेणैवच त्रयाणां परमपदशब्दव्यपदेशः, नामादिपदा-

र्था स्साक्षा त्परब्रह्मप्राप्तिविधुर स्वप्राप्तिकत्वादेव प्रतीकशब्देन व्यवह्रियं त इति । इत्थञ्च ब्रह्मप्राप्तितदभावयोरेव परमप्राप्यत्व प्रतीकत्व-प्रयोजकत्वावगमा दचिद्वस्तु तन्मिश्रयोरेव प्रतीकता विश्राम्यति, तत्रैवाविद्यया ब्रह्मप्राप्ति प्रतिरोधात् । अतएव पूर्वोदाहृतभाष्यदीपसारग्रन्थे ष्वचिद्वस्तुतन्मिश्रोपासकविषयतयैव प्रतीकालम्बनशब्दो व्याख्यातः । प्रकृतिवियुक्तप्रत्यगात्मस्वरूपन्तु यथोक्तरीत्या ऽविद्याकृततिरोधान विगमेन ब्रह्मप्राप्तिगर्भ स्वप्राप्तिकत्वा त्परमप्राप्यमेव । अतएव - परमगतिपरमधामपरमपदादिशब्दैः प्रकृतिवियुक्तप्रत्यगात्मस्वरूपनिर्देश स्तत्रतत्रदृश्यते । त्रितय साधारणमिह विवक्षितम् परमप्राप्यत्वंच-स्व प्राप्त्युत्तरकालप्राप्तव्यस्वोत्कृष्टप्राप्यकभिन्नप्राप्यत्वं ,स्वप्राप्त्युत्तरकालप्राप्तव्यत्व स्वोत्कृष्टत्वोभयसम्बन्धावच्छिन्नाधेयतासम्बन्धेन प्राप्यविशिष्टान्यप्राप्यत्वपर्यवसितम् । उक्तसम्बन्धेन प्राप्यविशिष्टप्राप्यत्वरूप मर्वाचीन प्राप्यत्वमेव च प्रतीकपदप्रवृत्तिनिमित्तमिह विवक्षितं । परम्मायस्मात्तत् परमं – परमश्च तत प्राप्यंच परमप्राप्यमिति विग्रहे, परमशब्दघटक परशब्दस्य - उत्तरकालप्राप्तव्योत्कृष्टसमभिव्याहृतपदार्थतावच्छेदकावच्छिन्नपरतया, यस्मात्प्राप्ता दुत्तरकाल प्राप्तव्योत्कृष्टप्राप्यवस्तु नास्ति तादृशम् प्राप्य मित्यर्थसिद्ध्या परमप्राप्यशब्देन यथोक्तरूपावच्छिन्नो ऽर्थः पर्यवसानतोलभ्यत इति बोध्यम् । स्थानविशेष प्रकृतिवियुक्त प्रत्यगात्मस्वरूपयोः प्राप्तिदशायां परमात्मनोऽपि प्राप्ते रुत्तरकालप्राप्तव्यत्वाभावेन यथोक्तलक्षणं परमप्राप्यत्वं तयोस्सम्भवति । ईदृशमेवच परमप्राप्यत्वं दर्शितवेदार्थसंग्रहग्रन्थाभिप्रेतं । उत्कृष्टत्वंचात्रा नन्दहेतुत्वनिबन्धनं ग्राह्यम् । तेनान्यादृशोत्कृष्टत्वस्या न्यत्रसत्वेपि नक्षतिः । यद्वा-परान्महत् परममितिविग्रहे अपरत्वेनाभिमता स्कस्माच्चित्प्राप्या त्परत्वेनाभिमतं यत्प्राप्यं तस्मादुत्कृष्टप्राप्यम् परमप्राप्यशब्देन लभ्यते । इत्थंच अचित्स्वरूपप्राप्यात्परं यद चिन्मिश्रचित्स्वरूपं प्राप्यं, तस्मादुत्कृष्टत्वलक्षणं परमप्राप्यत्वं स्वो

त्कृष्ट प्राप्योत्कृष्टत्वसंबन्धेन प्राप्यविशिष्टप्राप्यत्वपर्यवसितं प्रकृतिवि-युक्तप्रत्यगात्मस्वरूप परमात्मलक्षण प्राप्यद्वयसाधारणं । पृषोदरादिव त्तत्दवयवलोपमाश्रित्य व्युत्पादनीयस्य परमशब्दस्य पूर्वोक्तव्युत्प-त्तिव देषापि व्युत्पत्ति स्संभवति । एषापि व्युत्पत्तिं र्भाष्यका-राभिमतैव । अतएव गीताष्टमाध्यायविंशैक विंशश्लोकभाष्ये भाषितम्, तन्मम, परमं धाम - परं नियमनस्थानम्, अचेतनप्रकृतिरेकं निय-मनस्थानं, तत्संसृष्टरूपाजीवप्रकृति र्द्वितीयं नियमनस्थानम्, अ-चित्संसर्गवियुक्तं स्वरूपेणावस्थितं मुक्तस्वरूपं परमं नियमनस्था-नमित्यर्थइति । अत्र प्रकृतिविनिर्मुक्त प्रत्यगात्मविषयस्य परमं धामे त्यस्य नियमनस्थानपर्वत्रये तृतीयपर्वस्थानरूपतां प्रकृतिवियुक्त प्र-त्यगात्मन उपपाद्य तत्परत्वोपपादना त्परमशब्दस्य परान्महदिति व्युत्पत्ति रेवाभिप्रेता । अन्यथा नियमनस्थानपर्वत्रय प्रदर्शना नावश्य-कत्वात् । एवं त्रयोदशाध्याय द्वाविंशश्लोकस्थ परमात्मशब्दव्याख्यान परभाष्यग्रन्थेन पंचदशाध्याय सप्तदशश्लोकस्थ परमात्मशब्दभाष्य ग्रन्थेनच परमशब्दस्येदृशव्युत्पत्तिरेवाभिमता ऽवगम्यते । तत्राप्य-र्वाचीनपरत्वद्वयप्रदर्शनात् । एवम् परमेव परममिति स्वार्थिकप्रत्य यान्तत्व माश्रित्य परमशब्दस्योत्कृष्टमात्र विषयताया अपि सुवच त्वा दपुनरावृत्तिहेतुत्व निबन्धनो त्कर्षशालि प्राप्यत्वेन दर्शितोभय-विषयः परमप्राप्यशब्दो भवितुं मर्हति । परमशब्दस्य दर्शित रीत्या केवलोत्कृष्टमात्रविषयतापि दर्शितगीताभाष्ये दर्शितधामशब्द स्य प्रकाशपरत्वकल्पे ऽभिप्रेता । यथोक्तम् तत्र, 'अथवा प्रकाश-वाची धामशब्दः, प्रकाशश्चेह ज्ञानमभिप्रेतम्, प्रकृतिसंसृष्टा त्परि च्छिन्नज्ञानरूपा दात्मनो ऽपरिच्छिन्नज्ञानरूपतया मुक्तस्वरूपं परमम् धामे' ति । अत्र परापरप्रकाशपर्वद्वयस्यैवा भिधाना त्परमशब्दस्योत्कृ ष्टमात्रविषयतैवाभिप्रेता । पूर्वकल्पाभिप्रेतव्युत्पत्ते रिहाप्यभिप्रेतत्वे अप रः प्रकाशः-परः प्रकाशः -परात्परः प्रकाशश्चेति - प्रकाशपर्वत्रयं

श्चाभिधातव्यम्, असंभावितमेवच परात्परप्रकाशस्वरूपत्वं प्रत्यगात्मनि, प्रकृतितत्त्वस्य प्रकाशरूपत्वाभावेना परप्रकाशपर्यवरूपत्वासंभवात। इत्थं परमप्राप्यत्वस्य विवक्षाभेदेन नानाविधस्य प्रकृतिवियुक्त प्रत्यगात्म परमात्मोभय साधारणस्य सम्भवेन परम प्राप्या दर्वाचीनत्व लक्षणम् प्रतीकत्वम् प्रकृतिवियुक्त प्रत्यगात्मव्यावृत्तमेव भवति। अतो न पंचाग्निविदः-प्रतीकालम्बनाभवन्ति। यद्वा - परमशब्दघटक परशब्दस्योत्कृष्टमात्र विषयत्त्वस्वीकारे परमप्राप्यशब्देन लभ्यमानं स्वोत्कृष्टत्वसम्बन्धावच्छिन्ना धेयतासम्बन्धेन प्राप्यविशिष्टान्यप्राप्यत्वपर्यवसन्नं परमप्राप्यत्वं परब्रह्मासाधारण मेवेह विवक्ष्यतां, उक्तलक्षण परमप्राप्यार्वाचीन प्राप्यत्वमेवच प्रतीकत्वमिह विवाक्षितं भवतु। तथापि नैते पंचाग्निविदः प्रतीकालम्बनकोटौ निविशन्ते। तथाहि। प्रतीकालम्बनत्वं नतावत्स्वप्राप्तिप्रयोजक स्वनिष्ठ विलक्षणविषयतानिरूपकत्वसंबन्धेन प्रतीक विशिष्टोपासनाश्रयत्वं। तथासति सर्वासु ब्रह्मविद्यासु प्रत्यगात्मनोपि ब्रह्मशरीरतयोपास्यताया मुक्तिदशायां तथैत प्राप्यतायाश्च - तृतीयाध्याय तृतीयपादैकविम्शाधिकरण तद्भाष्य चतुर्थाध्याय प्रथम पाद द्वितीयाधिकरण तद्भाष्य सिद्धत्वात। सर्वह पश्यःपश्यति सर्वमाप्नोति सर्वश इत्यादिश्रुत्या सर्वसाक्षात्कार सर्वप्राप्त्योर्मुक्तैश्वर्यतया श्रूयमाणत्वा तत्क्रतुन्यायेन प्राप्यस्योपास्यतायाः आवश्यकत्वाच्च सर्वेषां ब्रह्मविदां पक्षद्वयेपि प्रतीकालम्बनत्वापत्तेः। उक्तं हि - प्रथमाध्याय तृतीयपाद पंचमाधिकरण सप्तमसूत्रभाष्ये 'ब्रह्मप्रेप्सोर्हि जीवात्मनस्स्वरूपंच ज्ञातव्यमेव, स्वयमपि कल्याणगुणएवस न्ननवधिकातिशयासंख्येय कल्याणगुणगणं परंब्रह्मानुभविष्यतीति ब्रह्मोपासन फलान्तर्गतत्वात्स्वरूप याथात्म्यविज्ञानस्ये'ति। चतुर्थाध्याय चतुर्थपादषष्ठाधिकरण तृतीयसूत्रभाष्ये प्युक्तम्, 'निर्धूतनिखिलविकारं निखिलहेयप्रत्यनीक कल्याणैकतानं निरतिशयानन्दं परंब्रह्म सकलेतरं सत्यसङ्कल्पत्वादि गुण-

मनुभवति मुक्तः, तद्विभूत्यन्तर्गतत्वेन विकारवर्तिनांलोकानामपि मुक्तभोग्यत्व ' मिति । अपितु-ब्रह्मप्राप्त्यभाव विशिष्ट स्वप्राप्तिप्रयोजक स्वनिष्ठ विलक्षणविषयतानिरूपकत्वसंबन्धेन प्रतीकविशिष्टोपासना-श्रयत्वमेवेह विवक्षितं प्रतीकालम्बनत्वं । तदेकप्राप्तिप्रयोजक तन्निष्ठवि-लक्षणविषयता शाल्युपासनाश्रयत्वस्यैव तदालम्बनत्वरूपत्वात् । स्वप्राप्तौ ब्रह्मप्राप्त्यभाव वैशिष्ट्यंच समानकालिकत्व सामानाधिकरण्यो भय सम्ब न्धेन, ब्रह्मविदां मुक्तिदशायां ब्रह्मप्राप्तौ विद्यमानायामेव तदन्तःपातितया प्रतीकपदार्थप्राप्ते विद्यमानतया न प्रतीकालम्बनत्वं तेषामिति वक्तव्यं । इत्थंच परमात्म प्रकृतिवियुक्त प्रत्यगात्मो भय साधारण परमप्राप्यत्वप-क्ष परमात्मासाधारण परमप्राप्यत्वपक्षयो र्द्वयोरपि पंचाग्निविदामपि नप्रतीकालम्बनत्वप्रसंगः, ब्रह्मप्राप्तिगर्भाया एव प्रकृतिवियुक्तप्रत्यगा त्मप्राप्ते स्तदीयविद्याफलत्वात् , तदर्थमेव तदीयविद्याया स्तत्क्रतु-न्यायेन ब्रह्मात्मकत्वेन प्रकृतिवियुक्तप्रत्यगात्मोपासन रूपतया शि क्षणाच्च । प्रतीकालम्बनशब्दघटक प्रतीकशब्दस्य प्रकृतितन्मिश्रमात्र परतया व्याख्यानपरो दाहृत भाष्यादिग्रन्थ स्तदेतत्पक्षद्वयेपि संगतः । द्वितीयपक्षे प्रकृतिवियुक्तप्रत्यगात्मनोपि प्रतीकपदार्थान्तर्भावेपि त-त्प्राप्तिदशायां ब्रह्मप्राप्तिनैयत्येन ब्रह्मप्राप्त्यभावविशिष्ट तत्प्राप्तिप्रयो-जक तदुपासनाप्रसिद्ध्या ऽत्रत्यप्रतीकशब्दस्य तत्परत्वासम्भवेन तथा व्याख्यानोपपत्तेः । तथाच प्रकृतितत्त्वं तन्मिश्रंवा तदेकप्रा-प्यतयो पासीनाना मवान्तरपुरुषार्थ तारतम्यसद्भावेपि तदीयपुरुषा र्थस्य प्रकृतितत्त्वनिबन्धन पुरुषार्थकोटावेव निविष्टतया तादृशा-धिकारिविषयः प्रतीकालम्बनशब्दः प्रकृतितत्त्वनिबन्धन पुरुषार्थभू-तैश्वर्यार्थिविषयएव विश्राम्यति । तद्व्यतिरिक्तविषयो ऽप्रतीकाल-म्बनशब्दश्च तादृशपुरुषार्थविलक्षण प्रत्यगात्मतत्त्वनिबन्धन पुरुषा र्थभूत कैवल्यनिष्ठ पंचाग्निविदधिकारिविषयः, ततो ऽपि विलक्षणप रमात्मतत्त्वनिबन्धन पुरुषार्थभूत भगवत्प्राप्तिनिष्ठ परब्रह्मोपासकाधि-कारिविषयश्च विश्राम्यति । पंचाग्निविदां परब्रह्मोपासकानांच प्रा-

प्यनित्यत्वेना पुनरावृत्त्यर्हत्वेनैकोक्त्या ग्रहण मिह कृतम् । अतो न कथंचिदपि पंचाग्निविदां प्रतीकालम्बनताप्रसंग इति ॥ १४७ ॥

सू - ॥ १० ॥ विशेषंच दर्शयति ॥ ४ - ३ - १९ ॥

नामादिप्रतीकोपासकान् दृष्टान्तीकृत्य प्रतीकालम्बनत्वाविशेषेण हिरण्यगर्भलक्षण कार्यब्रह्मोपासकानाम प्यर्चिरादिगति तदधीनापुनरावृत्ति ब्रह्मप्राप्तिलक्षणफलाभाव स्समर्थितः प्राक् ॥ १४८ ॥

दृष्टान्ततया ऽभिमतानां नामादिप्रतीकोपासकानां तदभावो ऽसिद्ध इत्याशंकापरिहाराय तेषां तदभावं श्रुत्या दृढ़ीकर्तुं प्रवृत्तं दशमसूत्रम् ॥ १४९ ॥

अस्यार्थः-विशेषंच - नामादिप्रतीकोपासकाना मर्चिरादिगत्यपुनरावृत्ति ब्रह्मप्राप्ती विना तादृशगत्यनपेक्षपरिमितफलप्राप्तिलक्षणं विशेषंच, दर्शयति-प्रतिपादयति, श्रुतिरेवेति ॥ १५० ॥

अत्र विवक्षिता श्रुतिश्च छान्दोग्ये सप्तमप्रपाठके प्रथमखण्डे 'सयोनामब्रह्मेत्युपास्ते यावन्नाम्नोगतं तत्रास्य यथाकाम चारोभवती' त्यादि पंचमखण्डिकाप्रभृतिः, 'प्राणोह्येवैतानिसर्वाणि भवती' त्यादि पंचदशखण्ड स्चतुर्थखण्डिकान्ता, एवं, जातीयकास्थलान्तरास्थिताच ॥ १५१ ॥

अत्र नामादिगोचरमात्रे यथाकामसंचारादिलक्षण परिमितफल प्राप्तिरेव नामादिप्राणपर्यंतप्रतीकोपासकानां श्रूयते, नत्वपरिमित ब्रह्मप्राप्तिः ॥ १५२ ॥

यावच्छब्दादिना फलस्य परिमितत्वंहि स्पष्टीक्रियते ॥ १५३॥

यद्यपि प्राणलक्षणप्रतीकोपासनस्य परिच्छिन्नफलश्रवणं न स्पष्टतयोपलभ्यते, तथापि - 'प्राणोह्येवैतानिसर्वाणि भवती' त्यादिषु

एतच्छब्दनिर्दिष्ट प्राकृतसकलप्राणिलक्षणा चिन्मिश्रचित्तत्त्वरूपपरिमित फलप्राप्ति रवगम्यतएव ॥ १५४ ॥

'एषतुवा अतिवदति यस्सत्येनातिवदती ' त्यादि षोडशखण्ड श्रुत्या प्राणोपासकादपि सत्योपासकस्या तिवादित्वं प्रतिपादयन्त्यापि प्राणोपासकस्य परिमितफल भाक्त्व मेव गम्यते ॥ १५५ ॥

यद्यपि सत्यशब्दवाच्य भूमशब्दितपरब्रह्मोपासकस्यापि पंचविंशखण्डान्ते ऽनवधिकातिशयानन्द ब्रह्मानुभवसर्वलोककामचारादिलक्षणापरिमित फलप्राप्तिमात्रं श्रूयते, नार्चिरादिगतिः, तथापि सकल ब्रह्मविद्यानिष्ठानां तृतीयाध्याय तृतीयपादस्थे त्रयोदशे ऽ नियमाधिकरणे 'य एव मेतद्विदुर्येचामी अरण्येश्रद्धां सत्यमुपासते ते ऽर्चिषमभिसंभवती ' तिवाजसनेयकश्रुत्या, तद्यइत्थं विदुर्येचमेरण्ये श्रद्धातपइत्युपासतेतेर्चिषमभिसंभवतीति छान्दोग्यश्रुत्याचा र्चिरादिगत्या ब्रह्मप्राप्तिसमर्थनात , चतुर्थाध्याये तृतीयपादस्थे प्रथमेऽर्चिराद्यधिकरणे सर्वेषामपि ब्रह्मोपासकानां समानप्रकरणन्यायेना र्चिरादिलक्षणैकमार्गगामिता स्थापनाच्चे हापि तन्न्यायेन गतिस्सिध्यतीति नविरोध इतिबोध्यम् ॥ १५६ ॥

अयं भावः- अर्चिरादिगते र्ब्रह्मप्राप्तिफलनियततया श्रुतिभिःप्रतिपन्नतया तादृशगत्यनपेक्ष ब्रह्मप्राप्तीतरपरिमितफलानां प्रतीकालंबनानां नतादृशगतिस्संभवति । इत्थंचा व्यवधानेन ब्रह्मप्राप्तिरूपं फलमधिगंतु येऽधिकारिणः प्रस्थिताः, तानेवार्चिरादिरातिवाहिकगणोनयति, नहिरण्यगर्भोपासकं, तस्यापि प्राणरूपप्रतीकोपासक समशीलतया प्रतीकालंबनताया अवर्जनीयत्वादिति ॥ १५७ ॥

बादरिपक्षे चतुर्थपंचम सूत्रोदाहृत श्रुतिस्मृत्यो र्जैमिनिपक्षोक्तयैव दिशा निर्वाहो बादरायणस्या प्यभिमतो बोध्यः १५८॥

इदमत्र नवमादिद्विसूत्र्या निष्पन्नं बादरायणतात्पर्यं सर्वस्वं । हिरण्यगर्भलक्षणं कार्यब्रह्मोपासीनां स्तादृशं ब्रह्मनयत्यातिवाहिकगण इति बादरिपक्षो न युक्तः, ब्रह्मविद्याप्रकरणेष्वेव श्रूयमाणाया - अर्चिरादिगते स्साक्षात्परब्रह्मप्राप्ति हेतुतयैव तत्र श्रूयमाणत्वात् , क्लिष्टकल्पनादिभि स्तादृश श्रुत्यन्यथानयने प्रबलतरबीजाभवात् तादृशश्रुते :स्परब्रह्मविषयत्वे पराविद्याप्रकरण विरोधात् सर्वगतस्यापि ब्रह्मणः गतिशास्त्रबल सिद्धस्य देशविशेषएव निश्शेषाविद्यानिवृत्ति सम्भवस्य दुरपह्नवतया तं विना तत्प्राप्तेरयोगेन मार्गविशेषेण - देशविशेषगतिपूर्वकप्राप्ते रयुक्तत्वाभावाच्च । यथाहि प्रकृतिमण्डलएव क्वचित्पुण्यदेशे सत्त्वगुणोन्मेषः क्वचित्पापदेशे रजस्तमोगुणोन्मेषः स्वर्गादिषु क्वचित्सुखैकतानता नरकादिषु क्वचिद्दुःखैकतानताच लोकवेदसिद्धा नापलपितुं शक्या, तथैव सर्वगतेपि ब्रह्मणि - क्वचित्प्रदेशविशेषे जनानां :सर्वविकारहेतु गुणत्रयमय प्रकृतितत्वसंसर्ग तन्मूलाविद्यादि सकलदोषसंपत्तिः - क्वचित्प्रदेशविशेषे शुद्धसत्त्वतत्त्वसंसर्ग तन्मूलनिश्शेषाविद्यानिवृत्ति निरतिशयज्ञानविकासादि सम्पत्तिश्च नापलपितुं शक्यैवेति देशविशेषएव निश्शेषाविद्यानिवृत्ति वर्णनं :नासम्भवदुक्तिकम् । परब्रह्मासाधारण नित्यलोकाअपि - च श्रुतिस्मृत्यादिघुष्यमाणा न तर्कमात्रेणापलपितुं शक्याः, श्रौतेऽर्थे यथाश्रुतिप्रतिपत्तेरेव न्याय्यत्वात् अन्यथा शास्त्रैकप्रमाणस्य ब्रह्मणोपि तर्कबलेनापलाप प्रसंगाच्च , किम्बहुना ।- बादरिपक्षोपरि जैमिन्युपक्षिप्ता स्सर्वएव दोषा स्सर्वएव स्वपक्षसमाधयश्च सम्भवंत्येव । तस्मा त्परमव्योम विष्णुपदादिशब्दवाच्य :स्थानविशेषः, अर्चिरादिना तत्रगतस्यैवच निश्शेषाविद्यानिवृत्तिः , ब्रह्मप्राप्तिः, अपुनरावृत्तिश्चेति सर्वं प्रामाणिकमेव , अतो बादरिपक्षो ऽयुक्तएव । एवं परब्रह्मोपासकानेवा र्चिराद्यातिवाहिकगणो नयतीति जैमिनि

पक्षोप्ययुक्तः, प्रत्यगात्मोपासकानां पंचाग्निविदाम प्यर्चिरादि गति श्रुतेः, प्रत्यगात्मोपासकानां तत्क्रतुन्यायेन प्रत्यगात्मप्राप्तेरेव युक्तत्वेपि ब्रह्मप्राप्तिश्रवणान्यथा नुपपत्त्या तेनैव न्यायेन तेषां पुरुषार्थभूत प्रत्यगात्मप्राप्ते ब्रह्मप्राप्तिगर्भता, तदीयप्रत्यगात्मोपासनस्य ब्रह्मोपासनगर्भताच कल्प्यते, यथा ब्रह्मोपासकानां ब्रह्मप्राप्ति स्तच्छरीरतया प्रत्यगात्मप्राप्तिगर्भा, तदीयब्रह्मोपासनंच प्रत्यगात्मोपासनगर्भं । तृतीयाध्याय तृतीयपादस्थे शरीरे भावाधिकरणे द्वितीयसूत्रे प्रत्यगात्मनोपि मुक्तिदशायां प्राप्यता उपासनदशायां प्राप्याकारविशिष्टस्य तस्यानुसन्धेयताच सर्वब्रह्मोपासक साधारणी निरूपिता, चतुर्थाध्याय प्रथमपादस्थे द्वितीये आत्मत्वोपासनाधिकरणेपि स्वात्मानंप्र त्यात्मतयैव ब्रह्मण उपास्यता निर्णीता, चतुर्थाध्याय चतुर्थपादस्थे द्वितीये ऽविभागेन दृष्टत्वाधिकरणे मुक्तिदशायां परस्ता द्ब्रह्मण स्स्वात्मनो ऽविभागेन प्राप्यताच समर्थयिष्यते । अतो यथा ब्रह्मोपासकानां प्रत्यगात्मनः प्राप्ति रुपासनं चास्ति, तथा प्रत्यगात्मोपासकानामपि ब्रह्मप्राप्त्युपासने प्रत्यगात्मप्राप्त्युपासनान्तर्भूते स्तः। नचैवं सति सर्वेषां ब्रह्मोपासकाना मात्मप्राप्ति ब्रह्मप्राप्त्यो रविशिष्टत्वे परब्रह्मोपासकानेव नयतीति वदता जैमिनिना किमपराद्धम्, तत्पक्षादस्मिन् पक्षे कोपि हि विशेषो नोपलभ्यते, पंचाग्निविदोपिहि यथोक्तरीत्या ब्रह्मोपासके ष्वेवान्तर्भूता भवन्तीति वाच्यम् । उभयेषां सामान्यतो ब्रह्मप्राप्तिफल ब्रह्मोपासननिष्ठत्वतौल्येपि प्रत्यगात्मपरमात्मलक्षण प्राधान्याप्राधान्यव्यत्यासेन प्राप्यतारतम्यस्य दुरपह्नवत्वात् । ब्रह्मोपासकस्य हि ब्रह्मैव प्रधानं प्राप्यम्, प्रत्यगात्मस्वरूपंत्वप्रधानप्राप्यमेव । पंचाग्निविदस्तु प्रत्यगात्मस्वरूपमेव प्रधानप्राप्यम्, ब्रह्मत्वप्रधानप्राप्यमेव । अतः प्राप्यभेदो दुर्वारः । एतदुक्तं भवति । भोग्यभोगोपकरण भोगस्थानादिविधया नानाविधं प्राप्यमस्ति । तत्र भोग्यविधया प्राप्यत्वं प्रधानप्राप्यत्वं । तादितरविधया प्राप्यत्वंचाप्रधानप्राप्यत्वं । परस्य प्राप्यत्वं

ब्रह्मणः भोगस्थानविधया प्राप्यत्वन्तू भयाधिकारिसाधारणं । प्रकृतिमण्ड लोर्ध्वदेशावच्छिन्ने समन्ततः प्रदीप्तज्योतीरूपे परस्मिन्नेव ब्रह्मणि स्वस्वभोगप्रतिनियतावान्तरस्थानभेदे उभयेषां स्वस्वभोगानुभवात् ।

पंचाग्निविदामपि प्रकृतिवियुक्त प्रत्यगात्मलक्षणप्राप्यस्य प्रकृतिमण्ड ले प्राप्तु मशक्यस्य प्रकृतेः परस्तादेव प्राप्तव्यतया तत्रच ज्योती-रूपस्य परस्य ब्रह्मण स्समन्ततः प्रदीप्ततया तदेव भोगस्थानम् । तत्र ब्रह्मनिष्ठानां भोग्यविधया प्राप्यमपि परमेव ब्रह्म, पंचाग्निविदांतु प्रकृतिवियुक्तप्रत्यगात्मतत्त्वमेव, तथा प्रकृतिमण्डलोर्ध्वदेशाव·च्छिन्नस्य परस्य ब्रह्मणो भोगस्थानविधया प्राप्तिरेव चोभयविधा·धिकारिसाधारणी स एवान् ब्रह्म गमयतीत्यादिषु शास्त्रे ष्वमान-वायत्ता प्रतिपाद्यते । भोग्यविधया स्वाभिमतप्राप्यप्राप्तिस्तु स्वस्वोपास नस्वभावैकनिर्वाह्या । नामानदयत्नाङ्गिना । भोग्यविधया प्रा·प्तिर्नाम स्वादुतमतयानुभूयमान तत्तद्वस्तुसन्निकर्षविशेषलक्षण प्रधानतम प्राप्तिरेव । तादृशीचप्राप्तिः उपासनदशायां यस्यैवप्रधानप्राप्यतयो·पासनं तस्यैव-नान्यस्य, तत्क्रतुन्यायात् । लोकेपि स्वभावतोमधुरेष्व-पीक्षुक्षौद्रगुडादिषुवस्तुषु कस्मैचित्किंचिदेवरोचते, स्वस्ववासनानुगुणरुचिभेदवशाच्च तत्तत्पुरुष स्स्वस्वरुचिपरिगृहीतमेव वस्तु स्वादुतम·मनुभवति, नापरंमधुरतममपि वस्त्वनुभवितुं प्रवर्तते । तस्मात्प्रकृ-तिप्रत्यगात्मपरमात्मना मनुकूलत्व तारतम्येपि प्राथमिक स्वस्वरुचि भेदवशा दधिकारिणां तत्तत्परिग्रहोव्यवतिष्ठते । तथाचैश्वर्यार्थिनामीदृशं प्रधानतमप्राप्यत्व मचिद्वस्तुविशेषएवेति विलक्षणाचिद्वस्तुविशेषप्राप्ति·लक्षणमैश्वर्यमेव तेषां पुरुषार्थः, प्रकृतिवियुक्त प्रत्यगात्मोपासकानां पंचाग्निविदां प्रकृतिवियुक्तत्वलक्षण कैवल्य विशिष्टप्रत्यगात्मस्वरूप एव तादृशप्राप्यत्वमिति कैवल्यविशिष्ट प्रत्यगात्मस्वरूपप्राप्तिरेव ते·षां पुरुषार्थः, ब्रह्मनिष्ठानां भगवत्येव तादृशप्राप्यत्वमिति भगव-त्प्राप्तिरेव तेषां पुरुषार्थ, इत्युपासकानां सुकृततारतम्यायत्त तत्त्व-

विशेषविषयक प्राथमिकरुचिवैचित्री निबन्धनेयं पुरुषार्थवैचित्रीक्लृप्तिः । अल्पास्थिरत्वा ल्पस्थिरत्वा नन्तस्थिरत्वादिकं तत्तत्तत्वस्वभावानिबन्धनं । प्रकृतितत्त्वस्य क्षरणशीलतया गुणत्रयमयतयाच तत्प्राप्तिलक्षणस्यैश्वर्यपुरुषार्थस्यानित्यत्व मल्पत्वम् प्राप्यस्यानित्यतया तदर्थिनां पुनरावृत्तिश्च सम्भवति । प्रकृतिवियुक्तप्रत्यगात्मस्वरूपस्य नित्यतया तत्प्राप्तिलक्षणस्य कैवल्यपुरुषार्थस्य नित्यत्वम् प्रत्यगात्मनो ज्ञानानन्दमयतया प्रकृतितत्त्वा त्सुदूरव्यावृत्तत्वेपि परिच्छिन्नस्वरूपगुणतया भगवत स्सुदूरापकृष्टतया तत्प्राप्तिलक्षण परमानन्दा दल्पतमत्वं च सम्भवति । भगवच्छब्दितस्य परब्रह्मतत्वस्य त्रिविधपरिच्छेदरहितस्वरूपतया ऽ त्यद्भुतदिव्यरूपतया ऽ नवधिकातिशया सं ख्येयकल्याणगुणगणौघ महार्णवतया ऽ परिच्छिन्नोभय विभूत्यैश्वर्यसम्पन्नतयाच तत्प्राप्तिलक्षणस्य परमपुरुषार्थस्य स्थिरत्व मनन्तत्वंच सम्भवति । कैवल्यपुरुषार्थनिष्ठानां पंचाग्निविदां भगवत्प्राप्तिलक्षणपरमपुरुषार्थनिष्ठानां परब्रह्मनिष्ठानां चोभयेषां प्राप्यवस्तुस्थानादिनित्यतानिबन्धन मपुनरावृत्तित्वं त्वेकरूपमेव । अतएव चोभयेषा मपुनरावृत्तिहेतु रर्चिरादिलक्षणा गतिरेका श्रूयते । इत्थं तत्त्वत्रयस्वभाववैचित्रीवशेनैव तत्प्राप्तिलक्षण पुरुषार्थवैचित्रीसम्भवा त्पंचाग्निविदां ब्रह्मनिष्ठानाञ्च प्राप्यपुरुषार्थभेदो ऽ वश्यमेवाभ्युपेयः । अन्यथा सुदूरमपि गत्वा तद्यइत्थं विदु र्येचेमेरण्ये श्रद्धातप इत्युपासत इत्यादिश्रुत्या पंचाग्निविदः परब्रह्मोपासकांश्च विभज्य निर्दिश्या र्चिरादिगति ब्रह्म प्राप्त्यपुनरावृ त्त्युपदेशासांगत्यस्य परिहर्तु मशक्यत्वात । अस्या श्श्रुतेश्च परमप्राप्यभूतै कवस्तुपर्यवसाय्यगांगिभावापन्नोपासननिष्ठ द्विविधाधिकारिविषयत्वं वा कार्यब्रह्मान्तर्भूतभिन्नभिन्नद्विविधप्राप्यपर्यवसायि द्विविधोपासननिष्ठ द्विविधाधिकारिविषयत्वं वा नसम्भवतीति च प्रागेव निरूपितम् । प्राप्यपुरुषार्थभेदमन्तरेणोपासनाकारवैचित्रीमात्रेण तथोपदेश इत्यपिच नसुवचम् । तथा

सं त्यनेकासां ब्रह्मविद्यानां नानास्थानविशेषणादिभेदभिन्नात्यन्त विलक्षणाकाराणां श्रूयमाणतया तन्निष्ठानां भेदेनानुत्कीर्तनस्य पंचाग्निविदां परं भेदेनोत्कीर्तनस्य च कारणाभावात् । किंबहुना । पंचाग्नि विद्यायां प्रत्यगात्मस्वरूपमेव तत्तदाकारै रुपास्यतया निर्दिष्टं दृश्यते , ब्रह्मविद्यासुच ब्रह्मैवोपास्यतया निर्दिष्टं दृश्यत इति स्पष्टतरमेव वैलक्षण्यं दृश्यते । श्रुत्या तथा निर्देशश्च तयो स्तत्र प्रधानतयोपास्यत्वं प्राप्यत्वं चान्तरेणानुपपन्नः । पूर्वोक्तरीत्या दर्शित द्विविधाधिकारिविद्यासु प्रत्यगात्मपरब्रह्मोभय विषयकताया अवश्यं सत्त्वे प्येकैकस्मिन् प्रकरणे एकैकमात्रस्पष्टनिर्देशस्य तत्रतत्र तस्यतस्य प्राधान्येनो पास्यत्व प्राप्यत्वगमकत्वात् । नच तत्तत्प्राप्य वस्त्वनु भवगत स्वादुता तारतम्यस्य तत्तद्वस्तुगतानुकूलता तारतम्यनिबन्धनत्वा दुभयेषा माधिकारिणां प्रत्यगात्म परमात्म लक्षणोभयप्राप्तौ सत्या मुभयेषा मपि परब्रह्मणः प्राप्तिरेव प्रधानत या निष्पत्स्यते, न प्रत्यगात्मनः , परब्रह्मणएवा नुकूलता प्रकर्षवत्त्वेन तत्प्राप्ते रेव स्वादुतमतया ऽनुभवसम्भवात , अतः पंचाग्निविदां ब्रह्मविदां च नोक्तरीत्या पुरुषार्थतारतम्यं वक्तुम् शक्य मिति वाच्यम् । परस्य ब्रह्मण एकस्यैव स्वेच्छाप्रति नियत देशभेदेषु नानाविधविलक्षणानन्दहेतुपरिकरविशिष्टवेषेण तदविशिष्टवेषेणच नानाविधायाः प्राप्ते, स्सम्भवेन पुरुषार्थतारतम्यस्य सूपपादत्वात् । उपासनप्रीतम् परम् ब्रह्म ह्युपासकानातिवाहिक वर्त्मना प्रकृतिमण्डला त्परस्ता त्समन्ततः प्रदीप्तज्योतीरूपं स्वात्मानं प्रापय्य तादृशस्वात्मानि तत्र तत्र तत्तत्पुरुषार्थानुभव प्रतिनियतस्थानेषु तांस्तानुपासकां स्तत्सदुपासनानुगुण पुरुषार्थप्राप्तये यथार्ह स्वस्वशक्त्यैव प्रवर्तमानान् वा सूरिभिरभ्युद्गम्य नीयमानान् वा कृत्वा ततं पुरुषार्थं मसंकीर्णमेवानुभावयतीति नकश्चिद्विरोधः । परं ब्रह्म च प्रकृतेः परस्ता दतिरोहितं

समन्तत आकाशव त्प्रदीप्तमपि सर्वत्र नैकविधानंदहेतु परिकर-विशिष्टं वर्तते, अपितु - तत्तदुपासकोपासनानुगुण्येन तत्र तत्र-परस्परविलक्षणं नानाविध भोग्य भोगोपकरण भोगस्थानादिलक्षण नानापरिकरविशिष्टवेषेणं तादृशपरिकराविशिष्टवेषेणच प्रदीप्तं वर्तते । तादृशपरिकराविशिष्टवेषेण वर्तमान ब्रह्मप्रदेशविशेषे विलक्षणानदन्दहेतु परिकरविशेषविशिष्ट ब्रह्मप्राप्तिलक्षण परिपूर्ण ब्रह्मप्राप्त्यभावा न्मह्रतिनभसि खद्योतव त्परस्मिन् ब्रह्मणि स्वात्मानुभव प्रतिनियते तादृशप्रदेश विशेषे स्वाच्छन्द्येन प्रवर्तमानानां प्रकृतिवियुक्तस्वस्वरूपा पन्न प्रत्यगात्मनां स्वात्मानुभवानंदमात्रतृप्तत्वलक्षण कैवल्य मोक्षएव पुरुषार्थः, तादृशपरिकरविशेषविशिष्ट ब्रह्मप्रदेशविशेषे प्रवर्तमानानां परब्रह्मनिष्ठानांच परिपूर्ण ब्रह्मप्राप्ति लक्षण परम मोक्षएव पुरुषार्थ इति पुरुषार्थतारतम्यंहि सूपपादं, प्रकृतिमण्डलात्परस्ता त्समन्ततः प्रदीप्तस्यापि परस्य ब्रह्मणो नैकविधा प्राप्ति र्दृश्यते । नहिखल्वर्चिरादि मार्गेणगतानां परब्रह्मोपासकानामपि लोकविशेषप्राप्ति-र्लोकविशेषे प्रविष्टोन्मादक नगरोद्यानविमानक्रिडोद्देशविशेषादि प्राप्ति स्सकलेतरपदार्थविस्मारक निरवधिक सुखसन्दोहात्मकानुभव विशेषहेतु भगवद्दिव्यमंगळ विग्रह तच्चरणारविन्द तत्कटाक्ष पातादिप्राप्तिश्चैकरूपा संप्रतिपन्ना । तत्तद्वस्तुगतस्वाभाविकानुकूलत्वाकाराणां तारतम्यंहि स्वतस्सिद्धम् । नहि ब्रह्मस्वरूपगुणविग्रहादिगत मनुकूलतमत्वं विभूतिभूतेषु प्रकृत्यादिषु प्रामाणिकं । यथाच निश्शेषाविद्यानिवृत्ति र्देशविशेष कालविशेषादिसापेक्षा, तथैव तत्तद्वस्तुगतानुकूलत्वातिशयविषयकानुभव विशेषोपि स्थानविशेषतत्तद्वस्तुसन्निकर्षविशेषादिसापेक्ष एव । प्रकृतितत्त्वनिबन्धने श्वर्यपुरुषार्थार्थिनामपिहि प्रकृति तत्त्वस्य सर्वत्रैकत्वेपि न लोकविशेषप्राप्त्य-प्राप्त्योस्तुल्यरूपतादृष्टा । नहीं न्द्रलोक एव हिरण्यगर्भैश्वर्य प्राप्तिस्संभवति । तथाच, प्रकृतिमंडल ऐश्वर्यविशेषप्राप्ति र्यथा स्थानभेदसापे-

क्षा, तथा निश्शेषाविद्यानिवृत्तिदेशविशेषेपि पुरुषार्थभेद स्स्थानभेदो लोकभेदश्च सम्प्रतिपन्नएव । तस्माद्देशविशेषावच्छिन्ना तिरोहित ब्रह्म संयोगलक्षणाया स्स्वस्वाभिमतपुरुषार्थभोगाधार विपुलतरस्थानभूत-ब्रह्मप्राप्ते रमानवायत्तायाः पंचाग्निविद्ब्रह्मविदो रविशेषेण प्रतिपादनमात्रेण न तयोः पुरुषार्थभेदोऽपलपितुं शक्यः । यथोक्तलक्षण स्वानुतमानुभूयमान तत्तद्वस्तुविलक्षणप्राप्त्योरेव पार्थक्येन तयोः पुरुषार्थत्वसम्भवादिति । परस्य ब्रह्मणो भोगाधारस्थानरूपताच एवमेवैष-संप्रसादोऽस्माच्छरीरा त्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेनरूपेणाभि निष्पद्यते, स उत्तमः पुरुषः, स तत्र पर्येति जक्षत्क्रीडन् रममाण स्स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा नोपजनं स्मरन्निदं शरीर मिति छान्दोग्याष्टमप्रपाठक द्वादशखण्डगत द्वितीयतृतीयखण्डिकांशभूत श्रुतौ तत्रेति परब्रह्मणो भोगाधारस्थानतया निर्देशा त्सिद्धा । यथोक्तलक्षण विलक्षणात्मप्राप्तीच्छया ऽऽत्मोपासनकरणादेव पंचाग्निविद्यामात्मोपासकत्वेन व्यवहारः । उक्तलक्षणपरिपूर्ण ब्रह्मप्राप्तीच्छया ब्रह्मोपासनकरणादेवच ब्रह्मनिष्ठानां ब्रह्मोपासकत्वेन व्यवहारश्चोपपद्यते । अन्यथा तादृशव्यवहारभेदकाकारस्यैव दुर्वचत्वात् । प्राधान्येन तत्तदुपासीनेष्वेवहि तत्तदुपासकत्व व्यवहारोमुख्यः । अनयोः पुरुषार्थभेद तदनुभवस्थानभेदादिकंच श्रुति स्मृती तिहास पुराण भगवच्छास्त्रादिषु बहुधा प्रपंञ्चितं नापलपितुं शक्यम् प्रमाण परतन्त्रै रास्तिकाग्रेसरैः । अतः - परंब्रह्मोपासीनानेव नयत्यातिवाहिकगणइति जैमिनिपक्षोप्ययुक्तएव । तथाच परं ब्रह्मोपासीनान् प्रकृतिवियुक्तं प्रत्यगात्मानं ब्रह्मात्मक मुपासीनांश्च नय त्यातिवाहिक गण इति सिद्ध स्सिद्धान्तइति ॥ १५९ ॥

इदमत्र बोद्धव्यम् । अर्चिरादिगतिश्रुतयः कार्यब्रह्मोपासकमात्रविषयावा परब्रह्मोपासकमात्रविषया वा परब्रह्मोपासक प्रकृतिवियुक्त ब्रह्मात्मकप्रत्यगात्मोपासकं तदुभयविषयावेति त्रिशिरस्कविचारे तृतीयपक्षसिद्धान्त स्थापनपर मिदं कार्याधिकरणं ॥ १ ॥

परब्रह्मोपासकानां स्वप्राप्यस्य परस्य ब्रह्मण स्सर्वगतत्वेन तत्प्राप्तये क्वचिद्गमनानौचित्यात् अर्चिरादिमार्गं गन्तॄणां प्राप्यस्य बहुवचनान्तब्रह्मलोकशब्देन स्थूलवस्तुमय लोकविशेषादिरूपतया प्रतिपादनात परब्रह्मोपासकानां तथाविधवस्तुप्राप्त्ययोगात हिरण्यगर्भलक्षणकार्यब्रह्मोपासकानामेव तत्सम्भवाच्च हिरण्यगर्भलक्षणकार्यब्रह्मोपासकविषयैव गति श्रुतिरिति बादरि तात्पर्यनिष्कर्षः ॥ २ ॥

ब्रह्मशब्द मुख्यवृत्ति प्रमाणायोगात् तद्बलेन समानप्रकरणस्थ बहुवचनान्त ब्रह्मलोकशब्दस्य समानाधिकरणसमासतया ब्रह्मपरतासम्भवात् पाशाधिकरणन्यायेन बहुवचनार्थां विवक्षासम्भवात् परब्रह्मासाधारण लोकविशेषाणामपि मुक्तप्राप्यानां प्रामाणिकतया तद्विषयतया षष्ठीसमासस्यापि सम्भवात् ब्रह्मणस्सर्वगतत्वे प्यविद्यानिवृत्तिपूर्वक तत्प्राप्ते वर्णाश्रमधर्म शौचाचारकालविशेषादि सापेक्षत्वव देशविशेष सापेक्षताया अपि प्रमाणप्रतिपन्नाया दुरपह्नवत्वाच्छ्रौतेऽर्थे यथाश्रुत्यैव प्रतिपत्तव्यत्वाच्च परब्रह्मोपासक विषयैव गतिश्रुतिरिति जैमिनि तात्पर्यनिष्कर्षः ॥ ३ ॥

अनयो र्बादरिजैमिनिपक्षयोः तद्य इत्थं विदुर्येचमेरण्ये श्रद्धा तप इत्युपासतइत्यादिश्रुतौ अर्चिरादिपथगामिनां द्विधा विभज्य निर्देशः स एनान् ब्रह्म गमयतीति प्राप्यैक्य श्रवणेन कार्यब्रह्म परब्रह्मणो रेकविध प्राप्योपासकेष्वेव पूर्वापरभावापन्नांगांगि भूतोपासन पर्वद्वयनिष्ठ द्विविधाधिकारि तात्पर्यकतयावा उपासनाकार भेद मात्राधीन द्वैविध्यतात्पर्यकतयावा ऽगत्या नेयइत्येवा भिप्रेतम् ॥ ४ ॥

तद्य इत्थंविदुरित्यादि श्रुतेः पूर्वापरभावापन्नांगांगिभूतोपासननिष्ठ द्विविधाधिकारिपरत्वे तादृश द्विविधाधिकारिणा म्मध्ये एकविधाधिकारिणा मर्चिरादिगत्युपदेशमात्रेण द्विविधाधिकारिणामपि तत्सिद्ध्या द्विविधाधिकारिणां विभज्य निर्देशपूर्वक गत्युपदेश

स्य निरर्थकत्वात् उपासनाकार भेदमात्राधीन द्वैविध्याभिप्रायक त्वेच अनेकानां ब्रह्मविद्यानां विविध विचित्र नानास्थानाकार वि- शेषणादि भेदभिन्नानां सत्त्वेन तन्निष्ठान् पृथक्पृथग्भेदेना निर्दिश्य - पंचाग्निविद्यालक्षणैक विद्यानिष्ठान् परं पृथक् निर्दिश्य तेषा मर्चि रादिगत्युपदेशे कारणाभावा त्पंचाग्निविद्याया इतरपरविद्याभि स्तु ल्यप्राप्यकत्वे तासामिवास्याअपि येचेमेरण्ये श्रद्धातप इत्युपासत इ त्यनेनैव संग्रह सम्भवेन पृथक् निर्देशस्य कथंचिद - पि प्रयोजन वत्त्वासम्भावच्च दर्शित श्रुतेः सुदूरमपि गत्वा परस्परविभिन्नप्राप्योपास्यक विलक्षणविद्यानिष्ठ द्विविधाधिकारि वि- षयत्वस्यावश्याभ्युपगन्तव्यत्वात् , सएनान् ब्रह्मगमयतीति प्राप्यैक्य निर्देशस्य उभयसाधारणावान्तर प्राप्यैक्यविषयतयापि निर्वाहसम्भ- वाच्च तद्य इत्थं विदुरितिनिदिष्टाः पञ्चाग्निविदः कैवल्य पुरुषार्थ फलक प्रकृतिवियुक्त ब्रह्मात्मक प्रत्यगात्मोपासननिष्ठा एवाधिकारिणः , येचेमेरण्येश्रद्धातप इत्युपासत इति निर्दिष्टाः भगवत्प्राप्तिलक्षण परमपुरुषार्थफलकः परब्रह्मोपासननिष्ठा अधिकारिण इति स्वीकृत्य- तादृशद्विविधाधिकारिपरत्वमेवास्याश्श्रुते र्वाच्यमिति भगवतो बादरा- यणस्य तात्पर्यनिष्कर्षः ॥ ५ ॥

दर्शिता र्थानुगुण्येन दर्शिताधिकरणसूत्राभिप्रेतानुमानानां प्रयोगोऽ पि बोद्धव्य इति ॥ १६० ॥

इति श्री शारीरक मीमांसा महार्णवांतः पातिनि

श्रीशैलानन्तपूरुष श्रीरङ्गाचार्य विरचित कार्याधिकरणवादकल्लोले

सिद्धांतार्थाभिधान नामा

॥ प्रथमस्तरंगः ॥

श्रीः ।

कार्याधिकरणवाद शुद्धाशुद्धपत्रिका ।

पुटे	पङ्क्तौ	अशुद्धं	शुद्धं
१	८	तरो	वरो
	२०	गहो	वाहो
	११	देष	देव
	२१	द्रढे	द्रढि
२	१०	त्प्रास्य	त्प्राप्त्य
	१२	हाद	बौद
	१६	तद्रा	तत्रा
३	१	नरति	नयति
	३	समातं	समायातं
	१०	णैवश्च	णैवच
	१२	प्त्यर्थ	प्त्यर्थं
	१७	कार्य	कार्यं
	१९	भस्य	अस्य
	२३	जनश्या	जनया
	२५	कृश्श्न	कृत्स्न
	१६	प्रत्वाख्यास्थ	प्रत्याख्यास्थ
४	१	सर्ष	सर्व
	२१	यादरि	बादरि
	२३	तस्माका	तस्याका
५	२४	शतुर्मु	च्चतुर्मु
६	६	स्ये	स्य
	१४	मार्ग	मार्ग
	२५	त्वेये	त्येये
७	४	ह्रिरण्य	हिरण्य
	१२	रमृते	स्मृते
	१४	क्षोतः	चोऽतः
८	१५	विन्दती	विन्दन्ती
	१८	हिरणगर्भो	हिरण्यगर्भो
	२३	वत्र	तत्र

९	२५	त्वस्य	तस्य
१०	२	देशं	देश
	६	विन्दती	विन्दन्ती
	७	प्राप्यानां	प्राप्याणां
	१८	पंचम	पंचमे
११	३	भिप्रेतश्च	भिप्रेतस्य
	२२	विदुषोऽय	विदुषोऽप्य
१२	११	वृत	वृत्त
	२०	रोधोवि	रोधोऽवि
	२३	रूर्व्वमा	रूर्ध्वा
१४	१४	विषयणी	विषयिणी
१५	७	वैद्यतान्पुरुषोमा	वैद्युतात्पुरुषोऽमा
	२४	विशेषेव्यव	विशेषेऽव्यव
१६	११	श्रूयमान	श्रूयमाण
	१५	काय	कार्य
२२	९	स्वाभाविक	स्वाभाविक
	२६	तत्तद्वस्दु	तत्तद्वस्तु
२३	८	सर्ट	सर्व
२४	९	परब्रह्म	परब्रह्मा
	२८	अंचिर	अंचिरा
२५	१	चदुर्मु	चतुर्मु
	४	यद्ग	यद्
	८	तदूर्द्ध	तदूर्ध्व
	२०	कण्ठाश्च	ककण्ठाञ्च
२६	२२	प्रामत्वना	प्रामत्वेना
२८	१	ब्रह्मं	ब्रह्म
	१४	प्रप्त	प्राप्त
	१६	ब्रह्मो	ब्रह्मो
	२०	यप्त	यत्र
	२९	द्विदुये	द्विदुर्य
३०	२	प्रायके	प्रायिके
	११	प्रभृविमण्डलान्वः	प्रकृतिमण्डलान्तः
	१२	भावदन्दर्भा	भोपितदन्तर्भा

	२४	कार	कारि
	२५	विष	विष
३१	२	घटितव्या	घटयितव्या
३२	१३	पुनः ये पंचा	पुनः पंचा
	२३	प्राणै	शब्दितप्राणै
	२४	धस्येव	धस्यैव
३३	६	ग्रहणार्थम्	ग्रहाणार्थम्
३४	६	तद्रुपा	तद्रुपा
३५	११	मर्थो	माशगो
३६	२१	ब्रह्म	ब्राह्म
३७	१२	दार्थं	दार्थम्
	१४	विश्वासिते	विश्वासवासिते
	१९	तदृशो	तादृशो
४१	२	विवक्षि	विवक्षि
	२१	१२७	११७
४४	१८	१३३	१३२
४५	८	पदस्यसति	पदस्यासतिबाधके
	२०	सिद्धा	सिद्दा
	२४	सिद्ध	सिद्द
	३	१२५	१३५
	२२	१८१	१४१
४६	१३	ताविशेषेण	त्वाविशेषेण
४७	१०	परमंगुणम्	परमस्पदम्
	१६	पावामिहिभ	पावाभिर्भ
	२७	व्यपदशः	व्यपदेशः
४८	१४	प्राप्य	प्राप्य
४९	६	परं	परमं
	१६	परत्वद्वय	पर्वद्वय
५०	५०	विम्शा	जिशा
	२४	स्वरूप	स्वस्वरूप
५१	६	कालिकत्व	कालत्व
५४	१७	क्किकम्	क्तिकम्
५५	७	तस्या	तस्या

	९	पूर्वकप्राप्ते	पूर्वकमेवप्राप्ते
	१२	परस्ता	परस्मा
	२१	लक्षणप्राधान्य	लक्षणप्राप्यप्राधान्यः
५६	१२	यत्नादिना	यत्नादिसाध्या
५७	४	स्यनित्यत्व	स्यानित्यत्व
६०	७	सम्भवादिति	सम्भवात्
	१६	पप०२ते	पपद्यते
६१	७	प्रमाणा	प्रहाणा
	१४	तेऽर्थे यथाश्रुत्यै	तस्यार्थस्य यथाश्रुत्ये
	१६	चमे	चेमे
	१९	च्वेव	ष्वेव
	२५	तात्सिध्या	तत्सिध्या
६२	२	अनेकानां	अनेकासां

श्रीरस्तु ।

कार्याधिकरणवादः

(द्वितीय तृतीय तरंगौ ।)

श्रीपद्मपुरनिवासिना

श्रीशैलानन्तपुरुषवंश्येन

श्रीरंगाचार्येण विरचितः

श्रीकांची प्रतिवादिभयंकरं अनन्ताचार्येण परिशोधितः

श्रीसुदर्शनमुद्राक्षरशालाया

समुद्यत ।

॥ कांची ॥

१९०३.

इदानी मेतन्मूल्यम्– १ – ० – ०

श्रीः ।

श्रीमते रामानुजाय नमः ।

श्रीमदनन्तार्यमहागुरवे नमः ।

श्रीमते वरवरमुनये नमः ।

कार्याधिकरणवादे द्वितीयस्तरंगः ।

अथात्रसर्वतन्त्र स्वतन्त्र कवितार्किकसिंह वेदान्ताचार्यपक्षः प्रमाण प्राचीनसम्प्रदाया ननुगुणइति प्रतिपाद्यते ॥१॥

अयन्तावदाचार्यो वेङ्कटनाथार्यनामा विश्वामित्रगोत्रोद्भवो भगवद्रामानुजमुनिना निष्कंटकीकृते प्राचीनएव सुसमीचीने परमवैदिकसिद्धान्ते प्राचीनविजातीय मभिनवं कंचनपन्थानं स्वय मुत्प्रेक्ष्य तस्मिन् स्वयं प्रवृत्तस्स्वपाण्डित्य महिमाडम्बरलम्भित विस्रंभांश्च जनां स्तत्रप्रवर्तयं स्तेषांस्वोत्प्रेक्षितेनपथा वेदान्तार्थप्रवचन प्राचुर्य प्रथित वेदान्ताचार्यसंज्ञः- स्वाश्रितानामयमेव भगवद्रामानुजमुन्यभिमतः पन्था इतिच बोधंसंजनयन्नस्मिन् सिद्धान्ते काश्चिद्वैयाकुलीमापादयामास ॥२॥

अपिचायं प्रायशस्सर्वत्रैव स्वोत्प्रेक्षितेन स्वतन्त्रेणैव वर्त्मना सञ्चारेण सर्वतन्त्रस्वतन्त्रइति-स्वोत्प्रेक्षितवर्त्मानुगुण ग्रन्थप्रथन तदनुकूल तर्ककौशल तन्मूलप्रतिपक्ष प्रतिक्षेपप्रवृत्तिभिः कवितार्किकसिंह इतिच समगीयत ॥ ३ ॥

तेन विरचिता प्रकृताधिकरणार्थ वैयाकुली तावदिह परिह्रियते॥४॥

इदं तावदत्र वेदान्ताचार्यमतं । कैवल्यंनमुक्तिः । तन्निष्ठाश्चप्रतीकालम्बना एव । नच तेषामपुनरावृत्तिः । अस्तुवाकथंचिदपुनरावृत्तिः । तथापि न निश्शेषप्रकृतिसम्बन्ध निवृत्तिरेतेषां सम्भवति । अवर्जनीयैवच कथंचिदपि सूक्ष्मतमप्रकृतिसम्बन्धानुवृत्तिरेषां । नच तेषा मर्चिरादिगतिः । नापिचप्रकृतेः परस्तात्फलानुभवस्थानं । पंचाग्निविद्य अहानिष्ठेष्वेवान्यतमः कश्चित् । सचोक्तकेवलादन्य एवेति॥५॥

एवं भूतंचैतन्मतं तत्प्रणीतरहस्यत्रयसार तात्पर्यचन्द्रिका न्याय सिद्धाञ्जनादिषु व्यक्तं ॥६॥

इमा स्तावदत्र वेदान्ताचार्यतदनुबन्धिनां सिद्धान्तिनांच दशविधा विप्रतिपत्तयोभवन्ति ॥ आत्मानुभव लक्षण कैवल्याख्य पुरुषार्थोनश्वरोवा नित्योवा ॥१॥ मार्गान्तरगामि गम्योवा -अर्चिरादिमार्गगामि गम्योवा ॥२॥ निश्शेषप्रकृतिसंसर्ग निवृत्तिलक्षण मोक्षानात्मकोवा- तादृशमोक्षात्मकोवा ॥३॥ तस्यसूक्ष्मतमप्रकृति संसर्गगर्भत्व मुपगम्यैव कथंचिन्नित्यत्व मुपपाद यितुं शक्यंवा नवा ॥ ४॥ तदनुभवस्थानं प्रकृतिमण्डलान्तःपातिनश्वरंवा तद्बहिर्भूतं नित्यंवा ॥५ ॥ पंचाग्निविद्या निष्ठादन्यः कैवल्यनिष्ठोनाम कश्चि दधिकारी प्रामाणिकोवा - सएवसवा ॥६॥ पंचाग्निविद्या निष्ठस्य प्रकृति मण्डलान्तः पाति स्थानानुभाव्यमात्म प्राप्तिफलमेकं- तद्बहिर्भूत स्थानानु भाव्यं ब्रह्मप्राप्तिलक्षणं फलमपरंचेति पौर्वापर्यानुभाव्यं फलद्वयंप्रामाणिकंवा नवा॥७॥ पंचाग्नि विद्यानिष्ठ ब्रह्मनिष्ठयोः परमंफलं तुल्यशीलंवा नवा ॥८॥ प्रकृतिमण्डलादूर्ध्वदेशे पुरुषार्थभेदोऽ प्रामाणिकोवा-प्रामाणिकोवा ॥९॥ तत्क्रतुन्यायो ऽयोगव्यवच्छेदपरोवा - अन्ययोगव्यवच्छेदप रोवा ॥ १०॥ इति ॥७॥

अत्रसर्वासु विप्रतिपत्तिषु पूर्वाकक्ष्या वेदान्ताचार्य तदनुबन्धिना मुत्तरकलार्यसंज्ञानां, उत्तरातुलोकाचार्य तदनुबन्धिनां दक्षिणकलार्य संज्ञानामिति विवेकोबोध्यः ॥८॥

अत्र सर्वत्र पूर्वा पूर्वपक्षिणां कक्ष्या साम्प्रदायिक सर्वपूर्वाचार्य श्री सूक्ति श्रुतिस्मृत्यादि प्रमाणजातशारीरक शास्त्रन्यायविरुद्धा, नापिच समीचीनन्यायमूले त्युत्तरासिद्धान्तिकक्ष्यैव सर्वतस्साधीयसी ॥९॥

इति श्री शारीरकमीमांसा महार्णवान्तःपातिनि श्रीशैलानन्तपूरुष श्रीरंगाचार्यविरचित कार्याधिकरणवाद कल्लोले वादिप्रति वादि विप्रतिपत्ति विभागनामा द्वितीय स्तरंगः ॥२॥

श्रीः

अथ तृतीयस्तरंगः ।

अथात्मानुभवलक्षण कैवल्याख्यपुरुषार्थो नश्वरोवा नित्यो वेति प्रथमविप्रतिपत्ति र्विचार्यते ॥ १ ॥

अत्र पूर्वपक्षिणो मन्यन्ते । कैवल्याख्यपुरुषार्थो नश्वर एव, "सर्वे च्यवनधर्माणः प्रतिबुद्धस्तु मोक्षभागि" ति मोक्षधर्मवचनेन प्रतिबुद्धेतरेषां सर्वेषा मनित्यपुरुषार्थत्वावगमात् । "जिज्ञासु र्लभते भक्ति" मिति मोक्षधर्मवचनेन जिज्ञासुशब्दितस्य कैवल्यनिष्ठस्य स्वप्राप्य पुरुषार्थप्राप्त्यनन्तरं क्रमेण भगवत्प्राप्तिहेतुभक्तियोगलाभाभिधानेन कैवल्यपुरुषार्थस्य नित्यत्वे तदुत्तरपुरुषार्थान्तर प्रवृत्त्ययोगात् । भगवत्परांकुशादिव्यसूरिणापि श्रीमुखसूक्ताख्य द्राविडब्रह्मसंहितायां प्रथमकाण्डद्वितीय श्रीमुखसूक्तपंचमगाथायां कैवल्यपुरुषार्थनिर्देशानन्तरं भगवत्प्राप्तिरूपपुरुषार्थस्य नित्यत्वाभिधानेन तद्व्यवच्छेद्यतया ऽभिप्रेतस्य कैवल्यस्यानित्यताया एवाभिव्यञ्जितत्वाच्चेति ॥ २ ॥

यथोक्तं तै रहस्यत्रयसारैकोनत्रिंशचरमश्लोकाधिकारे मोक्षयिष्यामीति पदव्याख्यानभागे – "केवलात्मानुभवो नित्यो नेत्यंश स्साक्षान्मोक्षो नेत्यंशश्च – "चतुर्विधा मम जना भक्ता एवहि ते श्रुताः । तेषा मेकान्तिनः श्रेष्ठा स्तेचैवानन्यदेवताः ॥ अहमेव गति स्तेषां निराशीः कर्मकारिणाम् । येतु शिष्टा स्त्रयो भक्ताः फलकामाहि ते मताः ॥ सर्वे च्यवनधर्माणः प्रतिबुद्धस्तु मोक्षभागि" ति वचनेन सिद्धः ॥ १ ॥ "मुच्येतार्त स्तथारोगा च्छुत्वेमामादितः कथाम् । जिज्ञासु र्लभते भक्तिं भक्तो भक्तगतिं लभे" दित्युक्त्या श्रीगीतायां जिज्ञासु रित्युक्त आत्मनिष्ठोपि क्रमेण ज्ञानीभवे दित्युक्तं भवति ॥२॥

श्रीमुखसूक्ताख्यद्राविडब्रह्मसंहितायां प्रथमकाण्डद्वितीय श्रीमुखसूक्त पंचमगाधायां भगवदनुभवस्य नित्यत्वाभिधानेना प्येतद्व्यवच्छेद्य आत्ममात्रानुभवो नित्यो नेत्यंशो व्यंजितः ॥ ३ ॥ अस्य – षष्ठकाण्ड नवमश्रीमुखसूक्तदशमगाधादिषु नाशराहित्योक्तिरपि चातुर्मास्यादि कर्मफलविशेषेष्वक्षय्यत्वोक्तिवदतिचिरकालस्थायित्वाभिप्राये"ति ॥ २ ॥

एवं स्तोत्रभाष्ये चतुर्थश्लोकव्याख्याने प्युक्तं – "भोगइह स्वर्ग स्वाराज्यादि सुखानुभवःस्वात्मानंदानुभवश्च ॥ १ ॥ तस्मिन् मुक्तिश-ब्दं केचिदुपचरन्ति ।२। नहि नित्यं किंचित्स्वात्मानंदमात्रानुभव रूपं कैवल्य मस्ति।" "चतुर्विधा ममजना भक्ताएव हि ते श्रुताः । ते-षामेकान्तिनः श्रेष्ठा स्तेचैवानन्यदेवताः । अहमेव गति स्तेषां नि-राशीः कर्मकारिणां। येतु शिष्टा स्त्रयोभक्ताः फलकामाहितेमताः । सर्वे च्यवनधर्माणः प्रतिबुद्धस्तु मोक्षभा गि" ति विशेषणा दिति ॥४॥

एष तावत्प्रथमाविप्रतिपत्तौ पूर्वपक्षयभिमतः पूर्वः पक्षः ॥ ५ ॥

अथात्र सिद्धान्त्यभिमत उत्तरः पक्ष उच्यते ॥ ६ ॥

श्रुत्यादिप्रमाण दिव्यसूरिमुखाविर्भूत द्राविडवेदतदंगोपांगपूर्वा-चार्य श्रीसूक्तिभि र्न्यायतश्च कैवल्यपुरुषार्थस्य नित्यत्वमेवावगम्यत इति तस्य नश्वरत्वकथन मयुक्तमेव ॥ ७ ॥

उदाहृतमोक्षधर्मवचन श्रीपरांकुशदिव्यसूरि गाधयोः कैवल्य-स्या नित्यत्वपरतालेशोपि न विद्यते, प्रत्युत नित्यत्वपरत्व-मेवास्ती त्येतदुत्तरत्र स्वावसरे निपुणतर मुपपादयिष्यामः ॥ ८ ॥

शास्त्रेषुसर्वत्रैश्वर्यकैवल्य भगवत्प्राप्तिरूप पुरुषार्थाधिकारिवर्गत्रैविध्यं प्रतिपाद्यतत्रैश्वर्यपुरुषाथाधिकारिवर्गस्यधूमादिगत्यापुनरावृत्तिलक्षणानित्य फलगामितायाः कैवल्यभगवत्प्राप्त्यर्थिनो रितरयो वर्गयो रर्चिरादिमार्गेणा पुनरावृत्तिलक्षण नित्यफलगामितायाश्च स्फुटतरं प्रतिपादनेन न कैवल्यस्या

नित्यपुरुषार्थरूपता कथंचिदपि सुवचा; तथासति कैवल्यार्थिना मैश्वर्यार्थि वर्ग एवांतर्भावनीयतया तद्बहिर्भूतत्वाभिप्रायक पृथङ्निर्देशायोगाच्च ॥९॥

यदि पुनः कैवल्यमपि पुनरावृत्तिलक्षणानित्यफलमेव स्यात्तदेद-मप्यैश्वर्यपुरुषार्थएवा न्तर्भूतं स्यादिति श्रीगीता सप्तमाध्याय षोडश श्लोकभाष्ये - " आर्तः प्रतिष्ठाहीनो भ्रष्टैश्वर्यः पुनस्तत्प्राप्तिकामः । अर्थार्थी - अप्राप्तैश्वर्यतयैश्वर्यकामः । तयो र्मुखभेदमात्र मैश्वर्यविषय तयैक्या देकएवाधिकारः" इति द्विविधावप्यार्तार्थार्थि रूपैश्वर्यार्थिना वेकस्मिन् वर्गेन्तर्भावयता भाष्यकारेण जिज्ञासुशब्दितः कैवल्या-र्थ्यपि तत्रैव वर्गे ऽन्तर्भाव्येत ॥ १० ॥

नच तथान्तर्भावितः ॥ ११ ॥

प्रत्युता पुनरावृत्तिलक्षण नित्यफलाधिकारि मुमुक्षुत्वसाम्या ज्ज्ञानिजिज्ञास्वो रेकरूपेण संगृह्य निर्देशः क्वचिक्रियते ॥ १२ ॥

प्रदर्शयिष्यते चेदृशो निर्देश उपरिष्टाद्यथा वसरम् ॥ १३ ॥

तस्मा त्कैवल्यार्थिनो ऽ नित्यफलभूतैश्वर्य पुरुषार्थार्थिवर्ग बहिर्भू तत्वा त्कैवल्यस्य नित्यपुरुषार्थरूपता दुरपह्नवा ॥ १४

एतेन प्राक्चतुर्थवाक्योदाहृत स्तोत्रभाष्यग्रन्थे - भोगइह स्वर्ग स्वाराज्यादिसुखानुभव स्स्वात्मानन्दानुभवश्चेति कैवल्यस्यै श्वर्यपुरु षार्थान्तर्भूतत्वाभिमानि स्वाभिप्रायानुरोधेन भोगशब्दार्थतया व्या-ख्यानं पूर्वपक्षिणां स्वोत्प्रेक्षामात्र विजृम्भितमेवेति वेदितव्यं, पूर्व-व्याख्यातृभिः कैवल्यस्य - भोगापवर्गेत्यत्रा पवर्गशब्दार्थतयैव व्या-ख्यातत्वात ॥ १५ ॥

"भोगः - ब्रह्मादिपिपीलिकान्त बद्ध चेतनवर्गस्य कर्मानुगुण तारतम्यानुभाव्या श्शब्दादयः । अपवर्गः - शब्दादीना मल्पास्थिर त्वादि दोषदर्शनेन भीतानां चेतनानां दुःखनिवृत्तिरूपात्म प्राप्ति

स्सुखैकताना भगवत्प्राप्तिश्चे" त्येवं रूपाहि प्राचीनस्य श्रीयामुनार्यसूनो श्रीमत्कृष्णसूरे स्तद्विषया व्याख्या ॥ १६ ॥

पूर्वोक्तमधिकारिवर्गत्रैविध्यंच संस्कृत वेद स्मृतीतिहासपुराण श्रीपंचरात्र द्राविडवेदतदंगोपांग पूर्वाचार्य श्रीसूक्तिषु समन्ततः प्रसिद्धम् ॥ १७ ॥

श्रुतौताव द्बृहदारण्यकोपनिष द्यष्टमाध्याये द्वितीयब्राह्मणे पंचदशखण्डिकायां – 'त यएव मेतद्विदु' रिति पंचाग्निविदः प्रकृतिवियुक्तं प्रत्यगात्मविद्यानिष्ठान् कैवल्यार्थिनः - 'येचामी अरण्ये श्रद्धां सत्यमुपासत' इति परमात्मविद्यानिष्ठान् भगवत्प्राप्त्यर्थिनश्च - पृथङ्निर्दिश्य तेषा मुभयेषां 'तेर्चिरभिसम्भवन्ती' त्यारभ्य – 'तान् वैद्युता-त्पुरुषो ऽमानवएत्य ब्रह्मलोकान् गमयति ते तेषु ब्रह्मलोकेषु पराः परावतो वसन्ति तेषां न पुनरावृत्ति' रित्यन्तेना र्चिरादिमार्गेणा पुनरावृत्तिलक्षण नित्यफलप्राप्ति मभिधाय; षोडशखण्डिकायां 'अथ ये यज्ञेन दानेन तपसा लोकान् जयन्ती' ति प्रकृतितत्त्वनिबन्धन विलक्षणभोगरूपैश्वर्यार्थिरूपान् पुण्यकर्मणो ऽधिकारिणो निर्दिश्य तेषां - 'ते धूम मभिसम्भवन्ती' त्यारभ्य 'ते लोकान् प्रत्युत्थायिन स्तएवमेवा नुपरिवर्तन्त' इत्यन्तेन धूमादिमार्गेणो र्ध्वाधोगमनागमन रूप पुनःपुन रावृत्तिलक्षणा नित्यफलप्राप्तिश्चा भिहिता ॥ १८ ॥

एवं छान्दोग्योपनिषदि पंचमप्रपाठके दशमखण्डे –"तद्य इत्थं विदु र्येचेमे ऽरण्ये श्रद्धातप इत्युपासते तेर्चिष मभिसम्भवन्ती" त्यारभ्य –"स एना न्ब्रह्म गमय त्येष देवयानः पन्था इती" त्यन्तेन प्रथमादिखण्डिकाद्वयेन बृहदारण्यकवदेव पंचाग्निविद्ब्रह्मविद्रूप द्विविधा धिकारिणा मपुनरावृत्तिप्रतिनियतार्चिरादिगतिरूप देवयानाभिधान मुखेनापुनरावृत्तिलक्षण नित्यफलप्राप्ति मभिधाय; "अथ य इमे ग्राम इष्टापूर्ते दत्त मित्युपासते ते धूम मभिसम्भवन्ती" त्यारभ्य खण्डि-

काद्वयेन बृहदारण्यकवदेव पुण्यकर्मशब्दितैश्वर्यार्थ्यधिकारिणां पुन रावृत्तिप्रतिनियत धूमादिमार्गाभिधानपूर्वकं – " तस्मिन् याव त्सम्पात-मुषित्वा ऽथैतमेवाध्वानं पुन र्निवर्तन्त " इत्यादिना खण्डिकात्रयेण पुनरावृत्तिलक्षणानित्यफलप्राप्ति रभिधीयते ॥ १९ ॥

अत्र –" स एनान् ब्रह्म गमयत्येष देवयानः पन्था" इति देवयाना भिधान मपुनरावृत्ति लक्षण नित्यफलप्राप्त्यभिप्रायकं , अन्यथावक्ष्य माण पुनरावृत्तिलक्षणा नित्यफलाधिकारि पुण्यकर्मणां पंचाग्निविद्ब्रह्म विदांच परस्परवैलक्षण्या ऽभिधायक प्रकरणानुगुण्या सम्भवात । अस्यामेवोपनिषदि चतुर्थ प्रपाठके पंचदशखण्डान्ते –" स एनान् ब्रह्म गमयत्येषदेवपथो ब्रह्मपथ एतेनप्रतिपद्यमाना इमंम्मानवमावर्तं नावर्तंते ना वर्तंत" इति देवयानस्था पुनरावृत्तिलक्षण नित्यफलनैयत्यश्रवणाच्च॥२०॥

एवं गीताशास्त्रेपि सप्तमाध्याय षोडशश्लोक प्रभृत्यष्टमाध्यायान्त पर्यन्तग्रन्थेने दृशमेवाधिकारित्रयं पुनरावृत्य पुनरावृत्तिलक्षण तत्फ-लवैषम्यं धूमाद्यार्चिरादि मार्गगतिवैषम्यंच स्फुटमेव प्रतिपादितं ॥२१॥

उक्तंहितत्र सप्तमाध्याये-" चतुर्विधाभजन्ते मांजनास्सुकृतिनोर्जुन। आर्तोजिज्ञासुरर्थार्थी ज्ञानीच भरतर्षभे"ति षोडशेन श्लोकेनाधिकारि वै-चित्र्यं ॥२२॥

"आर्तोभ्रष्टैश्वर्यकामः। अर्थार्थी - अप्राप्तैश्वर्यकामः । जिज्ञासुः प्र-कृतिवियुक्तात्म स्वरूपावाप्तीच्छुः । ज्ञानी भगवत्प्राप्तीच्छुरि "ति यद्य प्याधिकारि चातुर्विध्यमत्र प्रतीयते । तथापि प्रथमयोर्द्वयोरपि मुखभेदे नैश्वर्यार्थित्वा विशेषादेक एवाधिकार इत्यैश्वर्यार्थि कैवल्यार्थि भगव त्प्राप्त्यर्थि रूपाधिकारि त्रैविध्यमेवान्यत्र सर्वतः प्रसिद्धमिहाप्यभिधि-त्सितमितिबोध्यं ॥२३॥

प्रागदशमवाक्योदाहृतै तच्छ्लोकगीताभाष्य ग्रन्थे प्युदाहृतश्रुत्यैक कण्ठ्यमभिप्रेत्यैव यथोक्तलक्षणाधिकारि त्रयपरत्वमस्य श्लोकस्यभाष्य-कारैर्व्यवस्थापितं ॥२४॥

अर्थार्थ्यादिपदेनैव तत्पदबोध्याधिकारिणः प्राप्यः पुरुषार्थऐश्वर्यमिति स्पष्टमवगम्यते ॥२५॥

ज्ञानिनःप्राप्यः पुरुषार्थस्तु " उदारास्सर्वएवैते ज्ञानीत्वात्मैवमेमतं। आस्थित स्सहि युक्तात्मा मामेवानुत्तमां गतिम् ॥ बहूनां जन्मना मन्ते ज्ञानवान् मां प्रपद्यते । वासुदेव स्सर्वमिति स महात्मा सुदुर्लभ" इत्यष्टादशैकोनविंशश्लोकाभ्यां भगवत्प्राप्तिरेवेति स्पष्ट मभिधीयते । अत्र मामेवानुत्तमां गति मित्यनेन वासुदेव स्सर्व मित्यनेनच अस्याधिकारिणः परमप्राप्यो भगवानेवेत्यंशस्या भिधानात् ॥ २६ ॥

उक्तंच दर्शिताष्टादशश्लोकगीताभाष्ये - मामेवानुत्तमं प्राप्य मास्थित इति । एकोनविंशश्लोकभाष्ये । वासुदेव एव मम परम प्राप्यं प्रापकं चान्यदपि यन्मनोरथवर्ति - स एव मम तत्सर्वमिति मां प्रपद्यते मा मुपास्त इति ॥ २७ ॥

जिज्ञासोः प्राप्यपुरुषार्थस्तु " जरामरणमोक्षाय मा माश्रित्य यतन्ति ये । ते ब्रह्म तद्विदुः कृत्स्न मध्यात्मं कर्म चाखिल " मित्येकोनत्रिंश श्लोके ऽस्याधिकारिणो वेदितव्यतया ब्रह्मशब्दवाच्य परिशुद्धात्म स्वरूपस्य - फलतया प्रकृतिसंसर्गराहित्यलक्षण कैवल्यात्मकजरामरण मोक्षस्य च निर्देशा त्फलोपास्ययो रैक्यावश्यंभावाच्च प्रकृतिवियुक्तात्मस्वरूपमेव ब्रह्मशब्दवाच्य मुपास्यम् - तदेव च जरामरणमोक्ष शब्दितं प्राप्य मित्यवगमेन कैवल्यपर्याय जरामरणमोक्षशब्दित प्रकृतिवियुक्तात्मस्वरूपावाप्तिरूप एव सिद्ध्यति ॥ २८ ॥

अत एव तच्छ्लोकभाष्ये - जरामरणमोक्षाय प्रकृतिवियुक्तात्म स्वरूपदर्शनायेति व्याख्यातम् ॥ २९ ॥

षोडशश्लोकभाष्येपि - जिज्ञासुः प्रकृतिवियुक्तात्मस्वरूपावाप्तीच्छुः - ज्ञानमेवास्यस्वरूपमिति जिज्ञासु रित्युक्त मिति जिज्ञासु पदव्याख्यानं कृतम् ॥ ३० ॥

अतोजिज्ञासोः कैवल्यं पुरुषार्थइति सिद्धं ॥३१॥

कैवल्यंहिनाम - प्रकृतिसंसर्ग तन्निबन्धन देवत्वतिर्यक्त्व मनुष्यत्व स्थावरत्वाद्यौपाधिक धर्मप्रहाणेन ज्ञानानन्दमयत्वादि लक्षण स्वस्वरूप याथात्म्येन प्रत्यगात्मनोऽवस्थानमेव ॥३२॥

आत्मप्राप्ति कैवल्यात्मयाथात्म्य प्रकृतिवियुक्तात्म स्वरूप जरामरणमोक्षादिशब्दाश्च पर्याय वाचिन स्तत्रतत्र प्रयुज्यन्ते ॥३३॥

तथाच प्रकृतितत्वनिबन्धन विलक्षणशब्दाद्यनुभवलक्षणोभोग रूप ऐश्वर्याख्यः पुरुषार्थः, प्रत्यगात्म तत्त्वनिबन्धन विलक्षणानुभव लक्षणोमोक्षरूपः कैवल्याख्यः पुरुषार्थः, भगवत्तत्त्वनिबन्धन विलक्षणानुभव लक्षणोमोक्षरूपो भगवत्प्राप्त्याख्यः परमपुरुषार्थइति पुरुषार्थत्रैविध्य मैश्वर्यार्थि कैवल्यार्थि भगवत्प्राप्त्यर्थि रूपाधिकारित्रैविध्यंच गीताशास्त्र सिद्धंभवति ॥३४॥

एत एवचाधिकारिणो वेदान्तेषु पुण्यकर्माधिकारि पंचाग्नि विद्याधिकारि परब्रह्म विद्याधिकारि रूपतया विवक्षिताः ॥३५॥

एत एवच शारीरकशास्त्रे कार्यब्रह्मोपासक प्रकृतिवियुक्त ब्रह्मात्मक प्रत्यगात्मोपासक परब्रह्मोपासक रूपतया विवक्षिताः ॥३६॥

श्रुता वैश्वर्यार्थिनां पुण्यकर्माधिकारित्वेन निर्देशः - एतदभीप्सितस्य चतुर्मुखलोकानुभाव्यैश्वर्यस्यापि स्वर्गाद्यैश्वर्यवत्प्रकृति तत्त्व निबन्धन विलक्षणशब्दाद्यनुभव लक्षणभोगाख्यैश्वर्य रूपतायाः कर्म साध्यफलरूपतायाश्चा विशिष्टत्वेन पुण्यकर्मानुष्ठान बाहुल्यसापेक्षत्वाभिप्रायः ॥३७॥

प्रसिद्धंहि श्रुतिष्वन्तवत्फलानां कर्मसाध्यत्वं नित्यपुरुषार्थ रूप मोक्षस्य विद्यासाध्यत्वंच ॥३८॥

गीताशास्त्रे तेषां - "चतुर्विधा भजन्तेमा" मिति भगवद्भक्तत्वेन निर्देशश्च ऐश्वर्यैश्वर्यच्युत्तमैश्वर्यस्य भक्तियोगं विना केवलकर्मयोगासाध्यतया विद्यासापेक्षत्वाभिप्रायः ॥ ३९ ॥

शारीरकशास्त्रे कार्यब्रह्मोपासकत्वेन तेषां निर्देशश्च प्राप्यतया तदुपासकत्वाभिप्रायः ॥ ४० ॥

अत श्श्रुतिगीताशास्त्रशारीरक शास्त्रविवक्षिताः पुण्यकर्मानुष्ठान बाहुल्य भगवद्भक्तियोग कार्यब्रह्मोपासनरूपा स्त्रयोप्यंशा ऐश्वर्याथिना मपेक्षिताएवेति न तत्तन्निर्देशभेदादधिकारि भेदशंकावकाशः ॥४१॥

शारीरकशास्त्रे कार्याधिकरणप्रथमसूत्रादिषु बादरिपक्षे कार्य-शब्दिताण्डाधिपति हिरण्यगर्भलक्षण कार्यब्रह्मणो विलक्षणैश्वर्यविशिष्टस्योपासनं तादृशैश्वर्यप्राप्तिफलकं यथोपन्यस्तम्, तथैव गीताशास्त्रेप्यैश्वर्यार्थिनां ज्ञातव्योपादेयनिरूपणपरेऽष्टमाध्यायचतुर्थश्लोके " अधिभूतं क्षरोभावः पुरुषश्चाधिदैवतम् । अधियज्ञोऽह मेवात्र देहे देहभृतां वरे " इत्येवं रूपे-,पुरुषश्चाधिदैवतमित्यनेन विलक्षणैश्वर्य विशेषविशिष्ट पुरुषविशेषोपासनं तथाविधैश्वर्यप्राप्तिफलकं विधीयत इत्युभयत्रैक-विधाधिकारि विवक्षा स्फुटा ॥ ४२ ॥

तथोक्तं तच्छ्लोकभाष्येपि-" पुरुषश्चाधिदैवतम् -अधिदैवतशब्द निर्दिष्टः पुरुषः, अधिदैवतं· दैवतो परिवर्तमान इन्द्रप्रजापतिप्रभृति कृत्स्नदैवतोपरिवर्तमान इन्द्रप्रजापतिप्रभृतीनां भोग्यजाताद्विलक्षणशब्दादे र्भोक्ता पुरुषः- साच भोक्तृत्वावस्था - ऐश्वर्यार्थिनां प्राप्यतयानुसन्धेये " ति ॥ ४३ ॥

ऐश्वर्यार्थिनां पुण्यकर्माधिकार्यन्तर्गतत्वे नैकोक्त्या श्रुतौ ग्रहण सूचितं पुण्यकर्मानुष्ठान बाहुल्यसापेक्षत्वमपि - अस्मिन् श्लोके - अधियज्ञोऽह मेवात्रे त्यनेन प्रतिपाद्यते ॥ ४४ ॥

यथोक्तं तद्भाष्ये, "अधियज्ञोहमेव - अधियज्ञशब्दनिर्दिष्टोहमेव, अधियज्ञः - यज्ञैराराध्यतया वर्तमानः । अत्र - इन्द्रादौ मम देहभूते, आत्मतया ऽवस्थितो ऽहमेव यज्ञै राराध्यइती" ति ॥ ४५ ॥

यद्यपि तच्छ्लोकभाष्ये - महायज्ञादि नित्यनैमित्तिकानुष्ठान वेलायां त्रयाणा मधिकारिणा मनुसन्धेय मेतदित्युक्तम् ॥ ४६ ॥

तथापि - अधियज्ञशब्दनिर्दिष्टं पुण्यकर्मानुष्ठानबाहुळ्यं नाधिकारित्रयसाधारण मिह विवक्षितम् , अपित्वैश्वर्यार्थिना मनुष्येयतयेह विवक्षितेषु यज्ञशब्दनिर्दिष्टेषु बहुळेषु पुण्यकर्मस्वाराध्यभूते न्द्रादिदेवतास्वन्तरात्मतया ऽवस्थितस्य परमात्मनएव प्रधानाराध्यतानुसन्धान न्यायस्याभिहितस्य - अधिकारित्रयसाधारणेषु नित्य नैमित्तिक कर्मसु त्रयाणा मप्यधिकारिणां तुल्यताप्रतिपादनमात्रस्येह विवक्षितत्वात , ऐश्वर्यार्थिप्रकरणएव - अधियज्ञोऽहमेवे त्यभिधानस्य तेषां पुण्यकर्मानुष्ठान बाहुळ्य सद्भावसूचकताया अवर्जनीयत्वाच्च ॥ ४७ ॥

एवमस्मिन् गीताशास्त्रे ऽष्टमाध्याये - कैवल्यार्थिनां ज्ञातव्योपादेय निरूपणपरे -" अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते । भूतभावोद्भवकरो विसर्गः कर्म संज्ञित " इति तृतीयश्लोके - उपनिषत्सु पंचाग्निविद्यायां वेद्यतयाऽभिहितानां प्रत्यगात्मस्वरूप तत्सम्बन्धिभूतसूक्ष्म तद्वासनादिकरेतोविसर्गलक्षणपंचमाहुतीनामेव ज्ञातव्यतया ब्रह्माध्यात्म कर्मशब्दै रभिधीयमानत्वात , गीताभाष्ये ऽस्य श्लोकस्य पंचाग्निविद्यावाक्योदाहरणपूर्वकं तादृशविद्यावेद्यपरतयैव व्याख्यातत्वा च्चोपनिषत्प्रसिद्धः पंचाग्निविद्यानिष्ठएवेह जिज्ञासुशब्दितः कैवल्यार्थीति स्फुटतरं प्रत्यभिज्ञायते ॥ ४८ ॥

उपनिषदुक्तरीत्यैव चेहापि जिज्ञासुशब्दित कैवल्यार्थिज्ञानिशब्दित भगवत्प्राप्तिकामलक्षण द्विविधाधिकारिणा मपुनरावृत्तिः - ऐश्वर्यार्थिलक्षणैक विधाधिकारिणां पुनरावृत्तिश्च प्रतिपाद्यते ॥ ४९ ॥

तस्मा च्छारीरक शास्त्रविवक्षितमेवा धिकारित्रय मत्रापि गीताशास्त्रेऽ भिहितम् ॥ ५० ॥

पूर्वपक्षिणां कैवल्यार्थिनः पंचाग्निविद्यानिष्ठा दन्यत्ववादस्तु षष्ठविप्रतिपत्ति विचारे निराकरिष्यते ॥ ५१ ॥

गीताभाष्ये भाष्यकारै र्गीतार्थसंग्रहे भगवद्यामुनमुनिभि श्चेदृशमेवाधिकारित्रयं पुरुषार्थत्रयं तद्वैलक्षण्यंच सम्यगेवा सकृद्विशदीकृतम् ॥५२॥

भगवच्छास्त्रे नारदादिभिरप्युक्तम् -" ऐहलौकिकमैश्वर्यं स्वर्गाद्यं पारलौकिकम् । कैवल्यं भगवन्तंच मन्त्रोयं साधयिष्यती "ति ॥५४॥

अत्र पुरुषार्थत्रयाभिधानेन तदर्थिना मधिकारिणामपि त्रैविध्य मुक्तप्रायम् ॥ ५४ ॥

एवं याज्ञवल्क्यस्मृतावपि तृतीयाध्याये दर्शित मधिकारिवर्ग-त्रैविध्यं स्पष्ट मभिहितम् ॥ ५५ ॥

तत्रहि याज्ञवल्क्येन दर्शितोपनिषदुक्त त्रिविधाधिकारि स्वरूप निरूपणप्रवृत्तेन - " पितृयाणो जवीथ्यांश्च यदगस्त्यस्यचान्तरम् । तेनाग्निहोत्रिणो यान्ति स्वर्गकामा दिवंप्रति ॥ येच दानपरा स्सम्य गष्टाभिश्च गुणै र्युताः । तेपि तेनैव मार्गेण सत्यव्रतपरायणाः ॥ तत्राष्टाशीति साहस्रा मुनयो गृहमेधिनः । पुनरावर्तिनो बीज भूता धर्मप्रवर्तकाः ॥" इतिचतुरशीत्युत्तरशततमादि श्लोकत्रयेण - अष्टाशीतिसहस्रसंख्यकैः पुनरावृत्तिलक्षणा नित्यफलहेतुप्रवृत्तिधर्मप्रवर्तक बीजभूतगृहमेधिमुनिभिः स्वयमपि पुनः पुनरावृत्तिशीलै रधिष्ठितं पुनरावृत्तिहेतु-पितृयाणाख्य म्मार्गं पुण्यकर्माधिकारि शब्दित सकलविधैश्वर्यार्थिवर्गस्य तन्मार्गगामितां चाभिधाय, " सप्तर्षिनागवीथ्यन्त र्देवयानं समाश्रिताः । तावन्तएव मुनयः स्सर्वारम्भविवर्जिताः ॥ तपसा ब्रह्मचर्येण संगत्यागेन मेधया । तत्र गत्वा वतिष्ठन्ते यावदाभूत सम्प्लव"मिति सप्ताशी त्युत्तरशततमादि श्लोकद्वयेना ष्टाशीति सहस्रसंख्यैरेवा पुन रावृत्तिलक्षण नित्यफलहेतुनिवृत्तिधर्म प्रवर्तकबीजभूतै स्स्वयमपि पुनः पुनरावृत्तिशीलता विधुरै र्विरक्तै र्मुनिभि रधिष्ठित मपुनरावृत्ति देवयानाख्य म्मार्गं मभिधाय; "यतो वेदाः पुराणानि विद्योपनिषद स्तथा। श्लोका स्सूत्राणि भाष्याणि यच्च किंचन वाङ्मयम् ॥ " इत्येकोन नव त्युत्तरशततमश्लोकेन पूर्वोक्तमार्गद्वयाभिष्ठायिनो द्विविधादेव मुनिसमूहात्तदा तदा प्रवृत्तिनिवृत्तिलक्षण द्विविधधर्मविषय सकलविधशास्त्र प्रवृत्तिमभिधाय; " वेदानुवचनं यज्ञो ब्रह्मचर्यं तपो दमः । श्रद्धोपवा

स्वस्वातन्त्र्यं मात्मनो ज्ञानहेतवः ॥ सद्ब्राश्रमै र्विजिज्ञास्यः समस्तैरेव मेवतु । द्रष्टव्यस्त्वथमन्तव्य श्श्रोतव्यश्च द्विजातिभि ” रिति नवत्युत्तर-शततमादिश्लोकद्वयेन मोक्षोपयोगि प्रत्यगात्मस्वरूप याथात्म्यज्ञानो त्पत्तिहेतून् साक्षात्काररूप तदीयविशदज्ञानहेतून् सपरिकरान् श्रव णादींश्चाभिधाय; “ यएवमेनं जानन्ति येचा रण्यक माश्रिताः । उ-पासते तप स्सत्यं श्रद्धया परया युताः ॥ ” इति द्विनवत्युत्तरशततम श्लो केन प्रागष्टादशैकोनविंश वाक्योदाहृतो पनिषदुक्तरीत्यैव कैवल्या-र्थिरूप प्रत्यगात्मविद्यानिष्ठ भगवत्प्राप्त्यर्थिरूप परमात्मविद्यानिष्ठान् द्विविधानप्यधिकारिणो देवयानमार्गगामिनो निर्दिश्य; “ क्रमा त्ते-सम्भवन्त्यर्चि रहश्शुक्लं तथोत्तरम् । अयनं देवलोकश्च सवितारं स-वैद्युतम् ॥ तत्र तत्पुरुषो दिव्यो ऽ मानवो ब्राह्मलौकिकान् । करोति पुनरावृत्ति स्तेषा मिह नविद्यते ॥” इति त्रिनवत्युत्तरशततम श्लोकप्रभृति श्लोकद्वयेन देवयानमार्गातिवाहिकान् तै रुक्तानां द्विविधाना मप्यधि कारिणां ब्रह्मलोकशब्दितं प्रकृतिमण्डलोर्ध्वदेशं नीताना मपुनरा-वृत्तिचा भिधाय; “यज्ञेन तपसा दानै र्येहि स्वर्गजितो नराः । धूमं निशां कृष्णपक्षं दक्षिणायनमेवच ॥ पितृलोकं चन्द्रमसं वायुं वृष्टि-जल महीम् । क्रमात्ते सम्भवन्तीह पुनरेवाव्रजन्तिच ॥ ”इति पंचनवत्युत्त रशततमादि श्लोकद्वयेन पितृयाणाख्यमार्गे गन्तॄणां पुण्यकर्माधिका रि शब्दित सकलविधैश्वर्यार्थिना मूर्ध्वाधोनयनहेतून् धूमाद्यभिमानिनः तन्मार्गगामिना मूर्ध्वाधोगमनागमन लक्षणां पुनःपुनरावृत्तिचाभिधाय; “एतद्यो नविजानाति मार्गद्वितय मात्मवान् । दन्दशूकः पतंगो वा भवेत्कीटो थवा क्रिमिः ॥ ” इति सप्तनवत्युत्तरशततम श्लोकेन मार्गद्वया नभिज्ञानफलम प्यभिधाय निगमितं त्रिविधाधिकारि स्वरूप-निरूपणम् ॥ ५६ ॥

एवं श्रीविष्णुपुराणेपि प्राप्यस्वभावभेदनिबन्धन मीदृशाधिका रिवर्ग वैचित्र्यं दर्शितम् ॥ ५७ ॥

तत्रहि प्रथमांशे द्वाविंशाध्याये सर्वावस्थावस्थितयो श्चेतनाचेतनयो ब्रह्मशरीरतया कृत्स्नस्य जगतो ब्रह्मरूपतां प्रतिपादयितुं प्रवृत्तेन भगवता पराशरेण –"एवमेव जगत्स्रष्टा जगत्पाता तथा जगत । जगद्भक्षयिता देव स्समस्तस्य जनार्दनः ॥" इति चत्वारिंश श्लोकांतेन ग्रन्थेन – गुणत्रयाश्रयणेन क्रियमाणेषु जगत स्सृष्टिस्थितिसंहारेषु प्रवृत्तानां चतुर्धा चतुर्धा विभक्तानां सर्वेषां तत्तत्सृष्टिस्थितिसंहार कर्तॄणां ब्रह्मशरीरतां – चतुर्धा चतुर्धा विभक्तेषु तेषु स्रष्टादिष्वेव गुणत्रयानुगुण प्रवृत्तिकप्रकृतिमिश्र चेतनाचेतनात्मकसर्वभूताना मन्त र्भावं चाभिधाय, तन्मुखेन गुणत्रयानुगुणप्रवृत्तिक चेतनाचेतनात्मक सर्वभूतानां ब्रह्मशरीरतां निरूप्य, "सर्गस्थित्यन्तकालेषु त्रिधैवं सम्प्रवर्तते । गुणप्रवृत्त्या परमं पदं तस्या गुण म्महत् ॥" इत्येक चत्वारिंशश्लोके – गुणप्रवृत्त्येत्यन्तेन प्रकृतिमण्डलान्तःपाति गुणत्रय वश्यकृत्स्नजगदात्मकस्य परब्रह्मसम्बन्धिनो मूर्तविभागान्तर्भूतस्य रूपस्य निरूपण मुपसंहृत्य; ततः -"परमं पद" मित्यादिना "तत्रान्यज्ञान रोधेने"त्यादि द्विपञ्चाशश्लोकान्तेन ग्रन्थेना, मूर्तविभान्तर्गतयोः पर ब्रह्मसम्बन्धिरूपयोः प्रथमं कैवल्यार्थिप्राप्यभूता पुनरावृत्तिलक्षण पुरुषार्थभूत प्रकृतिविनिर्मुक्त प्रत्यगात्मस्वरूपलक्षणं रूपं प्रतिपाद्य ; ततः -"एवं प्रकार ममल" मित्यादि श्लोकद्वयेन – भगवत्प्राप्त्यर्थि प्राप्यभूता पुनरावृत्तिलक्षण परमपुरुषार्थभूतं परमपुरुषदिव्यात्मस्वरूपलक्षणं दर्शितरूपद्वयमातिसम्बन्धिभुत वस्तुस्वरूपं प्रतिपाद्य; ततः "द्वे रूपे ब्रह्मण स्तस्य मूर्तं चामूर्तमेव च । क्षराक्षरस्वरूपे ते सर्वभूते ष्ववस्थिते ॥ अक्षरं तत्परं ब्रह्म क्षरं सर्व मिदं जग" दिति सार्धश्लोकेन पूर्वोक्तेषु ब्रह्मसम्बन्धिषु रूपेषु मूर्तामूर्तविभागं क्षराक्षरविभागं – तत्र प्रकृतिमण्डलान्तःपातिनः कृत्स्नस्य मूर्तरूपस्य क्षरत्वं – अमूर्तरूपस्य परब्रह्मशब्दित मुक्तात्मस्वरूपलक्षणस्या क्षरत्वं चाभिधाय; ततः – व्यवहिताव्यवहिताना ममीषां पूर्वनिर्दिष्टानां वस्तूनां कथं परब्रह्मसम्बन्धिरूपत्व मित्याशंकां –" एकदेशस्थितस्या

मे ज्योत्स्नाविस्तारिणी यथा । परस्य ब्रह्मण श्शक्ति स्तथेद मखिलं जगत् ॥ ” इत्यनेन प्रभाप्रभावतो रिव जगद्ब्रह्मणो र्विशेषणविशेष्य भावलक्षणसम्बन्ध विशेषोपपादनेन समाधाय; “ तत्राप्यासन्नदूरत्वा द्बहुत्वस्वल्पतामयः । ज्योत्स्नाभेदो ऽस्ति तच्छक्ते स्तद्वन्मैत्रेय वि-द्यत” इत्यादिना श्लोकत्रयेण परब्रह्मशक्तिभूतस्य कृत्स्नस्य जगत स्सन्निकर्षविप्रकर्षादिनिबन्धन ज्ञानशक्त्यादितारतम्यसद्भावं च निरूप्य; “तदेत दक्षयं नित्यं जगन्मुनिवराखिलम् । आविर्भाव तिरोभाव जन्मनाशविकल्पव ” दिति श्लोकेन प्रस्तुतस्य प्राकृत जगदाख्यमूर्त-रूपस्य स्वरूपतो ऽनित्यतां प्रवाहतो नित्यतांच निरूप्य; ततः – “ सर्वशक्तिमयो विष्णु स्स्वरूपं ब्रह्मणो ऽपरम् । मूर्तं यद्योगिभिः पूर्वं योगारम्भेषु चिन्त्यत ” इत्यादिना श्लोकत्रयेण भगवत स्स्वासा-धारण मप्राकृतं योगालम्बनशुभाश्रयभूत मन्तरंगतमं मूर्तं रूपान्तरं चाभिधाय; “ तत्र सर्व मिदं प्रोतमोतं चैवाखिलं जगत् । ततो जातं जग त्तस्मिन् स जग च्चाखिल म्मुन ” इति प्रक्रान्तं सर्वस्य जगतो ब्रह्मरूपत्वं निगमितम् ॥ ५८ ॥

अत्रैकचत्वारिंशश्लोकप्रभृति द्विपंचाशश्लोकपर्यन्तभागे कैवल्या-र्थिप्राप्यभूत प्रकृतिविनिर्मुक्तप्रत्यगात्मस्वरूपप्रतिपादनपरे –“ योगिनो मुक्तिकामस्य प्राणायामादिसाधनं । साध्यं च परमं ब्रह्म पुन र्ना वर्तते यत ” इति पंचचत्वारिंशश्लोकेन –“ तत्रान्यज्ञानरोधेन योगिनो यान्ति ये लयम् । संसारकर्षणोप्तौ ते यान्ति निर्बीजतां द्विजे”ति द्विपंचाशश्लोकेन च कैवल्यार्थिना मात्मोपासकानां प्रकृतिवियुक्तं प्रत्यगात्मस्वरूपं प्राप्यम् – तत्प्राप्तिलक्षणं कैवल्यं च मुक्तिः – ता-दृशमुक्तिं प्राप्तानां च न पुन स्संसारसम्बन्धलक्षणा पुनरावृत्ति रिति प्रतिपादनात् ; ततः – “ एवं प्रकार ममलं नित्यं व्यापक म-क्षयम् । समस्तहेयरहितं विष्ण्वाख्यं परमं पदम् ॥ तद्ब्रह्म परमं योगी पुन र्नावर्तते यतः । अपुण्यपुण्योपरमः क्षीणक्लेशो ऽ वि

निर्मल " इति त्रिपंचाशादिश्लोकद्वयेन परमात्मलक्षण परब्रह्मोपासकानां भगवानेव परमप्राप्यः – तत्प्राप्तिलक्षणपरममोक्षं प्राप्तानामपि न पुनरावृत्ति रित्यभिधानात ; प्राकृतकृत्स्नजगदात्मकमूर्तरूपस्य क्षरत्वाविर्भाव तिरोभाव जन्मनाशविकल्पवत्त्वाभिधानेन तत्प्राप्तिलक्षणैश्वर्यपुरुषार्थार्थिना मधिकारिणां पुनरावृत्त्यभिधानसिद्धेश्च ; उपनिषत्सु गीताशास्त्रे चोक्तया रीत्यैव जिज्ञासुपंचाग्निविदादिशब्दितान् प्रत्यगात्मोपासकान् परमपुरुषनिष्ठ परब्रह्मोपासकादिशब्दितान् परमात्मोपासकांश्च भेदेन निर्दिश्य तत्प्राप्यभेदा पुनरावृत्त्यादिक मैश्वर्यार्थिनां पुनरावृत्त्यादिकं च सर्वं प्रतिपादितं भवति ॥ ५९ ॥

अत्रानयोः कैवल्यभगवत्प्राप्त्यर्थिनो र्द्वयो रधिकारिणो रविवक्षितत्वे – " योगिनो मुक्तिकामस्ये" त्याद्युदाहृत पञ्चचत्वारिंशाद्विपंचाशश्लोकयोः कैवल्यमुक्तिकामस्या त्मयोगिनः प्राप्यस्वरूपापुनरावृत्त्योः पृथगभिधानं , पुनः – एवं प्रकार ममल मित्याद्युदाहृत त्रिपञ्चाशादिश्लोकद्वये भगवद्योगिनः प्राप्यस्वरूपा पुनरावृत्त्योः पृथ गभिधानं च न कथंचि दप्युपपद्यते ॥ ६० ॥

दर्शितविष्णुपुराणघट्टस्य दर्शितप्रत्यगात्मस्वरूप परमात्मस्वरूपलक्षणप्राप्यभेद तदर्थ्यधिकारिद्वयपरत्वंच – वेदार्थसंग्रहे परमव्योमादिशब्दाभिधेय स्थानविशेषसमर्थनप्रकरणे दर्शितविष्णुपुराणघट्टे – एकचत्वारिंशश्लोकस्थस्य 'परमं पद' मित्यस्य प्रकृतिवियुक्तात्मस्वरूपपरतां, त्रिपंचाशश्लोके – 'समस्तहेयरहितं विष्वाख्यं परमं पद' मित्युत्तरार्धस्थस्य परमं पद मित्यस्य भगवत्स्वरूपपरतां च व्याचक्षाणै र्भाष्यकारैरेव स्पष्ट मुपदर्शितम् ॥ ६१ ॥

अयं च वेदार्थसंग्रहग्रन्थः प्रथमतरंगे सप्तचत्वारिंशदुत्तरशततम वाक्य उदाहृतः ॥ ६२ ॥

श्रीविष्णुचित्तार्यैरपि दर्शितविष्णुपुराणघट्टं तथैवव्याकुर्वाणैः – तत्रान्यज्ञानरोधेनेत्यादि त्रिपंचाशश्लोकावतारिकायां आत्मयोगिना मन्तिमप्रत्ययेना वश्यं भाव्यं – अन्यथा पुनरावृत्ते रित्याहेति – तद्ब्रह्म परमं योगी पुन र्नावर्तते यत इत्याद्युदाहृत चतुष्पंचाशश्लोक व्याख्याने – योगी भगवद्योगी – अस्यात्यन्तिमप्रत्ययेन भगवति लीनवृत्ति र्द्रष्टव्येतिच प्रतिपादयद्भिः – आत्मयोगिनो भगवद्योगिनश्च परस्परविलक्षणा अधिकारिणः – तेषां स्वस्वोपासनानुगुणान्तिमस्मृत्या स्वस्वप्राप्यलाभ इति निरूपणेना स्य घट्टस्य गीताशास्त्रोक्त जिज्ञासुज्ञानिलक्षण द्विविधाधिकारिपरत्वमेव स्पष्ट मुपदर्शितम् ॥ ६३ ॥

उपदर्शितं च गीताशास्त्रेणा स्य समानप्रकरणत्व मन्तिमस्मृति प्राप्यस्वरूपादीना मेकरूपतया प्रतिपादनात् ॥ ६४ ॥

एवं सर्वत्र शास्त्रेषु दर्शितलक्षणा स्त्रिविधा एवा धिकारिणः प्रतिपाद्यन्ते ॥ ६५ ॥

आचार्यैरपि तथैव प्रतिपाद्यन्ते ॥ ६६ ॥

गीतार्थसंग्रह द्वादशश्लोके – ऐश्वर्याक्षरयाथात्म्य भगच्चरणार्थिना मिति – चतुश्श्लोक्यन्तर्गत तृतीयश्लोके – संसृत्यक्षरवैष्णवाध्वस्वितिच यामुनमुनिभि र्भेदनिर्देशः कृतः ॥ ६७ ॥

भाष्यकारै रपि गीतासप्तमाध्यायाष्टाविंशश्लोकभाष्ये – जरामरण मोक्षाय महते चैश्वर्याय मत्प्राप्तयेच दृढव्रता इति – अष्टमाध्यायावतरणिकाभाष्ये-ऐश्वर्याक्षरयाथात्म्य भगवत्प्राप्त्यपेक्षयोपासनभेदमिति – चतुर्दशाध्यायान्तिमश्लोकभाष्ये – गुणात्ययस्य तत्पूर्वकाक्षरैश्वर्यभगवत्प्राप्तीनां चेति – शरणागतिगद्येच – सर्वकामांश्च साक्षरानिति च तत्तदधिकारिपुरुषार्थानां पृथङ्निर्देशः स्पष्टतरं कृतः ॥ ६८ ॥

श्रीवत्सांकमिश्रैरपि वरदराजस्तवैकाशीतितमश्लोके – भोगा इमे विधिशिवादिपदंच किंच स्वात्मानुभूति रिति या किल मुक्ति रुक्ता ।

Scanned with OKEN Scanner

सर्वं त दूष जलजोष मह जुषेय इत्यद्रिनाथ तव दास्यमहारसज्ञ इत्येव रूप ब्रह्मलोकैश्वर्यपर्यन्तैश्वर्याणां भोगशब्देन – आत्मानुभूतिशब्दितं कैवल्यस्य मुक्तिशब्देन – भगवद्दास्यशब्दितं भगवत्प्राप्ति महारसहेतुपरमपुरुषार्थत्वेन च निर्देशं कुर्वद्भिः त्रिविधपुरुषार्थस्वरूपं तत्तारतम्यं तदधिकारिभेदाः स्पष्टं दर्शिताः ॥ ७७ ॥

तदाह स्म श्रीपराशरभट्टाचार्या अपि श्रीगुणरत्नकोशे एकपञ्चाशे श्लोके "ऐश्वर्यमक्षरगतिं परमं पदं वा कस्मैचिदञ्जलिभरं वहते वितीर्य" इति निर्देशेन – श्रीरंगराजस्तवोत्तरशतके पंचाशीतितमश्लोकेन "प्रत्यंचं स्वं पंचविंशं पराञ्च स्वं चक्षाणाः स्वत्वराशेर्विविच्य । युञ्जानाश्च त्वं भरन्यासबुद्धौ स्वं च त्वां वा रंगनाथाप्नुवन्ति" इत्येवं रूपेण – सहस्रनामभाष्ये – मुक्तानां परमागतिरिति नामनिर्वचनप्रकरणस्थेन – परमेति विशेषणेन मुक्तानामेव केषांचिदर्वाचीना गतिर्गम्यते – गीयते च निर्मुक्तजरामरणात्मकैवल्यलक्षणा – जरामरणमोक्षाय मामाश्रित्य यतन्ति ये इति – संसारपरमपदयोर्मध्ये तेषां स्थानं च – योगिनाममृतं स्थानं स्वात्मसन्तोषकारिणामितीति ग्रन्थेन च ऐश्वर्यकैवल्यभगवत्प्राप्तिरूप पुरुषार्थस्वरूपभेद तदधिकारिभेदादिकं दर्शितम् ॥ ७८ ॥

एवं – दिव्यसूरिसूक्तिष्वपि परश्शतस्थलेष्वेवंभूता निर्देशा द्रष्टव्याः ॥ ७९ ॥

तस्मात् त्रिविधाधिकारिणो निर्दिश्य तत्रैकविधानामधिकारिणामनित्यभोगशब्दितैश्वर्याख्य फलप्राप्ति रन्येषां द्विविधानामधिकारिणामपवर्गशब्दित नित्यफलप्राप्तिश्चाभिहितत्वात् तत्र नित्यफलप्राप्त्यधिकार्यन्तर्गततया प्रकृतिवियुक्तप्रत्यगात्मोपासकानां कैवल्यार्थिनामभिधीयमानत्वाच्च सामीप्यमूर्तः कैवल्याख्य पुरुषार्थो नित्य एव, । अन्यथा तदर्थिनां ऐश्वर्यलक्षणानित्यपुरुषार्थनिष्ठेभ्यः पृथङ्निर्देशानां

मुक्तादिशब्दैर्व्यावृत्तनिर्देशानां भगवत्प्राप्त्यर्थिपरब्रह्मोपासकैकस्तुल्यतयाऽनावृत्तिनिर्देशानां चायोगात् ॥ ७२ ॥

कैवल्यपुरुषार्थस्यानित्यत्वे स्वात्मार्थिनो स्वानन्दविशेषरूपस्याप्यनित्यपुरुषार्थभूतैश्वर्यार्थित्वाविशेषेण कविभाषिकादिकोटिनिवेशवत्कैवल्यार्थिनोऽप्यैश्वर्यार्थिकोटिनिवेशो हि दुष्परिहारः स्यात् ॥ ७३ ॥

अनावृत्तिश्रुतिबलादेव हि– अनावृत्तिः शब्दादनावृत्तिः शब्दादिति सूत्रकारेणापि परब्रह्मप्राप्तिलक्षणपुरुषार्थस्य नित्यता समर्थिता ॥ ७४ ॥

यावेदनावृत्तिश्रुतिरन्यथासिद्धिं गमयेत्तदा ब्रह्मप्राप्तिरूपमोक्षरूपपरमपुरुषार्थस्यापि नित्यता न सिध्येदेव ॥ ७५ ॥

अनावृत्तिश्रुतिश्चोभयेषामधिकारिणां सर्वेषां साधारण्येन दृश्यते ॥ ७६ ॥

प्राप्यवस्तु तदनुभवस्थानादिनित्यत्वादपि परमपुरुषार्थवदेवावापि पुरुषार्थो नित्यः ॥ ७७ ॥

तदनुभवस्थाननित्यत्वं च पञ्चमविप्रतिपत्तिविचारे स्थापयिष्यते ॥ ७८ ॥

दिव्यसूरिभिः स्वयंपूर्वाचार्यैश्चैककण्ठ्येन द्राविडवेदतदङ्गोपाङ्गतद्भाष्यादिषु मुक्तकण्ठमसन्दिग्धैरनन्यथासिद्धैः प्रबन्धानर्दैश्च निर्देशैः– अयं कैवल्याख्यपुरुषार्थो भगवत्प्राप्तिलक्षणपुरुषार्थवन्नित्य एव । नित्यतायां न किञ्चिदनयोर्वैषम्यं– अल्पत्वानल्पत्वस्वरूपानुगुणत्व तदननुगुणत्वाभ्यामेव चानयोर्वैषम्यमिति स्पष्टतः प्रतिपाद्यते ॥ ७९ ॥

श्रीमदङ्कुशादिव्यसूरिणा तावदस्य कैवल्याख्यपुरुषार्थस्य स्वरूपं द्राविडब्रह्मसंहितायां प्रथमकाण्डे द्वितीयश्रीमुखसूक्ते पंचम

गाथायां, सप्तमश्रीमुखसूक्ते प्रथमगाथायां – चतुर्थकाण्डे प्रथमश्रीमुख सूक्ते दशमगाथायाम्, नवमश्रीमुखसूक्ते दशमगाथायाम् – षष्ठकाण्डे नवमश्रीमुखसूक्ते दशमगाथायाम् – सप्तमकाण्डे पंचमश्रीमुखसूक्ते दशमगाथायाम् – अष्टमकाण्डे ऽष्टमश्रीमुखसूक्ते षष्ठादिगाथात्रितये, दशमश्रीमुखसूक्ते द्वितीयगाथायाम् - एवं स्थलान्तरेषु प्रबन्धान्तरेषु च सम्य क्प्रतिपादितं दृश्यते ॥ ८० ॥

तत्र सर्वत्र नित्यत्वमेवा स्या वगम्यते ॥ ८१ ॥

द्राविडभाष्यकारैः प्राचीनैः कुरुकेशार्यवेदान्तयोगिकृष्णपाद सु धुत्तरवीधिकृष्णगुरु वादिकेसरिरम्यजामातृमुनि प्रभृतिभि स्सर्वै रपि स्वस्वभाष्येषु सुप्रतिष्ठापितो ऽ य मर्थः ॥ ८२ ॥

एवं भट्टनाथादिदिव्यसूर्यन्तरैरपि स्पष्टतर मुक्तलक्षण एवायं पुरुषार्थ स्तत्र तत्र स्वप्रबन्धेषु निरूपितः ॥ ८३ ॥

किं बहुना । श्रीभाष्यकारैरेव श्रीगीताभाष्ये कैवल्यपुरुषार्थो नित्यएवेति मन्दमतीनामपि सुज्ञान स्स्फुटतरमेव निरूपित इति न प्रमाणान्तरगवेषण मपेक्षित मास्तिकानाम् ॥ ८४ ॥

एतेच ग्रन्था यथावसर मुपरिष्टा दुदाहरिष्यन्ते ॥ ८५ ॥

तत्र द्राविडवेद तद्भाष्यादिग्रन्था श्चास्मिन् संस्कृतग्रन्थे साजा त्येनानुरूपघटनासिध्यर्थ मपरिचितद्राविडवेदाना मपि प्रतिपत्तॄणां सुखप्रतिपत्त्यर्थं च प्रायश स्संस्कृतवाण्या प्रतिसंस्कृत्यै वोदा-हरिष्यन्ते ॥ ८६ ॥

यत्पुनः – सर्वे च्यवनधर्माण इति मोक्षधर्मवचनशकलमेव सम-न्तत उदाहृत्य सर्वमपि शास्त्रं व्याकुल यन्येते स्वतन्त्राः ॥ ८७ ॥

तदेव ताव त्प्रथमं विचार्यते ॥८८॥

तत्तु परस्सहस्रान्यथासिद्धि संवलितं न कथं चिदपि कैवल्यस्या नित्यता साधकं भवितु मर्हति ॥८९॥

अथात्र प्रथमं पाठविप्लव तन्मूलक निरूपककृतयोजनाभेदादि प्रदर्शनार्थं दर्शितमोक्षधर्मवचनपूर्वोत्तरसन्दर्भपाठभेदादिकं लिख्यते॥९०॥

एतद्वचन घटितं हि प्रकरणं भारते शान्तिपर्वणि द्विचत्वारिंश द्दधिकत्रिशततमे श्री नारायणीयोपाख्याने ऽष्टमे चाध्याये "चतुर्विधा ममजना भक्ता एवहिमेश्रुताः । तेषा मेकान्तिनः श्रेष्ठा येचैवा नन्य देवताः ॥ अहमेव गति स्तेषां निराशीः कर्मकारिणां । येतु शिष्टा स्त्रयोभक्ताः फलकामाहितेमताः । सर्वे च्यवनधर्मास्ते प्रति· बुद्धस्तु श्रेष्ठभाक् ॥ ब्रह्माणं शितिकण्ठश्च यश्चान्या देवतास्मृताः । सम्बुद्धचर्या स्सेवन्तो मामे वैष्यन्ति यत्परं । भक्तं प्रतिविशेषस्त एषपार्थानु कीर्तितः " इत्येतादृश पूर्वोत्तर सन्दर्भंशा स्तद्यत नकोशेषु ॥९१॥

अत्र ये चैवानन्य देवताइति स्थाने तेचैवानन्य देवता इति पाठान्तरं ॥१॥ एवं – चतुर्विधा इत्यर्धानन्तरं – आर्तो जिज्ञा सुरर्थार्थी ज्ञानीचेति पृथक्पृथ गित्यर्धमधिकं क्वचिदुपलभ्यते ॥२॥ एवं – सर्वे च्यवनधर्मास्ते प्रतिबुद्धस्तु श्रेष्ठभागित्यस्यस्थाने – सर्वेच्यवनधर्माणः प्रति बुद्धस्तु मोक्षभागिति – संबुद्धचर्यास्सेवंत इत्याद्यर्धस्थाने - प्रतिबुद्धा-नसेवन्ते यस्मात्परिमितं फलमितिच पाठः कैश्चिदुदाहृतः क्वचिदुप लभ्यते ॥ ३ ॥ इत्येवं ताव दिह पाठभेद उपलभ्यते तत्तद्ग्रन्थे षूदाहृतः॥ ९२॥

इत्थं पाठभेद दर्शनेन दर्शित मोक्षधर्मवचन जातस्य चतु र्विधाभजन्तेमामित्यादि गीता सप्तमाध्याय ग्रन्थ समानप्रकरणता – 'येप्यन्य देवताभक्ता यजन्ते श्रद्धया ऽन्विताः । तेपि मामेव कौन्तेय यजन्त्यविधिपूर्वकं । अहंहि सर्वयज्ञानां भोक्ताच प्रभुरेवच ।

नतुमामभिजानन्ति तत्त्वेनातश्च्यवन्तिते । यान्तिदेवव्रता देवान् पितॄन्यान्ति पितृव्रताः । भूतानियान्तिभूतेज्या यान्ति मद्याजिनोपि मा'मिति नवमाध्याय त्रयोविंशश्लोकादि प्रवृत्तग्रन्थ समान प्रकरणतांच यथायथ माचार्याः परिजगृहुः ॥९३॥

तत्र नवमाध्याय समान प्रकरणतावादिनस्त्वेव मन्यन्ते । तदेत न्मोक्षधर्मवचनजातं देवतान्तरभक्त भगवद्भक्त परस्त दर्शित नवमाध्याय समानप्रकरणमेव ॥१॥ यान्ति देवव्रता इति श्लोकाद्देवभक्त पितृभक्त भूतभक्त भगवद्भक्त रूपाधिकारिचतुष्टयपरतया चतुर्विधा ममजना इति चतुर्विधत्वोत्कीर्तनमपि सङ्गच्छते ॥२॥ चतुर्थाधिकारिणा मक्रान्ति प्रतिबुद्ध शब्दितानां 'ते चैवानन्यदेवता' इत्यनेन 'ब्रह्माणं शितिकण्ठं चे'त्यादिश्लोके 'प्रतिबुद्धानसेवन्त' इत्यनेनैच देवतान्तर सेवनराहित्य . नेतरात्रिविधाधिकारि व्यावृत्तता प्रतिपादनमपि नव माध्याय समान प्रकरणतामेवा स्यग्रन्थस्या वगमयति ॥३॥ सप्तमा ध्याय दर्शित प्रकरणोपात्तानां चतुर्विधानाम प्यधिकारिणां चतुर्वि धाभजन्ते मामिति भगवद्भक्ततया एक प्रतिपादनात्, केषाञ्चिद्देव तान्तर भक्तत्वा प्रदर्शनाच्च न तत्समान प्रकरणत्व मस्य सम्भवति॥४॥ किञ्च - सर्वे च्यवनधर्माण इत्यनेन नतुमामभिजानन्ति तत्त्वेना त श्च्यवन्तित इत्यस्य प्रत्यभिज्ञापनाच्च नवमाध्याय समान प्रकरणत्व मवगम्यते ॥५॥ संबुद्ध्यर्थास्तेऽपत्त इति पाठदर्शनमेतस्यैवोक्तमर्थं देवतान्तरान्तर्यामि तया भगवत एवा राध्यत्वं ज्ञानाज्ञानाभ्यां अपुन रावृत्ति पुनरावृत्तिसम्भव प्रतिपादनस्य प्रकरणद्वयाभिमततयात्॥६॥ दर्शित नवमाध्यायग्रन्थ भाष्यम प्यत्र प्रत्यभिज्ञापकं दृश्यते ॥७॥ तत्र चतुर्विंशश्लोकावतरणिकायां अतश्चैवविद्या इत्यादि शरीरस्य परमपुरु षस्याराधनान्येवानि कर्माणि · आराध्यश्चस एवेति नजानन्ति - तेच परिमितफलभागिनश्च्यवन स्वभावाश्च भवन्तीत्यनेन - यस्मात्पारि मितं फलमिति - सर्वे च्यवनधर्माण इतिच मोक्ष धर्मवचनैक कण्ठ्य

मेवास्य भाष्यकारै भाषितमित्यवगम्यते ॥८॥ एवं यान्ति देवव्रता इत्यादि पञ्चविंशश्लोकावतारिकायामपि अहोमहदिदं वैचित्र्यं यदेकस्मिन्नेव कर्मणि वर्तमानाः सङ्कल्पमात्रभेदेन केचिदत्यल्पफलभागिनश्च्यवनस्वभावाश्च भवन्ति केचनानवधिकातिशयानन्दं परमपुरुषप्राप्तिरूपफलभागिनोऽपुनरावर्तिनश्च भवन्तीत्याहेत्यनेन तद्वोऽखण्डा येतुते रेव यष्ठे देवपितृभूतशरीरकं परमात्मानं भगवन्तं वासुदेवं यजामह इति मां यजन्ते ते मद्याजिनो मामेव यान्ति इत्यनेन च सम्बुद्ध्यर्था स्वेच्छया मामे वैष्यन्ति यतमहमिति पाठभेदस्य च्यवनधर्माण इत्यस्य च प्रत्यभिज्ञापनं स्वग्रन्थकृत मवगम्यते ॥९॥ एवं चतुर्विधा मम जना भक्ता एव हि ते श्रुता इत्यत्र ते भक्ता एव हि श्रुता इति कथं चिदुक्तत्व समर्थनवाग्भङ्गीस्वारस्य पर्यालोचनेऽपि तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकमिति नवमाध्यायस्थायाः देवतान्तरभक्तानां भगवद्भक्तत्वसमर्थनशैल्या एव प्रत्यभिज्ञा जायते ॥१०॥ तस्मादिदं मोक्षधर्मवचनजातं भगवद्भक्तानामेवापुनरावृत्तिलक्षणमोक्षः स्यादिति देवतान्तरभक्तानान्तु सुदूरमपि गत्वा पुनरावृत्तिलक्षणं च्यवनधर्मत्वमवर्जनीयमेवेत्येतदर्थप्रतिपादनपरं नवमाध्यायसमानप्रकरणमेव न तु भक्तावान्तरविभागपरेण चतुर्विधा भजन्ते मामित्यादि सप्तमाध्यायस्थश्लोकेन समानप्रकरणमिति प्रतिभातीति ॥११॥

ईदृश निर्वाहक्रमश्च श्रीमत्कृष्णपादसूरितनयेन ज्ञानाधिराजसूरिणा रहस्यत्रयार्थकारिकाग्रन्थे चरमश्लोकाधिकरणादौ 'चतुर्विधाः मम जनाः' इत्येतदपि संमतम् ॥ देवतापितृभूतात्मकममभक्ताश्चैव समाराधयन्ति मद्याजिनश्श्रेष्ठाः च्यवन्त्यन्ये ऽन्यदेवताः ॥ मद्भक्ताश्च्यवनधर्माणः इति तत्कारिकार्थाभिदित्यभिप्रायात् ॥

रहस्यत्रयतात्पर्यदीपिकाकारैरपि मूलमन्त्राधिकारस्थान्ते दर्शितमोक्षधर्मवचनजातं मुक्ताभिप्रायकतयापि योजितम् ।

अस्य वचनजातस्य॥ सप्तमाध्याय समान प्रकरणतावादिनस्सवेष मनतपन्ते । चतुर्विधा भजन्ते मां जनाः इत्यादि मोक्षधर्मवचन जातस्य गीता सप्तमाध्याय समान प्रकरणत्वमेव युक्तं - अधिकारि चातुर्विध्य कीर्त नस्य तत्रैकविधाधिकारिश्रेष्ठयवर्णनस्ये तराधिकारित्रयव्यावृत्त ताहशैकविधाधिकारिगत भगवदेक प्राप्यकत्व लक्षण श्रेष्ठय बीज प्रदर्शनस्यच प्रकरणद्वयैककण्ठ्य प्रत्यभिज्ञापकत्वात् ॥१॥ यान्ति देवव्रतादेवा नित्यादि नवमाध्याय श्लोकोक्तानां दैवादिभक्तानामर्थ चतुर्विधत्वेपि तत्र तदकथनेन चतुर्विधत्वे तात्पर्यविरहात् - ताहशाना मनेकविधत्व सम्भवेन चातुर्विध्य व्यवस्थि त्ययोगाच्चा त्यत्र चतुर्विधत्वेन निर्दिष्टाधिकारि चतुष्टय विषयत्व मेवास्य स्वारसिकं ॥२॥ अतएवच - चतुर्विधा भजन्ते मां जना इत्याद्यर्धानन्तरं - आर्तो जिज्ञासुरर्थार्थी ज्ञानीचेति पृथक्पृथगिति क्वचित्पाठेपि हश्यमान स्संगतो भवति ॥३॥ इत्थञ्च - तेषां ज्ञानी नित्ययुक्त एकभक्ति र्विशिष्यत इति गीता सप्तमाध्याय प्रकरणस्थ ज्ञानि श्रेष्ठयपर सप्तदशश्लोके ज्ञानि श्रेष्ठय हेतुतया ऽभिधीयमान नित्ययुक्तत्वैक भक्तित्व प्रतिकोटिभूत मितराधिकारिणा मश्रेष्ठय बीजतया तत्र विवक्षितं नित्ययुक्तत्वादि राहित्य पर्यवसन्नं च्यवनधर्मत्व मेवेहापीतराधिकारिणा मश्रेष्ठय बीजतया ऽभिधीयते ॥४॥ पुनरावृत्ति मत्त्वलक्षणं च्यवनधर्मत्वन्तु नेह विवक्षितं - तथा सति गीताशास्त्रे ज्ञानि जिज्ञास्वो रुभयो रपुनरावृत्ति मत्त्व स्यैश्वर्यार्थिन एक स्यैव पुनरावृत्तिमत्त्वस्यचा भिधानेन - इह प्रतिबुद्ध शब्दित ज्ञानीतराधिकारि द्वयस्य पुनरावृत्तिमत्त्वा भिधाने परस्पर विरोधापत्तेः ॥५॥ इदं किलात्राभि मतं - श्रेष्ठाधिकारिणो भगवत एव परमप्राप्यतया तत्कैङ्कर्यादि लक्षण तदुपासनात्मक धर्मानुष्ठान सहित तदसहवास रूप स्तेनसहयोग स्तस्याधिकारिणंप्रति स्वयं पुरुषार्थभूतो यावदात्मभा व्यनुवर्तत इति सोधिकारी नित्ययुक्त इत्युच्यते । इतरयोस्तु विल-

क्षणा चित्तत्व प्रकृतिवियुक्तात्मस्वरूपलक्षण भगवदितर प्राप्य तदनुभव लक्षणै श्वर्यकैवल्यरूप पुरुषार्थान्तरपरतया दर्शितधर्मानुष्ठान लक्षणयोगस्य स्वाभिलषित पुरुषार्थान्तर साधनमात्रतयैवा पेक्षितत्वेन नद्दीतरणानन्तरं प्लवपरित्यागव त्स्वाभिलषित प्राप्त्यनन्तरं प्रहाणादेव तादृश धर्मो निवर्तत इति च्यवनधर्मत्वं नित्ययुक्तत्व प्रतिकोटि भूत त्तयो रभिधीयत इति ॥६॥ तथाच – च्यवनधर्माण इत्यनेन – च्यवनः कालविशेषे निवर्तनशीलः – धर्मः – अपेक्षित श्रेयस्साधन भूतः कैंकर्यादिरूपोपासनलक्षण स्स्वामि प्रीतिहेतु व्यापारः – येषान्ते च्यवन धर्माण इत्यर्थकेन सेव्य सेवकभाव लक्षण धर्मनिवृत्तिरूपो नित्य योगाभावएवे हाभिधीयत इति नात्र कैवल्यार्थिनः पुनरावृत्तिं प्रति पादनगन्धः ॥७॥ अतएव चात्र – च्यवनधर्माण इति धर्मपदप्रयोग सार्थक्यं – अन्यथा – नतु मा मभिजानन्ति तत्त्वेनातश्च्यवन्तित इत्य त्रेव च्यवनशब्द मात्रेणैव पुनरावृत्ति लाभेन, धर्मशब्द वैयर्थ्यात् ॥८॥ ज्ञानिन स्तदितरयोश्च प्रधानतम परस्पर व्यावर्तक धर्मतया गीताशास्त्रे बहुषु स्थले ष्वसकृ दभिधीयमानं नित्ययुक्तत्व तद्राहित्यरूपं परस्पर वैलक्षण्य मिहा प्यवश्य मभिधातव्य मेवेति तदभिधान मेवोचितं ॥९॥ गीता सप्तमाध्यायस्थ दर्शित प्रकरण गतस्य · तेषां ज्ञानी नित्ययुक्त एकभक्ति र्विशिष्यत इत्यादि सप्तदश श्लोकस्य भाष्ये भाष्यकारैः – तेषां ज्ञानी विशिष्यते · कुतः · नित्ययुक्त एक भक्तिरितिच · तस्य हि मदेकप्राप्यस्य मया योगो नित्यः · इतरयोस्तु यावत्स्वाभिलषित प्राप्ति मया योगः · तथा · ज्ञानिनो मय्येकस्मिन्नेव भक्तिः · इतरयोस्तु स्वाभिलषिते तत्साधनत्वेन मयिच · अत सएव विशिष्यत इति भाष माणै स्तदिदं सर्वं वैलक्षण्यं स्पष्टमेव निरूपितं ॥१०॥ अत्राभिधीय मानो योग स्सेव्यसेवक भावेन सहवर्तन लक्षणो गुणानुभव कैंकर्यरूपधर्म एव पर्यवस्यति – परमात्मनो विभुत्वेन यथा कथंचि

संयोगादिलक्षणस्य तदीयान्यादृशयोगस्य व्यावर्तकत्व कादाचित्कत्वा द्ययोगात ॥ ११ ॥ अत एव - सततं कीर्तयन्तो मां यतन्तश्च दृढ व्रताः । नमस्यन्त श्च मां भक्त्या नित्य युक्ता उपासत इति गीता नवमाध्याय चतुर्दशश्लोकभाष्ये - नित्ययुक्ताः - नित्ययोगं कांक्षमाणाः- आत्मान्तं मद्दास्यव्यवसायिन इति व्याकुर्वाणै र्भाष्यकारै रेव भाषितम् नित्ययुक्तशब्दार्थघटकयोगस्य यावदात्मभावि नित्यकैंकर्य पर्यवसन्न तच्छ्लोकोक्त परिचर्यायुक्त सततसहवासरूपत्वम् ॥१२॥ येतु सर्वाणि कर्माणि मयि सन्न्यस्य मत्पराः । अनन्येनैव योगेन मां ध्यायन्त उपासत इति द्वादशाध्याय षष्ठश्लोकभाष्येपि - मत्पराः- मदेकप्राप्याः - अनन्येनैव योगेन - अनन्यप्रयोजनेन योगेन - मां ध्यायन्त उपासते - ध्यानार्चन प्रणाम स्तुति कीर्तनादीनि स्वय मेवा त्यर्थप्रियाणि प्राप्यसमानि कुर्वन्तो मा मुपासत इत्यर्थ इति योग शब्दो गुणानुभवकैंकर्यलक्षणधर्मपरो व्याख्यातः ॥ १३ ॥ तथा च - सेव्यसेवकभावलक्षणो यो धर्म स्साधनानुष्ठानदशायां स्वस्वप्राप्य प्राप्तिसाधनत्वेन त्रयाणा मधिकारिणां साधारणो ऽपेक्षितः - स धर्मो ज्ञानिनः प्रापकरूपः प्राप्यरूपश्चे त्यत स्स्वय मेवा यं पुरुषार्थभूत स्सन् प्राप्यदशाया मपि याव दात्मभावी ज्ञानिनो न च्यवते - अन्ययो स्तय मैश्वर्यकैवल्यपुरुषार्थयो स्स्वयं साधनमात्रभूत स्सन् साध्य निष्पत्तौ च्यवत इत्यय मंशो ऽत्राभिधीयते सर्वे च्यवनधर्माण इ त्यनेनेति नात्र कश्चि द्विरोधः ॥ १४ ॥ एष धर्मो ज्ञानिनः प्रापक रूपः प्राप्यरूपश्चेती दृशं वैचित्र्यं गीताशास्त्रे ऽसकृ दुच्यते ॥१५॥ यथोक्तं नवमाध्यायद्वितीयश्लोके - प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तु मव्यय मिति - द्वादशाध्यायान्त्यश्लोके - येतु धर्म्या मृत मिदं यथो क्तं पर्युपासत इति च ॥ १६ ॥ एव मन्यत्रापि नित्ययुक्तादिशब्दै रिद मेवा भिहितं द्रष्टव्यम् ॥ १७ ॥ दर्शितनवमाध्याय द्वितीयश्लोक भाष्ये - धर्म्यं धर्मा दनपेतं - धर्मत्वं हि निश्श्रेयससाधनत्वम् -

स्वरूपेणैवात्यर्थप्रियत्वेन तदानी मेव मद्दर्शनापादनतया च स्वयं निश्श्रेयसरूप मपि निरतिशय निश्श्रेयसरूपात्यन्तिक मत्प्राप्तिसाधन मित्यर्थ इति - दर्शितद्वादशाध्यायान्तिमश्लोकभाष्ये - धर्म्यं च्या मृतं चेति धर्म्यामृतं - येतु प्राप्य स्वमं प्रापकं भक्तियोगं - यथोक्तं - मय्यावेश्य मनो ये मा मित्याद्युक्तेन प्रकारेण पासते - ते भक्ता अतितरां मम प्रिया इति च भाषमाणै र्भाष्यकारैः पीदृशं वैचित्र्यं स्फुटमेव व्याख्यातम् ॥ १८ ॥ तस्मा दिहोच्यमानं च्यवन धर्मत्वं न पुनरावृत्तिमत्त्वरूपं - अपि तु यथोक्तरूप मेवेति सम्य गवधार्यताम् ॥ १९ ॥ अह मेव गति स्तेषां निराशीः कर्मकारिणां । येतु शिष्टा स्त्रयो भक्ताः फलकामा हि ते मताः ॥ सर्वे च्यवन धर्माण इ त्यत्रैव वचने - अह मेव गति रित्यार्धेन ज्ञानिनां भगव दितरफलान्तराभिसन्धिरहित कर्मकारित्वपूर्वकं भगवदेकप्राप्यत्व मभिधाय - हि यस्मात - ते फलकामाः - भगवदितर स्वस्वाभिमत फलान्तरकामा मताः - तत एव हेतोः - ते सर्वे च्यवनधर्माण इत्युक्तया दर्शितगीताभाष्योक्तएवार्थ श्च्यवनधर्मत्वरूप स्स्पष्ट सुचयत इत्यवगम्यते ॥ २० ॥ अत्र अह मेव गति स्तेषा मिति भग वदेकप्राप्यत्वं ज्ञानिना मभिधाय तत्प्रतिकोटितया ऽन्येषा मभिधीय मान मिदं फलकामत्वं भगवत्प्राप्तीतरप्रयोजनविशेषकामत्वरूपमेव - तन्निमित्तीकृत्या भिधीयमान मिदं च्यवनधर्मत्वं दर्शितनित्ययुक्तत्वा भावरूप मेवेति हि स्पष्ट मेवोपलभ्यते - च्यवनधर्मत्वस्य पुनरावृत्तिमत्त्वरूपत्वे फलान्तरकामताया स्तद्धेतुत्वासम्भवात् - भगवदुपासनादिलक्षणस्वरूपानुगुण धर्मविशेषच्युतिरूपत्वे च फलदशाया मुपायानुवृत्त्यनावश्यकत्वेन फलान्तरप्राप्तिदशायां तदुपायमात्रतया ऽभिमत भगवत्सेवनलक्षणधर्मनिवृत्त्यवश्यंभावेन फलान्तरकामताया स्तद्धेतुत्व सम्भवाच्च ॥ २१ ॥ नच - सर्वे च्यवनधर्माणः प्रतिबुद्धस्तु मोक्षभा गिति प्रतिबुद्धाधिकारिणो ऽपुनरावृत्तिलक्षण मोक्षरूपफलाभिधान

दर्शनेन तत्प्रतिकोटितया प्रतिबुद्धेतराधिकारित्रयस्या भिधीयमान मिदं च्यवनधर्मत्वं पुनरावृत्तिमत्स्वरूपं किं न स्या दिति वाच्यम् - सर्वे च्यवनधर्मा स्ते प्रतिबुद्धस्तु श्रेष्ठभागित्येव तत्र पाठदर्शनात - तत्पाठे च - तेषा मेकान्तिन श्रेष्ठा इत्युपक्रान्त श्रेष्ठत्वस्यैव - श्रेष्ठभा गित्यनेनोपसंहारदर्शनेन भगवत्प्राप्तिलक्षणस्वरूपानुगुण परमपुरुषार्थ स्यैव श्रेष्ठफलरूपतया तद्भाजां प्रतिबुद्धानां निरुक्तधर्मविशेष प्रच्युतिविरहेण तत्प्रतिकोटितया प्रतिबुद्धेतरेषां निरुक्तधर्मविशेष प्रच्युतिमत्स्वरूप च्यवनधर्मत्वस्यैवा भिधानौचित्येन दर्शितशंकानव काशात - समानप्रकरणदर्शित गीताग्रन्थानुगुण्येन दर्शितपाठस्यैव प्रामाणिकत्वाच्च ॥ २२ ॥ इद मत्रावधेयम् - समानप्रकरणदर्शितगीता ग्रन्थे चतुर्विधाधिकारिमध्ये ज्ञानिशब्दनिर्दिष्टाधिकारिणः - तेषां ज्ञा- नी नित्ययुक्त एकभक्ति र्विशिष्यत इत्यादिना श्लोकत्रयेण नित्य युक्तत्वैकभक्तित्व भगवदेकानुत्तमगतिकत्व परमप्राप्यप्रापकादि सर्व प्रकार वासुदेवप्रपन्नत्वादिभि रधिकार्यन्तरेभ्य श्श्रेष्ठत्वदुर्लभत्वा- दिकमुक्तं - प्रत्युत तत्र जिज्ञासुशब्द निर्दिष्टाधिकारिणो ऽ पुनरावृत्ति लक्षण प्रकृतिवियुक्तात्मस्वरूप प्राप्तिरूपमोक्षः फल मुच्यते स्पष्टं - अपुनरावृत्तिश्च ज्ञानि जिज्ञास्वो रुभयो स्तुल्यरूपैव प्रतिपाद्यते - अन योर्वैषम्यन्तु स्वस्व प्राप्यभूत परमात्म प्रत्यगात्मनो स्सुमेरुसर्षप सह स्रांशुखद्योतादिव त्स्वतुस्सिद्धातिमात्रोत्कर्षापकर्षलक्षण तारतम्य मात्रनिबन्धन मित्यपि स्फुटमुच्यते - अर्चिरादिगतिश्चोभयो स्साधारणी प्रतिपाद्यते -नच मोक्षभिन्न पुरुषार्थस्य सागतिः क्वचिदुच्यते-नवा मोक्षो प्यनित्यः - एवं समानप्रकरणे महता ग्रन्थेन विशदतमं दर्शिताधि कारि चतुष्टयस्वरूप फलगतया ह्यभिधानेन तद्विरोधेनेह - सर्वे च्यव- नधर्माणः प्रतिबुद्धस्तु मोक्षभागितिपाठः प्रामादिकः प्रक्षिप्तोवेति सम्भावनीयो वर्तते - नचासौ पाठो ऽ यतनकोशेषु क्वचिदपि दृश्यते - दृश्यतेच - सर्वे च्यवनधर्मास्ते प्रतिबुद्धस्तु श्रेष्ठभागित्येव सर्वत्रपाठः-

अनुगुणश्चायं पाठो गीतादि समान प्रकरण ग्रन्थस्य स्वीयपूर्वोत्तर सन्दर्भस्यच - अस्यचाय मर्थः - प्रतिबुद्धेतराधिकारित्रय प्राप्य प्रकृति तत्त्व प्रत्यगात्मतत्त्वरूप पुरुषार्थेभ्यः परमात्मतत्त्वरूप श्रेष्ठ पुरुषार्थ भाक् प्रतिबुद्धः - अतो ऽस्याधिकार्यन्तरेभ्य श्श्रैष्ठ्यं पूर्वोक्तमिति तदिदं प्रतिबुद्धाधिकारि पुरुषार्थश्रैष्ठ्यं गीताशास्त्रे ष्यष्टमाध्याये पञ्चदशश्लोक प्रभृति द्वाविंशश्लोकपर्यन्त ग्रन्थे तत्तदधिकारि प्राप्य वस्तु विनाशित्वा विनाशित्वोत्कर्षापकर्ष प्रतिपादनपरे प्रथमत ऐश्वर्यार्थि कैवल्यार्थि प्राप्य वस्तु तदुत्कर्षापकर्ष तारतम्याभिधानानन्तरं ज्ञानि प्राप्यस्य सर्वोत्कृष्ट पुरुषार्थरूपता प्रतिपादनपरेण - पुरुष स्सपरःपार्थभक्त्यालभ्य स्त्वनन्येत्यादि द्वाविंशश्लोकेन स्पष्टमुच्यते - अतएवोक्तं तच्छ्लोकाव तरणिकाभाष्ये ज्ञानिनः प्राप्यन्तु तस्मादत्यन्त विभक्त मित्याहेति कैवल्यार्थि भगवत्प्राप्त्यर्थिनोः प्राप्यतारतम्यमात्रं - उक्तश्च तदुत्तर श्लोकावतरणिकाभाष्ये - ' अथात्मयाथात्म्यविदः परमपुरुष निष्ठस्य च साधारणी मर्चिरादिकां गतिमाह । द्वयोर प्यर्चिरादिकागतिःश्रुतौ श्रुता । साचापुनरावृत्ति लक्षणे ' त्यनयो रुभयोर प्यविशेषे णार्चिरादि गतिमत्त्व मपुनरावृत्ति मत्त्वंच - एवं सति कथ मिह प्रतिबुद्धेतरेषां सर्वेषा मविशेषेण पुनरावृत्तिमत्त्व मभिधीयेत - तस्मात् सर्वे च्यवन धर्मास्ते प्रतिबुद्धस्तु श्रेष्ठभागित्येव पाठस्या यनकोशेषु सर्वत्र दृश्यमानत्वा त्तस्यैवच प्रमाणान्तर समान प्रकरण स्व प्रकरण पूर्वोत्तर सन्दर्भादीना मनुगुणत्वाच्चा न्यादृशःपाठः प्रामादिकः प्रक्षिप्तोवेति सम्भाव्यते - ततो न तेन कैवल्यार्थिनः पुनरावृत्ति मत्त्व शंकापि सुकरेति ॥२३॥ अस्तु वा कथंचि दयमपि पाठः प्रामाणिकः ॥२४॥ तथापि - शब्दस्य स्व प्रतिपाद्य मुख्यतमार्थएव प्रथमं प्रवृत्त स्तत्य मोक्षशब्दस्य भगव त्प्राप्ति लक्षण मुख्यमोक्ष परतया तत्र निरुक्त धर्म विशेष प्रच्युति विरहेण तदुपादन मुखेन यथोक्त रीत्यैव प्रतिबुद्धस्य श्रैष्ठ्य मिहा भिधित्सित मिति न प्रमाणान्तर समान प्रकरणादि विरुद्धार्थ परता

अस्य प्रकरणस्य केन चिं त्सुवचा ॥ २५॥ इदं पुन रत्र बोद्धव्यं - मोक्ष शब्दो हि प्रतिबन्धक निवृत्ति मात्र परः - नत्वपुनरावृत्ति परः- मोक्षशब्देन प्रतिबुद्धस्या पुनरावृत्तिमत्वे साक्षात्प्रतिपाद्यमाने सत्येवच- च्यवनधर्माण इत्यनेन तत्प्रतिकोटितया प्रतिबुद्धेतरेषां पुनरावृत्तिमत्वं स्वरसतः प्रतीतंस्यात् - नचेह तदस्ति - परन्तु मोक्षेसति पुनरावृत्ति राहित्यस्य वस्तुतो विद्यमानतया मोक्षशब्देन परम्परया तत्प्रतिपादन सिद्धि मभिप्रेत्य तत्प्रतिकोटितया च्यवनधर्माण इत्यनेन पुनरावृत्तिः प्रतिपाद्यत इति वक्तव्यं - तथा सति - परम मोक्षे निरुक्तधर्मविशेष प्रच्युतिराहित्यस्यापि वस्तुतो विद्यमानतया मोक्षशब्देन परम्परया तत्प्रतिपादन सिद्धिमेवा भिप्रेत्य तत्प्रतिकोठितया प्रतिबुद्धेतरेषां निरुक्तधर्मविशेष प्रच्युतिमत्वमेव प्रमाणान्तराद्यानुगुण्येन स्वरसतः प्रतिपादयितुं शक्यं - मोक्षशब्दस्यच भगवत्प्राप्तिलक्षण मुख्यमोक्ष एव प्रथमतरं प्रवृत्ति र्युक्ता - प्राधान्यातिशयात् - सा विद्या या विमुक्तय इति विद्याशब्दस्य प्राधान्यातिशयेन मोक्षविद्यापरतया प्रवृत्तिन्यायात्- एते वै निरयास्तात स्थानस्य परमात्मन इत्युक्तन्यायेन तत्वज्ञानां तद्दृष्ट्या न्यस्य मोक्षशब्देन व्यपदेशानर्हत्वात - कैवल्य हेतु भगव त्संकल्पस्यापि भगवत्प्राप्तिविशेष प्रतिबन्धकत्वा विशेषेण मुक्तिर्मोक्षो महानन्द इत्यादि कोश सिद्ध रूढि शक्यतावच्छेदक द्वारेनच मोक्षशब्दस्या स्मिन्नेवार्थे प्रवृत्ति निमित्त पौष्कल्य सद्भावाच्च - अतः - प्रतिबुद्धस्तु मोक्षभागिति प्रतिबुद्धस्य कैवल्यार्थिनोपि व्यावृत्ततया निर्देश उपपद्यत इति ॥ २६ ॥ ते चैवानन्यदेवता इति प्रतिबुद्धान सेवन्त इतिच प्रतिबुद्धानां देवतान्तर सेवन राहित्येन तर व्यावृत्त तया ऽभिधानन्तु - इत रेषां भगवद्भक्तानामप्यत्र विवक्षिताधिकारिणां परिमित फलान्तर सङ्गित्व निबन्धनं किञ्चि द्देवतान्तरसेवन मवर्ज नीयं - कार्त्स्न्येन परिमित फलत्यागिनां प्रतिबुद्धानामेव तन्नास्ती त्यभि प्रायकं ॥२७॥ एतद्वचन प्रामाण्यादेव च परिमित फलस्य देवतान्तर

सेवन नियतत्व मभ्युपगम्यते ॥२८॥ अत एवोक्तं वेदान्ताचार्यैरपि श्रीपाञ्चरात्र रक्षायां तृतीयाधिकारे परमैकान्तिपद व्याख्यानावसरे - एवं परिमितविषयत्यागिनां परिमित देवतान्तरत्यागो नियतोभवति - कांक्षन्तः कर्मणां सिद्धिं यजन्त इह देवताः । क्षिप्रंहि मानुषेलोके सिद्धिर्भवतिकर्मजा । ब्रह्माणं शितिकण्ठंच याश्चान्या देवतास्स्मृताः । प्रतिबुद्धानसेवन्ते यस्मात्परिमितं फलमिति परिमित फलसंग तद् भावाभ्यां देवतान्तर सम्बन्धासम्बन्ध प्रतिपादनादिति ॥२९॥ वस्तु तस्तु - तेचैका नन्यदेवता इत्यनेन प्रतिबुद्धानां तत्प्रकरण विवक्षिता-धिकार्यन्तरेभ्यो देवतान्तरसेवन राहित्येन व्यावृत्तता न विवक्षिता - अपितु भगव दनन्यप्राप्यत्वेनैव - अहमेव गतिस्तेषां निराशीः कर्म कारिणा मित्युत्तरेणार्थेन - अनन्यदेवता इत्यस्या नन्यप्राप्यत्वविषयतया ऽ तुपदमेव विवृतत्वात् - अन्या - स्वप्राप्यादन्या · देवता - प्रापकतया स्वोपास्यादेवता - येषान्ते ऽ न्यदेवताः - ते न भवन्ती त्यनन्यदेवताइति व्युत्पत्त्या - अनन्या - स्वप्राप्यादभिन्ना - देवता - प्रापकतया स्वोपास्या देवता - येषान्ते ऽ नन्यदेवता इति व्युत्पत्त्यावा भगव दनन्यप्राप्यत्वस्य शब्देनैव स्वरसतोलाभात् - भगवन्त मुपास्य तेन विलक्षणा चित्तत्त्व प्रकृतिवियुक्त प्रत्यगात्म तत्त्वरूप प्राप्यान्तर साधनपरै रैश्वर्यार्थि कैवल्यार्थि व्यावर्तकतया भगवदनन्यप्राप्यत्वस्या व्याहतत्त्वाच्च ॥३०॥ ब्रह्माणं शितिकण्ठं चेत्यादिश्लोके · प्रतिबुद्धानसेवन्त इत्यभिधानन्तु न प्रतिबुद्धानां देवतान्तर सेवनराहित्येन तत्र विवक्षिताधिकार्यन्तर व्यावृत्ति प्रदर्शनाभिप्रायकं - अपितु नैमित्तिकेषु तेषामपि देवतान्तर सेवनस्य प्रसक्तत्वेन भगवदेक प्राप्याणां तेषां तादृश देवतान्तरस्य तत्सेवन रूपधर्मस्यच्च प्रापककोटिमात्र निविष्टतया प्राप्यदशाया मनुवृत्ति विरहेणा न्य देवतत्वं च्यवनधर्मत्वंचा वर्जनीय मित्याशंकायाः ब्रह्माणं शितिकण्ठं चेत्यादिना · भक्तं प्रतिविशेषस्त एष पार्थानुकीर्तित इत्यन्तेन ग्रन्थेन - नित्य नैमित्तिकेष्वपि कर्मसु प्रतिबुद्धानां परिमित

फलहेतु देवतान्तरसेवनं नास्त्येव - तत्रापि तत्तदन्तर्यामिणः परमात्मन एव ते स्तै शब्दै र्विवक्षितस्य तेषा माराध्यत्वात् - नचायं प्रतिबुद्धाना मेव विशेषः - अपितु देवतान्तर भक्तेभ्यो व्यावृत्तः कृत्स्नस्यैव भगवद्भक्तस्यायं विशेष इत्येवं परिहारमात्र तात्पर्यकमेव - सम्बुद्ध चर्यास्सेवन्त इत्यादि तत्रत्य पाठान्तरेण - नतुमामभिजानन्ति तत्त्वेना तश्चयवन्तित इत्यनेन गीतावचनेन चैकार्थ्यात् ॥२१॥ सम्बुद्धचर्या स्सेवन्त इत्यादे श्चायमर्थः - सम्बुद्धचर्याः - सर्वान्तरात्मभूत परमात्म याथात्म्य ज्ञानगर्भ कर्मयोगनिष्ठाः प्रतिबुद्धाः ब्रह्मादीन् - तदन्तर्या मिणं :परमात्मानमेव साक्षादाराध्य मनुसन्धाय - ब्रह्मार्पणं ब्रह्म हवि र्ब्रह्माग्नौ ब्रह्मणाहुतं । ब्रह्मैवतेन गन्तव्यं ब्रह्म कर्म समाधिनेति गीता चतुर्थाध्याय चतुर्विंश श्लोकोक्त न्यायेन- [साक्षादाराध्यादिभूतं परमात्मानंप्रति पीठादिमात्र स्थानीयतया सेवमानाः - सर्वस्मात्परंयत् - तत्परब्रह्मभूत स्माविष्यन्तीति ॥२२॥ इत्थश्च चतुर्णामप्यधिकारिणां भगवदेकभक्तत्वेपि नक्षतिः ॥२३॥ तथाच - मोक्षधर्मप्रकरणेपि - आर्तो जिज्ञासुरर्थार्थी ज्ञानीचेति पृथक्पृथगि त्यर्धस्यापि क्वचित्पाठदर्शना दनेकैः प्रत्यभिज्ञापकैः प्रकरणद्वयैककण्ठ्यावगमाच्च दर्शित मोक्षधर्म वचनजातं दर्शित गीता सप्तमाध्यायवचन समान प्रकरणमेवाभ्युपगन्तुं युक्तमिति ॥९७॥

अयं सप्तनवतितमवाक्योक्त योजना भेदकल्पः - अधिकारिणां चतुर्विधत्व कीर्तनस्वारस्यं - आर्तो जिज्ञासुरर्थार्थी ज्ञानीचेति पृथ क्पृथगित्यर्धस्यापि क्वचित्पाठदर्शनंचो पजीव्यप्रवृत्तः ॥९८॥

दर्शितार्धश्लोक सद्भाव पाठश्च, तत्त्वदीपे द्वय प्रकरणे वादिकेसरि सौम्यजामातृमुनिभिः - तत्त्वत्रयरहस्य तृतीयप्रकरण व्याख्याने वरवर मुनिभि श्चोदाहृतो दृश्यते ॥९९॥

प्राक्चतु र्नवतितमवाक्योक्त योजनाभेदकल्पस्तु - तेचैवा नन्य देवता इति पदस्वारस्यं - प्रतिबुद्धा न सेवन्त इत्यस्य प्रतिबुद्धानां

प्रकरणपठितेतर त्रिविधाधिकारिव्यावृत्तिप्रतिपादकता स्वारस्यश्चोपजीव्य दर्शिताधिकार्थं पाठानादरेणप्रवृत्तः ॥ १०० ॥

वयन्तु मन्यामहे ॥ दर्शितमोक्षधर्मवचनजातस्य दर्शित गीतासप्तमाध्याय वचनोक्ताधिकारि चतुष्टयविषयत्वेपि 'च्यवनधर्माण' इत्यस्य पुनरावृत्तिमत्त्वार्थकत्वस्वीकारेपि च स्वरसतएवा विरोधेनसन्दर्भ निर्वाहस्सम्भवति । दर्शितमोक्षधर्मवचनजाते दर्शित गीतासप्तमाध्यायप्रकरणेच भगवद्भक्तेष्वेव, कस्यचिदितरेभ्यो व्यावृत्ते भगवद्भक्तानां देवतान्तरभक्तेभ्यो व्यावृत्तेश्चोभयोरेव प्रतिपिपादयिषितत्वेन यथायथं तत्तदंशानां तत्तद्विषयत्वसम्भवात् ॥ १ ॥ दर्शित नवमाध्यायप्रकरणस्य दर्शित सप्तमाध्यायप्रकरणशेषत्वेना नयोरुभयो रेकप्रकरणत्वेन न भिन्नप्रकरणत्वानुसन्धानं युक्तम् ॥ २ ॥ यत सप्तमाध्यायप्रकरणप्रतिपिपादयिषितार्थस्यैव विशदनिरूपणपरं दृश्यते नवमाध्यायप्रकरणम् ॥ ३ ॥ तथाहि – गीतासप्तमाध्याये दर्शितप्रकरणस्य भगवद्भक्तेषु ज्ञान्याख्याधिकारिणो भगवद्भक्तान्तर देवतान्तरभक्तरूप कृत्स्नाधिकार्यतरापेक्षया श्रैष्ठ्यं परमदुर्लभत्वश्च प्रधानप्रतिपाद्यम् ॥ ४ ॥ इदं ज्ञानीतरसकलाधिकारिणां स्वरूपस्वभावप्रतिपादनपूर्वकं ज्ञान्यपेक्षयाऽपकर्षप्रतिपादनं ज्ञानिदशाया दुस्तरं बहुतर विरोधिनिवर्तनपूर्वक प्राप्यता प्रतिपादनं चान्तरेण प्रतिपादयितुं न शक्यते ॥ ५ ॥ अत सर्वेषां भगवद्भक्तानां देवतान्तरभक्तानां च स्वरूपस्वभावादिवर्णनमिह प्रस्तुतमेव ॥ ६ ॥ अतएव – गीता सप्तमाध्याये 'चतुर्विधाभजन्तेमा' मित्यादि षोडशश्लोके चतुर्विधभगवद्भक्ता न्निरूप्य 'तेषां ज्ञानी' त्यादि सप्तदशश्लोकप्रभृति श्लोकत्रयेण ज्ञानिनस्स्वेतर सकलभगवद्भक्तेभ्य श्श्रैष्ठ्यम्प्रतिपाद्य, तत्रैकोनविंशश्लोके–'समहात्मासुदुर्लभ' इति तस्य दुर्लभत्वमपि प्रस्तुत्य, 'कामै स्तै स्तै र्हृतज्ञानाः प्रपद्यन्ते ऽन्यदेवता' इत्यादि विंशश्लोकमारभ्य – 'येषां त्वन्त गतंपापं जनानां पुण्यकर्मणां । ते द्वन्द्वमोह निर्मुक्ता भजन्तेमां दृढव्रताः ॥'

इत्यष्टाविंशश्लोकान्तेन ग्रन्थेन – तै स्तैः कामै र्हृतज्ञानतया तत्तत्सि द्ध्यर्थं देवतान्तराण्येव प्रपद्यमानानां मनादिपापवासनाबळ मो मुह्यमा-नतया भगवत्प्रभावमजानतां लोकानां सहसाभगवद्भजनौन्मुख्यगन्ध एवनविद्यते – अपि त्वनेक जन्मार्जित सुकृतसंचयेन ये क्षीणपापा स्त एव भगवन्तं प्रपद्यन्तइति भगवद्भक्तदशायाएव दुर्लभत्वप्रतिपाद नमुखेन ज्ञानिदशाया स्सुदुर्लभत्वं, देवतान्तर भक्तानां मन्तवत्फळ तया ऽनन्तफळानां भगवद्भक्तानां तेभ्यो व्यावृत्तत्वं च प्रतिपा द्यते ॥ ७ ॥ तत्र – “ अन्तवत्तु फलन्तेषां तद्भवे दल्प मेध-सां । देवान् देवयजोयांति मद्भक्तायान्ति मामपी ” ति त्रयोविंशश्लोके देवतान्तरभक्त भगवद्भक्ताना मन्तवत्फळत्वानन्तफ ळत्वाभ्यां वैषम्य मुच्यते ॥ ८ ॥ एतदेवच वैषम्यं – नवमा ध्याये – “ त्रैविद्यामां सोमपाः पूतपापा ” इत्यादि विंशश्लोक प्रभृतिना – यान्तिदेवव्रता देवा नित्यादि पंचविंशश्लोकान्तेन ग्रन्थेन विशदतरमुच्यत इति नदर्शित सप्तम नवमाध्याय ग्रन्थयोर्भिन्न प्रकरणता ॥ ९ ॥ इत्थंच दर्शित सप्तमनवमाध्याय ग्रन्थप्रतिपा दितं भगवद्भक्त देवतान्तर भक्तरूप सकलेतराधिकारिभ्यो ज्ञा न्यधिकारिणः श्रैष्ठ्यमेव दर्शित मोक्षधर्मप्रकरणेनापि प्रतिपाद्यत इति नात्र विरोधगन्धः ॥ १० ॥ दर्शित मोक्षधर्मवचनजातेच ‘ चतुर्विधा ममजना ’ इत्यनेन ‘चतुर्विधाभजन्तेमा’ मित्युक्त चतुर्वि-धभक्त निर्देशएव क्रियते ॥ ११ ॥ ‘ तेषा मेकान्तिन श्श्रेष्ठा ’ इतिच ‘ तेषां ज्ञानीनित्ययुक्त ’ इत्यादि वज्ज्ञानिनिर्देशः ॥ १२ ॥ येचै-वानन्यदेवता स्तेषा मेकान्तिनश्श्रेष्ठाइति योज्यम् ॥ १३ ॥ येचेमे भगवदनन्यदेवताएव चतुर्विधाभक्तानिर्दिष्टा स्तेषा म्मध्य एकान्तिन एवश्रेष्ठा इतितदर्थः ॥ १४ ॥ ‘ येचैवानन्यदेवता ’ इत्येवपाठस्सं प्रति सर्वत्र दृश्यते ॥ १५ ॥ ‘ तेचैवा नन्यदेवता ’ इति पाठेपि तच्छ-ब्दः पूर्वतच्छब्द समानविषयएव ॥ १६ ॥ चकारेणैकान्तिना

मपि समुच्चयेनतु सर्वेषा मप्यनन्यदेवताकत्वबोधः ॥ १७ ॥ अत्र तेष्वैवानन्यदेवता इति चतुर्णामनन्यदेवताकत्व वर्णनं 'उदाराःसर्वएवैत' इति गीतानिर्देश समानविषयम् ॥१८॥ "सर्वएवै ते मामेवोपासत इत्युदारा " इत्युदारत्वमनन्यदेवत्व पर्यवसन्नमेव तत्रभाषितम् ॥१९॥ तथाच – चतुर्णामनन्यदेवत्वे प्येकान्तिनएव तत्र श्रेष्ठा वक्ष्यमाणा· नन्यप्रयोजनत्वेने त्युभयत्रैकरूपेणैव श्रेष्ठ्यमुपपादितं भवति॥२० ॥ अत्रा नन्यदेवता भक्तशब्दाभावा त्प्रागुक्तरीत्या अनन्यदेवता इत्य स्यानन्यप्राप्यपरत्वापिवा सुवचा ॥ २१ ॥ सर्वथा – चतुर्विधाभजन्ते मा मित्यत्र चतुर्विधाममजना इत्यत्र च विवक्षितानां चतुर्णामप्य धिकारिणां भगवदेक भक्तत्वमेवाभिमतम् ॥ २२ ॥ तथाच– चत्वा रोपि भगवदनन्यदेवताएवेति यद्यप्युत्कृष्टाएव, तथापि – तेषा मप्ये- कान्तिनएव श्रेष्ठाः, अतोनिराशीः कर्मकारिणा मेकान्तिनां भगवाने- व॰परमप्राप्यः, इतरेषां त्रयाणान्तु भगवतइतरदेवफलम् ततः, इत्यय मर्थः तेषा मेकान्तिन॰श्रेष्टा इत्यादिना 'फलकामाहितेमता' इत्य न्तेनार्धत्रयेण गीतावदेवेहापि प्रतिपाद्यत इति सिद्धम् ॥ २३ ॥ इत्थंच – गीताशास्त्रे 'उदारास्सर्वएवैत' इत्यादि श्लोकवदत्रापि भगवदे- कपरमप्राप्यत्व भगवदितरपरमप्राप्यत्वाभ्यामेव ज्ञानिवादितराधिकारि त्रयव्यावृत्तिः प्रतिपादितेतिनात्र पुनरावृत्तिमत्त्वा पुनरावृत्तिमत्त्वाभ्यां वैषम्यं विवक्षितम् ॥ २४ ॥ इत्थं भगवद्भक्तेष्वेव प्राप्यवैषम्यमूलां ज्ञानिन इतराधिकारित्रयाद्व्यावृत्ति मभिधाय–'सर्वे च्यवनधर्माण'इत्यादिना सार्ध श्लोकद्वयेन देवतान्तरभक्तेभ्यो भगवद्भक्तस्य व्यावृत्ति रभिधीयते ॥२५॥ यदिदं गीताशास्त्रेपि–'कामै स्तै स्तै र्हृतज्ञानाः प्रपद्यन्तेऽ न्यदेवताः ।' इत्यारभ्य –"अन्तवत्तु फलं तेषां तद्भवे दल्पमेधसाम् । देवान् देवयजो यान्ति मद्भक्ता यान्ति मा मपि" त्यन्तेनोच्यते ॥ २६ ॥ एत देव च नवमाध्याये विंशादिश्लोकत्रयेण प्रथमं संग्रहेणाभिधाय तत स्त्रयोविंशादिश्लोकत्रयेण तदेव फलवैषम्यहेतूपन्यासपूर्वकं विवृत

मिति न सप्तमनवमाध्यायग्रन्थयो भिन्नप्रकरणता, ज्ञानिश्रैष्ठ्यप्रतिपादनशेषत्वेनैकप्रकरणत्वात् ॥ २७ ॥ इत्थं च ' सर्वे च्यवनधर्माण ' इत्यत्र सर्वपदं सर्वदेवतान्तरभक्तपरं, ज्ञानिन स्स्वेतरभगवद्भक्तेभ्यो व्यावृत्ते रनुपदमेव निरूपिततया देवतान्तर भक्तेभ्यो व्यावृत्ते रेव निरूपणीयणीयतया ऽवशिष्टत्वात् ; समानप्रकरण गीतासप्तमाध्याये भगवद्भक्तान्तरेभ्यो व्यावृत्तिप्रदर्शनानन्तरं देवतान्तरभक्तेभ्यो व्यावृत्ते रेव निरूपणदर्शनात् , इहापि – ब्रह्माणं शितिकण्ठं चेत्यादिवाक्यशेषे परिमितफलकत्व पर्यवसन्न च्यवन धर्मकत्वापरिमित फलकत्वपर्यवसन्न मोक्षफलकत्वयो र्देवतान्तरसेव कत्व तदसेवकत्वविशिष्ट भगवदुपासकत्व निबन्धनताप्रतिपादनपूर्वकं प्रतिबुद्धानां निरुक्तच्यवनधर्मत्व हेतुदेवतान्तरसेवकत्वाभाव प्रतिपादनमुखेन देवतान्तरभक्तेभ्यो व्यावृत्ते रेव प्रतिपादना च्च ॥ २८ ॥ किंच - " सर्वे च्यवनधर्माणः प्रतिबुद्धस्तु मोक्षभागि" ति वचनव्यक्ति पर्यालोचने – प्रतिबुद्ध एव मोक्षं प्राप्तु मर्हति – प्रतिबुद्धेतरे सर्वे च्यवनधर्माण एवेत्यर्थप्रतीत्या ऽत्रत्यसर्वशब्दस्य प्रतिबुद्धेतर परताया एव स्वारसिकत्वात् , ब्रह्माणं शितिकण्ठं चेत्यादिश्लोकेन प्रतिबुद्धशब्दस्या नन्यदेवता याजिविषयत्वेन व्याख्यातत्वाच्च, प्रतिबुद्धेतरपरतया ऽवगम्यमानो ऽयं सर्वशब्दो देवतान्तरभक्तपर एव ; न तु प्रस्तुतज्ञानीतर भगवद्भक्ताधिकारि त्रयपरः , तथा सति – ब्रह्माणं शितिकण्ठं चेत्यादिश्लोके देवतान्तरासेवकत्वेन प्रतिबुद्धाना मितरव्यावृत्तिप्रतिपादनासांगत्यात् ॥ २९ ॥ आर्तादय श्चत्वारोपि भगवदनन्यभक्ता इतिहि प्रागेव निरूपितम् ॥ ३० ॥ मोक्षधर्मवचनस्थै कान्तिप्रतिबुद्धशब्दौ नैकधर्मावच्छिन्नविषयौ – प्रथमस्य प्रयोजनान्तरा नवलम्बि भगवदेकप्राप्यकाधिकारिपरतया - अह मेव गति रित्यादिना - द्वितीयस्या नन्यदेवतायाजिपरतया – ब्रह्माणं शितिकण्ठं चेत्यादिना च पृथ क्पृथग्व्याख्याना देकविषयत्वे पृथ क्पृथग्व्याख्याना नावश्यकत्वाच्च ॥ ३१ ॥ इत्थं च , च्यवनं प्रच्युतिः स्वप्राप्यफल

भोगविनाशेन पुनरावृत्तिः, धर्मः – अवर्जनीयतया प्राप्तं विशेषणं – येषां ते च्यवनधर्माण इति व्युत्पत्त्या च्यवनधर्माण इत्यस्यावर्जनीयपुनरावृत्तय इत्यर्थकतया – ‘ सर्वे च्यवनधर्माणः प्रतिबुद्धस्तु मोक्षभागि ’त्यनेन भगवद्भक्त एव मोक्षभा ग्भवति – तदितरे सर्वे देवतान्तरभक्ता अवर्जनीयच्यवना एव भवन्तीत्युक्तं भवति, देवतान्तरभक्त भगवद्भक्तानां परस्परव्यावृत्त्यभिधानस्थलेषु सर्वत्र पुनरावृत्त्यपुनरावृत्तिरूपवैलक्षण्यस्यैवा भिधीयमानतया ऽत्रापि तस्यैव प्रतिपिपादयिषितत्वात् ॥ ३२ ॥ यथोक्तं गीतायां सप्तमाध्याये – “ कामै स्तै स्तै र्हृतज्ञानाः प्रपद्यन्ते ऽन्यदेवताः । तं तं नियममास्थाय प्रकृत्या नियताः स्वया ॥ यो यो यां यां तनुं भक्तश्श्रद्धया ऽर्चितु मिच्छति । तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥ स तया श्रद्धया युक्त स्तस्याराधन मीहते । लभते च ततः कामा न्मयैव विहितान् हितान् ॥ अन्तवत्तु फलं तेषां तद्भवेदल्पमेधसाम् । देवान् देवयजो यान्ति मद्भक्ता यान्ति मामपि ॥ ” इति विंशादिचतुश्श्लोक्या ॥ ३३ ॥ एवं नवमाध्याये प्युक्तं–“ त्रैविद्या मां सोमपाः पूतपापा यज्ञै रिष्ट्वा स्वर्गतिं प्रार्थयन्ते । ते पुण्य मासाद्य सुरेन्द्रलोक मश्नन्ति दिव्यान् दिवि देवभोगान् । ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति । एवं त्रयीधर्म मनुप्रपन्ना गतागतं कामकामा लभन्ते ॥ अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते । तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥ येत्वन्यदेवता भक्ता यजन्ते श्रद्धयान्विताः । तेपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम् । अहं हि सर्वयज्ञानां भोक्ता च प्रभु रेव च । नतु मा मभिजानन्ति तत्त्वेनात श्च्यवन्ति ते ॥ यान्ति देवव्रता देवान् पितॄन् यान्ति पितृव्रताः । भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोपि मा ” मिति विंशादि श्लोकषट्केन ॥ ३४ ॥ अत्र – त्रैविद्यामा मिति श्लोके मामित्युक्ति

रिन्द्रादिशरीरकभगवत्परा, यष्टृभि र्भगवत्पर्यन्तता मिन्द्रादिशब्दाना मवगम्या यजनेऽपि स्वशरीरभूतेन्द्रादियजनस्य वस्तुत स्स्वयजने पर्यवसन्नता मनुसन्दधतो भगवतस्स्वाभिप्रायमात्र मूलेत्यवधेयम्; येत्वन्यदेवताभक्ता इति श्लोके भगवतैवास्यार्थस्य स्पष्टीकृतत्वात ॥३५॥ अत्रच सप्तमाध्याये विंशादि श्लोकत्रयेण देवतान्तरोपासकानां तत्तत्फलभाक्त्व मभिधाय, त्रयोविंशश्लोक पूर्वार्धेन तादृशफलस्यान्तवत्त्व मभिधाय, ततः कथं देवतान्तरभक्ताना मन्तवत्फलत्व मित्याशंका परिहारायोक्तं –“ देवान् देवयजोयान्तिमद्भक्तायान्ति मामपी” ति ॥३६॥ एवं कथनेच नश्वरभोगदेवतान्तरप्राप्तिः पुनरावृत्तिफला – तद्विपरीतलक्षण भगवत्प्राप्तिस्त्व पुनरावृत्ति फलेति सिद्ध्यति ॥३७॥ तदिदं स्पष्टमुक्त मष्टमाध्याय षोडशश्लोके –“ आब्रह्म भुवनाल्लोकाः पुनरावर्तिनोऽर्जुन । मामुपेत्यतुकौन्तेय पुनर्जन्म नविद्यत ” इति ॥ ३८ ॥ नवमाध्यायेपि विंशैक विंशश्लोकाभ्यां देवतान्तरयाजिनां फलभोग प्रकारं पुनः पुनरावृत्तिंचाभिधाय द्वाविंशश्लोके भगवद्भक्तानां – योगक्षेमं वहाम्यहमित्य पुनरावृत्तिरभिहिता ॥३९॥ अत्रश्लोके –“अहम्प्राप्तिरूपं योगमपुनरावृत्तिरूपं क्षेमंचवहामी”ति व्याकुर्वताभाष्यकृता क्षेमशब्दो ह्य पुनरावृत्तिपरो भाषितः ॥४०॥ तदुपरि त्रयोविंश चतुर्विंशश्लोकाभ्यां सर्वान्तरात्मभूत भगवत्तत्त्व याथात्म्यज्ञान पूर्वकमुपासनस्याकरणं करणंच पुनरावृत्ताव पुनरावृत्तौच हेतुरित्यभिधाय, ततः पूर्ववदेव देवाद्युपासकानां देवादिप्राप्ति प्रतिपादनमुखेन पुनरावृत्तिमत्त्वं भगवद्याजिनां भगवत्प्राप्ति प्रतिपादनमुखेना पुनरावृत्तिमत्त्वंचोपपादितं ॥४१॥ अयं भावः– उपासकै र्यथावदुपासिताहि देवता स्वसमान भोगत्वलक्षणं सायुज्यं दद्यात – नाधिकम सामर्थ्यात , इत्थंच देवता पितृभूतादीनां परिच्छिन्न कालवर्ति परिमितभोगतया तत्सायुज्यलक्षणा तत्प्राप्तिः पुनरावृत्तिरूपैव विश्राम्यति , भगवतस्तु त द्विपरीतलक्षणतया तत्प्राप्तिर पुनरावृत्ति लक्षणैव विश्राम्यतीति ॥४२॥

तदिदमुक्तं सप्तमाध्याय त्रयोविंशश्लोकभाष्ये –" इन्द्रादयोहि परिच्छिन्न भोगाः परिमितकालवर्तिनश्च – तत्सायुज्यं प्राप्तास्तैस्सहप्रच्यवन्ते – मद्भक्ता अपितेषामेव कर्मणा म्मदाराधनरूपतां ज्ञात्वा परिच्छिन्न फल संगन्त्यक्त्वा मत्प्रीणनैक प्रयोजना मां प्राप्नुवन्ति - नच पुनर्निवर्तन्ते 'मा मुपेत्यतु कौन्तेय पुनर्जन्म नविद्यत' इति हिवक्ष्यत " इति ॥४३॥ नवमाध्याय पञ्चविंशश्लोक भाष्येप्युक्तं- "देवादिव्रता देवादीन् प्राप्य वै स्सहपरिमितं भोगं भुक्त्वातेषां विनाशकाले ते स्सहाविनष्टा भवन्ति · मद्याजिनस्तु मा मनादिनिधनं सर्वज्ञं सत्यसंकल्प मनवधि कातिशया संख्येय कल्याणगुणगण महोदधि मनवधिकातिशयानन्दं प्राप्य नपुनर्निवर्तन्त इत्यर्थ" इति ॥४४॥ इत्थं गीताशास्त्रे भगवद्भक्ते ष्वेव कस्यचिदधिकारिण इतरेभ्यः प्राप्यान्तरपरेभ्यो भगवदेक प्राप्यत्व रूपवैषम्याभिधानानन्तरं देवतान्तरभक्त भगवद्भक्तानां वैलक्षण्या- भिधानस्थले पुनरावृत्तिमत्त्वा पुनरावृत्तिमत्त्व रूपवैषम्यस्या सकृद- भिधान दर्शना त्तत्समानप्रकरणे ऽस्मिन् मोक्षधर्मवचनेपि तद्व देव- प्राप्यान्तरपरत्व भगवदेकप्राप्यत्व लक्षण भगवद्भक्तावान्तर वैषम्या भिधानानन्तरं केषांचि त्पुनरावृत्तिमत्त्वा पुनरावृत्तिमत्त्व रूपवैषम्य वर्णनं देवतान्तरभक्त भगवद्भक्तविषयं स्वरसत स्सुवचमिति नात्र- सर्वे च्यवनधर्माण इत्यस्य पुनरावृत्तिम दर्थकत्वेपि कैवल्यार्थिनः पुनरावृत्ति प्रतिपादनपरत्व निर्बन्ध उपलभ्यते ॥४५॥ ननु –"सर्वे च्यवनधर्माणः प्रतिबुद्धस्तु मोक्षभागि"त्यत्र प्रतिबुद्धशब्दोऽ नन्यदेवता याजि भगवद्भक्तमात्रपरोवा ज्ञानिमात्रपरोवा? आद्ये- पुनरावृत्तिमत्त्वेना वश्य संग्राह्य स्यैश्वर्यार्थिनः ·सर्वे च्यवनधर्माण इत्यत्र प्रतिबुद्धेतर कृत्स्न विषयेण सर्वशब्देना संग्रहप्रसंगः, प्रतिबुद्धशब्देन गृहीतस्य तस्यमोक्षभाक्त्व कथनविरोधश्च स्यातां । द्वितीये- ज्ञानीतर कृत्स्न विषयेण सर्वशब्देन कैवल्यार्थिनोपि ग्रहणसम्भवेन तस्यपुनरावृत्ति प्रतिपादन मनायत्या सिद्धं भवेतीतिचेन्न; – ऐश्वर्यार्थिनः पुनरावृत्ते

वंणनीयत्वे तद्वर्णनस्य समानप्रकरण गीताशास्त्रा धैककण्ठ्यानुरोधेन भगवद्भक्तावान्तर वैळक्षण्यनिरूपणावसरएव प्रसक्ततया देवतान्तरभक्त भगवद्भक्त वैळक्षण्याभिधान प्रकरणेतस्या प्रसक्तत्वात् । प्रमाणान्तरैः प्रकरणान्तरे भगवद्भक्तावान्तर वैळक्षण्यस्य विस्तृत विशदनिरूपणावसरएव तात्त्विध्या संक्षेपतो निरूपणावसरे ऽत्र स्पष्ट तद्वर्णना विद्धावपि क्षत्यभावात् । अपिचेह विवक्षितस्य च्यवनधर्मत्वस्या वर्जनीय च्यवनकत्वस्य स्वोपास्य देवताप्रसादापरिहार्य पुनरावृत्तिकत्वपर्यवसायिन ऐश्वर्यार्थि साधारण्यविरहेण निरुक्तरूपेणैश्वर्यार्थिसंग्रहस्यासम्भवेना विवक्षितत्वात्, प्रतिबुद्धस्तु मोक्षभागित्येकवचननिर्देशेन प्रतिबुद्धेष्वपि कस्यचि देव मोक्षभाक्त्वसम्भवस्य प्रतिपिपादयिषितत्वेनै श्वर्यार्थिनो मोक्षभाक्त्वाभावे विरोधाभावाच्च प्रथमपक्षे बाधकाभावात् ॥ ४६ ॥ एतदुक्तम्भवति – चतुर्विधभक्ताना मवान्तरवैचित्रीनिरूपण प्रकरणएव तदन्तःपातिन ऐश्वर्यार्थिनः पुनरावृत्तिनिरूपणं प्रसक्तम् , नह्य देवतान्तरभक्तानां भगवद्भक्तानां च वैळक्षण्य निरूपणप्रकरणे, अतः – सर्वेच्यवनधर्माणः प्रतिबुद्धस्तु मोक्षभागित्यत्र तत्प्रसंगएवनास्ति । ततःपूर्व– " चतुर्विधा ममजना"– इत्यारभ्य –"फळकामाहितेमता " इत्यन्तस्य भगवद्भक्तावान्तर वैळक्षण्य निरूपणप्रकरणत्वेपि तत्र तादृशवैळक्षण्यस्य संक्षेपतएव निरूपणदर्शनेन विशदनिरूपणं नास्ति । अतएव एकान्तिशब्दितानां ज्ञानिनां तदितरेषां च परं भगवदेकप्राप्यत्व तदितरप्राप्यत्वाभ्यां वैळक्षण्यं प्रतिपादितं, नत्वैश्वर्यार्थि कैवल्यार्थिनां परस्परवैळक्षण्यं तत्प्राप्यस्वरूपंच । अतस्तत्सर्वं गीतादौ तद्विशदनिरूपणप्रकरणएव बोध्यमिति नेह तद्विवक्षा । अपिच – उपासकानां च्यवनं स्वीयापेक्षा विशेषळक्षण स्वदोषमूलं स्वोपास्यदेवता सामर्थ्यवैकल्य ळक्षणदेवता दोषमूळंचेति द्विप्रकारमस्ति । तत्र प्रथमं स्वोपास्यदेवताया मोक्षलक्षण नित्यफलप्रदान सामर्थ्ये सत्यपि भंगुर

क्षुद्रफलविषय स्वकामनाविशेषानुगुण तत्प्रसादलभ्यफल विनाशावश्य भावि पुनरावृत्तिरूपं । इदश्च स्वापेक्षाविशेष दोषमूलमेवेति तत्प्रहाणेन वर्जयितुं शक्यतया नावर्जनीयं च्यवनम् । द्वितीयन्तु - स्वोपास्य देवतासाध्यपरिपूर्णोत्तम फलप्रार्थनेसत्यपि देवताया नित्यफलदान सामर्थ्यवैकल्येन तत्प्रसादलभ्या नित्यफलनाशावश्यभावि पुनरावृत्ति रूपं । इदंस्वोपास्य देवतासामर्थ्य वैकल्यदोषमूलं देवताप्रसादतोऽप्य परिहार्यमेवेत्य वर्जनीयमेव च्यवनं । "सर्वे च्यवनधर्माण"इत्यत्र धर्मपदं- च्यवनमेषां धर्मोऽवश्यभावि विशेषणमिति रीत्या च्यवनस्य निरुक्त रूप मवर्जनीयत्व मवगमय देव सफलं । अत्र धर्मपद विवक्षितं च्यवनस्या वश्यभाव्यवर्जनीय विशेषणत्व मेत्र- गीता नवमाध्याये - चतुर्विंश श्लोकावतरणिकाभाष्ये " तेच परिमित फलभागिन श्वच्यवन स्वभावाश्च भवन्ती " ति, पंचविंश श्लोकावतारिका भाष्ये- "केचिद् त्यल्पभागिन श्चच्यवनस्वभावाश्च भवन्ती"ति च भाषमाणा भाष्यकारा निर्दिशन्ति । स्वभावशब्दो ह्यवर्जनीय विशेषण पर्यायः, उपास्य देवतासामर्थ्य वैकल्यमूल मैश्वर्यार्थिलक्षण भगवद्भक्त व्यावृत्त मवर्जनीय च्यवनमेवच "सर्वे च्यवनधर्माण " इत्यत्र विवक्षितं, धर्मपद प्रयोगस्वारस्यात् । अन्यथा - प्रतिबुद्धस्य कथं च्यवनधर्मत्वं नास्ती त्यादिशंका परिहाराय प्रवृत्ते "ब्रह्माणं शितिकण्ठं चे"त्या द्युत्तरश्लोके- प्रतिबुद्धानां परिमितफलमात्र दानशक्त देवतोपासकत्वाभावा न्न च्यवनधर्मत्वमिति परिहार कथनस्यासांगत्यापत्तेः; स्वापेक्षा · विशेष लक्षण दोषमूलदर्शित प्रथमप्रकार च्यवनस्य प्रतिबुद्धेष्वपि संभवेन तदभावस्य देवतान्तरसेवकत्वाभावेन साधनासम्भवाच्च । इत्थं च निरुक्तरूपस्य च्यवनधर्मत्वस्य सकलभगवद्भक्त व्यावृत्तस्यैवेह विवक्षितत्वेन नैश्वर्यार्थिलक्षण भगवद्भक्तसंग्राह्यता विवक्षितेति न तदसंग्रहो दोषः । एवं "सर्वे च्यवनधर्माण " इत्यत्र सर्वपद प्रयोगा त्प्रतिबुद्धेतरत्वावच्छेदेन निरुक्तरूप च्यवनधर्मत्वस्य-

"प्रतिबुद्धस्तु मोक्षभाक्" इत्यत्रैकवचनान्त प्रतिबुद्धशब्दप्रयोगस्वारस्या त्प्रतिबुद्धत्वसामानाधिकरण्येन मोक्षभाक्त्वस्य च प्रतिपादनस्यैवेहा भिमतत्वदर्शनेन नैश्वर्यार्थिलक्षण भगवद्भक्तस्य मोक्षभाक्त्वप्रति पादनप्रसंगमूलो विरोधः, तादृशभगवद्भक्तस्येह प्रतिबुद्धशब्देना विवक्षितत्वेन क्षतिविरहात् । प्रतिबुद्धत्वावच्छेदेनेह मोक्षभाक्त्वा विवक्षणं च - गीतासप्तमाध्याये " मनुष्याणां सहस्रेषु कश्चि द्यतति सिद्धये । यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वत" इति तृतीयश्लोकेन " बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते । वासु देव स्सर्व मिति स महात्मा सुदुर्लभ " इत्येकोनविंशश्लोकेन चो क्तरीत्या प्रतिबुद्धा अपि सर्वे न मोक्षभाजो भवन्ति - तेष्वपि तादृशो ऽधिकारी क्वचि त्कश्चि देक एव भवतीति तद्दुर्लभत्वा भिप्रायेणै श्वर्यार्थिनां तदभावाभिप्रायेण चेति नात्र कश्चि द्विरोध इति ॥ ४७ ॥ इत्थं च कैवल्यार्थि भगवत्प्राप्त्यर्थिनो रुभयो रपीह विवक्षितत्वसम्भवेन तयो र्द्वयो र्वा पुनरावृत्तिलक्षणमोक्ष भाक्त्वं प्रतिपादितं भवतीति स्वसमानप्रकरणगीताशास्त्र समाना र्थक मेवेदं मोक्षधर्मवचनम् ॥ ४८ ॥ यद्वा - प्रतिबुद्धशब्द इहा नित्यफलविरक्त मुमुक्षुभगवद्भक्तविषय स्सन्नैश्वर्यार्थिमात्र व्यावृत्त एव, अनित्यफलविषया न्मोक्षरूप नित्यफलदान समर्थासमर्थ परा परदेवता तत्त्वविषयाच्च व्यामोहात्प्रतिबुद्धत्वस्यैव. प्रतिबुद्धशब्द प्रवृ- त्तिनिमित्तत्वात्, "ब्रह्माणं शितिकण्ठं चे"त्या द्युत्तरश्लोकेन तथैव विवरणाच्च ॥४९॥ इत्थंच - भगवद्भक्त देवतान्तरभक्त रूपाणां सर्वे- षामैश्वर्यार्थिनां " सर्वे च्यवनधर्माण"इत्यत्र प्रतिबुद्धेतर कृत्स्नविषयेण सर्वशब्देन संगृहीतानां पुनरावृत्तिमत्त्व मविशेषेणोक्तं भवतीति न भगवद्भक्त भूतैश्वर्यार्थिनां पुनरावृत्त्य कथन न्यूनता ॥ ५० ॥ नापि वा कैवल्यार्थिना मपुनरावृत्त्यकथनन्यूनता, अनित्यफल विरक्तमुमुक्षु भगवद्भक्तविषयेण प्रतिबुद्धशब्देन कैवल्यार्थिभगवत्प्राप्त्य

र्थिना मुभयेषा मपि संग्रहा न्मोक्ष भाक्छिद्देनोभयेषा मपुनरावृत्ति लक्षणमोक्षंप्रतिपादनसिद्धे श्च ॥ ५१ ॥ एवं च प्रतिबुद्धत्वावच्छेदेन मोक्षभाक्त्वस्य प्रतिपिपादयिषितत्वेपिं न विरोधः ॥ ५२ ॥ न चैवं सति देवतान्तरासेवकत्वेन प्रतिबुद्धाना मैश्वर्यार्थिभ्यो ऽखिलेभ्यो व्यावृत्यभिधान मसंगतं, भगवद्भक्तभूतैश्वर्यार्थिभ्यो निरुक्त रूपेण व्यावृत्त्ययोगादिति वाच्यम् ; " ब्रह्माणं शितिकण्ठं च" त्यादि श्लोके " प्रतिबुद्धा नसेवन्ते" इत्यस्य प्राप्यप्रापकसाधारणोपासन लक्षणाश्रयण सामान्यराहित्यार्थकतया भगवद्भक्तभूतैश्वर्यार्थिनां प्रापकतया भगवदुपासकत्वेपि प्राप्यभूतैश्वर्यस्य ब्रह्मादिपदप्राप्तिरूपत्वेन प्राप्यतया देवतान्तरोपासकत्वस्या वर्जनीयतया देवतान्तरानाश्रयित्व लक्षण तदसेवकत्वेन प्रतिबुद्धानां सकलैश्वर्यार्थि व्यावृत्यभिधानस्य संगतत्वात् ॥५३॥ इद मत्र बोध्यं – ऐश्वर्यार्थिषु भगवद्भक्तानां प्रापकतया भगवदाश्रयित्वस्य , देवतान्तरभक्तानां प्रापकतया देवतान्तराश्रयित्वस्य च व्यावृत्तस्य सत्वे प्यैश्वर्यस्य ब्रह्मादिपदप्राप्ति रूपतया प्राप्यतया देवतान्तराश्रयित्व मुभयेषां तुल्यम् । अत एव गीताऽष्टमाध्याये – ऐश्वर्यार्थिप्राप्य प्रकृतितत्त्वनिबन्धन पुरुषार्थ भूतभोगैश्वर्यस्य नश्वरत्वेन पुनरावृत्तिप्रतिपादनघट्टे " आब्रह्मभुवना ल्लोकाः पुनरावर्तिनो ऽर्जुने"त्यादि षोडशश्लोक मारभ्यैकोनविंशश्लोक पर्यन्तेन ग्रन्थेन ब्रह्मादिपदानां ब्रह्मादीनां चोत्पत्तिविनाशकाल व्यवस्थावर्णनं संगच्छते । ऐश्वर्यस्य ब्रह्मादिपद तदधिपति चतुर्मुखादिप्राप्तिरूपत्वाभावे तु तेषा मिह नश्वरत्ववर्णन मप्रस्तुत मसंगतं स्यात् । स्वस्यैव चतुर्मुखादिभावेन प्राप्ते रैश्वर्यरूपत्वेपि तथाविधावस्थाप्राप्यत्वाय तथाविधावस्थापन्न देवतान्तरस्य प्राप्यतयोपासन मावश्यक मेव । अन्यथाहि तथाविधावस्थाप्राप्ति रेव न सम्भवति , तत्क्रतुन्यायात् । अन्तत स्स्वस्यैव तथाविधावस्था

पन्नस्य प्राप्यतयोपासनेपि तथाविधावस्थापन्नस्य स्वस्यैव देवतान्तर रूपतया तथाविधस्वोपासनप्राप्ती देवतान्तरोपासनप्राप्तिरूपे एव भवतः । अत एव शारीरकशास्त्रेपि कार्याधिकरणे हिरण्यगर्भ लक्षणकार्यब्रह्मोपासकत्व मैश्वर्यार्थिनो बादरिपक्षोपन्यासमुखेन प्रति प्राद्यते । नच भगवद्भक्तान्तःपातिना मैश्वर्यार्थिनां स्वासाधारण दिव्यमंगळविग्रहविशिष्टस्य भगवत एवोपासन मन्तिमस्मरणं च विहितं दृश्यते । यथोक्तं गीताष्टमाध्याये ऽष्टमादिश्लोकत्रये - "अभ्यासयोगयुक्तेन चेतसा नान्यगामिना । परमं पुरुषं दिव्यं याति पार्थानुचिन्तयन् ॥ कविं पुराण मनुशासितार मणोरणीयां समनुस्मरे द्यः । सर्वस्य धातार मचिन्त्यरूप मादित्यवर्णं तमसः परस्तात् ॥ प्रयाणकाळे मनसा चलेन भक्त्या युक्तो योगबलेन चैव । भ्रुवो र्मध्ये प्राण मावेश्य सम्य क्सतं परं पुरुष मुपैति दिव्यम्" इत्येवं रूपे " आदित्यवर्णं तमसः परस्ता दि" त्यसाधारणदिव्यमंगळविग्रहनिर्देशः कृतः । उक्तं हि तत्र भाष्ये "आदित्यवर्णं तमसः परस्तात् - अप्राकृतस्वासाधारण दिव्यरूप मिति । परमं पुरुषं दिव्य मिति " सतं परं पुरुष मुपैति दिव्यं " इति च भग वत एव निर्देशः कृतः, तत्कथ मेषां हिरण्यगर्भादिलक्षणदेवता न्तरोपासकत्व मुच्यत इति वाच्यं; सकलेतरदेवताजातभोग्यजात विलक्षणशब्दादिभोक्तृत्व दशाविशिष्ट चतुर्दशलोकगर्भाण्डाधिपति हिरण्यगर्भशरीरकस्य तदीयहृदयकमलनिविष्ट स्वासाधारणाप्राकृत दिव्यमंगळविग्रहसमेतस्य चतुर्मुखान्त स्सन्निपत्य तन्मुखेन दर्शित विलक्षणप्राकृतशब्दादीन् भुंजानस्य तत स्तादृशभोक्तृत्व दशा लक्षणविलक्षणैश्वर्यं सम्पन्नस्य भगवत उपासनस्य तत्र विवक्षित तया तदसाधारणाप्राकृतदिव्यरूपनिर्देशे प्यैश्वर्यार्थिनां तत्र विशेषणी भूतदेवतान्तरोपासकताया अवर्जनीयत्वा दप्राकृतरूपविशिष्ट भगव द्रूपविशेष्यांशस्य प्रापकत्वमात्रेणो पास्यतायाः हिरण्यगर्भाकार

भूत विलक्षणशब्दादिभोक्तृत्व लक्षणविलक्षणैश्वर्यरूप विशेषणांश-स्यैव प्राप्यतयोपास्यताया श्च विवक्षितत्वेन विरोधाभावा च्च। तदिदं गीताभाष्ये भाष्यकारै रेव तत्र तत्र स्पष्ट मुपदर्शितम् । यथोक्त मष्टमाध्याय चतुर्थश्लोकभाष्ये " पुरुषश्चाधिदैवतं - अधि दैवतशब्दनिर्दिष्टः पुरुषः, अधिदैवतं - दैवतोपरिवर्तमानः - इन्द्र प्रजापतिप्रभृति कृत्स्नदैवतोपरिवर्तमान इन्द्रप्रजापतिप्रभृतीनां भोग्य जाता द्विलक्षणशब्दादे र्भोक्ता पुरुषः, साच भोक्तृत्वावस्था ऐश्वर्यार्थिभिः प्राप्यतयाऽनुसन्धेये " ति । अत्राधिदैवतपुरुष इति निर्दिष्ट श्चतुर्मुखशरीरक तदीयहृदयकमलनिविष्टा प्राकृतासाधारण रूपदर्शित लक्षणपरमपुरुष एव, नतु परमपदनाथादिः, तस्य क्षरप्राकृतशब्दादि भोक्तृत्वदशायाः प्रमाणसंप्रदाया सम्प्रतिपन्नत्वात् । इन्द्रप्रजापतिप्रभृती त्यत्र प्रजापतिशब्दश्च चतुर्मुखादर्वाचीनप्रजापतिपरएव । अष्टमश्लोक भाष्येपि " परमं पुरुषं दिव्यं मां वक्ष्यमाणप्रकारं चिन्तयन् मामेव याति, आदिभरत मृगत्वप्राप्तिव दैश्वर्यविशिष्टतया मत्समानाकारो भवती" त्यैश्वर्यदशायाः प्राप्यत्वमभिहितं । दशम श्लोकभाष्येपि"दिव्यं पुरुषंयोनुस्मरेत - सतमेवोपैति - तत्समानैश्वर्योभवतीत्यर्थ" इत्यैश्वर्य दशाया एव प्राप्यत्व मुक्तं । सा चैश्वर्यदशा चतुर्मुखाकारेणाण्डा धिपत्य प्राप्तिलक्षणेव । अत एवोक्तं - श्रीभट्टनाथ दिव्यसूरि प्रबन्ध प्रथम श्रीसूक्त पंचमगाथाभाष्ये कृष्णपादसूरिभिः " देवतानामैश्वर्यस्य कृत्स्नस्योपारितनमण्डाधिपत्यं खल्वैश्वर्यस्यो परितनसीमा, ताभि र्ब्रह्मादि भिरीश्वरस्याश्रयण प्रकारउच्यते'अण्डाधिपतयेनम' इति ह्य तत्पदप्राप्तये साधनमन्त्रः, तादृशाण्डैश्वर्य विशिष्टतया खलु सर्वेश्वरस्यानुसन्धानं - 'व्याहरन्मा मनुस्मरन् ' इत्युक्तरीत्या -एतन्मन्त्रस्याभिधानं मन सैश्वर्य विशिष्टतयानुसन्धानं चैव ह्याश्रयणप्रकारस्थिति''रिति । अत्रदेवताना मित्यादिना भाष्यकारोक्ता धिदैवतशब्दार्थं प्रत्यभिज्ञाप्य तादृशपद विवक्षितैश्वर्यस्याण्डाधिपत्य रूपताया अभिधाना च्चतुर्मुखैश्वर्य रूपते-वाभिहिता भवति । भगवद्भक्त भूतैश्वर्यार्थि प्रकरणेषु प्रायशस्तेषां

हिरण्यगर्भैश्वर्य प्रेप्सुतावर्णन न्दात्रर्थिनो स्संकोच प्रसंगाभावेन सीमा भूतैश्वर्य प्रेप्सुताया एव प्रायश स्सम्भवाभिप्रायकम् , न त्वितरैश्वर्यार्थित्वा सम्भवाभिप्रायकम् ; तथा सति श्रीभारत शान्तिपर्वण्येक चत्वारिंश दधिकत्रिशततमे श्रीनारायणीयोपाख्याने सप्तमेचाध्याये ब्रह्मादीनां सर्वेषामेव देवानां भगवन्तमुद्दिश्य परमन्तपोनुष्ठाय तत स्स्वस्वपद प्राप्तिलक्षणैश्वर्य प्राप्तिप्रतिपादन विरोधापत्तेः । तथाच-; प्रकृतिमण्डलान्तः पातिषु सत्यलोकादिप्देषु तत्तत्पदाधिपत्य प्राप्ति स्तत्तत्पदाधिपतिभिस्सह समानभोगतयान्यूनभोगतया वा सहावस्थानं चेत्ये तत्सर्वं भगवतस्तत्तद्देवतान्तराणांच सकाशा ल्लब्धं तत्तत्पदाधिपति देवतान्तरप्राप्तिलक्षणैश्वर्य एवान्तर्भवतीत्यैश्वर्यार्थिनां सर्वेषां प्राप्यतया देवतान्तरोपासनं तत्प्राप्तिश्चावर्जनीये एव, अन्त तस्तत्तद्दशाविशिष्ट स्वात्मनएव देवतान्तररूपतया तथाविधस्वात्मानुसन्धनप्राप्तयो स्सत्त्वात ; तदेतत्सर्वमभिप्रेत्यैव भगवता गीताष्टमाध्याये - ऐश्वर्यार्थिनां प्राप्य विनाशाधीन पुनरावृत्त्युपपादनघट्टे- "आब्रह्म भुवना ल्लोकाः पुनरावर्तिनोर्जुने" त्याद्यभिधानाच्चेति ॥५४॥ तथा चैश्वर्यार्थिनां पुनरावृत्ति कैवल्यार्थि भगवत्प्राप्त्यर्थिनोश्चा पुनरावृत्तिं प्रतिपादयदिदं मोक्षधर्मवचन प्रकरणं गीताशास्त्रसमानकण्ठमेवेति नकिञ्चिदिह विरोध उपलभ्यते ॥ ५५ ॥ अथवा - मतिबुद्धशब्दो देशतः कालतो वस्तुतोवा परिच्छिन्नफलविषयाद्व्यामोहादुत्तीर्ण विषयस्सन् "तेषामेकान्तिन श्श्रेष्ठा" इत्यत्र स्थितैकान्तिशब्देनसमानविषयएव, "सर्वेच्यवनधर्मास्त" इति पाठे पूर्वनिर्दिष्ट चतुर्विधाधिकारिघटक ज्ञानीतर त्रिविधाधिकारि परामर्शितच्छब्दस्वारस्याद्बहुवचनविरोधेन द्विविधाधिकारिमात्र परामर्शे स्वारस्या सम्भवात ; "ब्रह्माणं शितिकण्ठं चे" त्याद्युत्तरश्लोके परिमितं फलमित्यस्य कालपरिच्छिन्नमात्रविषयत्व लक्षणसंकोचास्वारस्यात ; त्रिविधपरिच्छिन्नविषयत्वे प्रतिबुद्धासःधारणधर्मतया तच्छलोकविव-

क्षितस्य परिमितफलविरक्तत्वस्य कैवल्यार्थिव्यावर्तकत्वालाभस्यार-स्याच्च ॥ ५६ ॥ गीतार्थसंग्र हैकादशश्लोके – " भक्तभेदः प्रबुद्धस्य श्रैष्ठ्यं सप्तमउच्यत " इति प्रतिपादयद्भि र्भगव द्यामुनमुनिभिरपि गीतासप्तमाध्याये ज्ञानिशब्देन निर्दिष्टस्याधिकारिणः प्रतिबुद्धशब्द पर्यायप्रबुद्धशब्देन निर्देशाद्दर्शितमोक्षधर्म वचनप्रकरणस्थित प्रतिबु-द्धशब्दोज्ञानिपरइति– ज्ञानिगतोत्कर्षस्य श्रैष्ठ्यमितिशब्देन निर्देशात, "तेषामेकान्तिनश्श्रेष्ठा"इति "प्रतिबुद्धस्तु श्रेष्ठभागि" तिच दर्शितमोक्ष धर्मवचनप्रकरणोक्तं श्रेष्ठभात्त्वलक्षणं श्रैष्ठ्यमेव " उदारा स्सर्वएवैते ज्ञानीत्वात्मैव मे मत " मित्यत्र गीतासप्तमाध्याये विवक्षितमिति च दर्शितमोक्षधर्मवचन गीताशास्त्रप्रकरणयोरेक विषयत्वं सम्यक्प्रत्य भिज्ञापितम् ॥ ५७ ॥ इत्थमेकान्ति प्रतिबुद्धशब्दयोरेकविषयत्वे सति च प्रागनन्यदेवता इत्युक्तस्यैकान्तिविशेषणस्यैव "ब्रह्माणंशि तिकण्ठंचे" त्यादिनाविवरणं स्वारसिकम्भवति ॥ ५८ ॥ इत्थंच– "तेषां ज्ञानीनित्ययुक्त एकभक्तिर्विशिष्यते । प्रियोहिज्ञानिनोऽत्यर्थ महं सच ममप्रियः । उदारास्सर्वएवैते ज्ञानीत्वात्मैव मे मतम् । आस्थि तस्सहियुक्तात्मा मामेवा नुत्तमांगतिम् ॥ " इति गीतासप्तमाध्याय सप्तदशाष्टादशश्लोक विवक्षिततदितराधिकारित्रय वैलक्षण्यमेवेहा-भिधित्सितम् ॥५९॥ तत्रहि ज्ञानिनोभगवदेकप्राप्यत्वमूलकं नित्ययुक्तत्व मेकभक्तित्वंचेति विशेषणद्वयमस्ति, प्राप्यान्तरपरस्य तन्नास्तीत्येतदेव वैलक्षण्यमभिमतम् ॥ ६० ॥ तदेवच दर्शित मोक्षधर्मप्रकरणे प्यभिधि-त्सितम् ॥ ६१ ॥ इदमत्रावधेयम् –नित्ययुक्तत्व मेवच श्रेष्ठभागिति मोक्षभागितिचपाठभेदेना भिधीयते। एकभक्तित्वमेवच "अनन्यदेवता" इत्यनेन " ब्रह्माणं शितिकण्ठं चे " त्यादिना चोच्यते । नित्ययुक्तत्व प्रतिकोटि भूतमेवच च्यवनधर्मत्वं । एकभक्तित्व प्रतिकोटि भूतमे-वचान्यदेवतत्व मितराधिकारित्रयस्य विवक्षितमिति ॥ ६२ ॥

इदं पुनरत्रावधेयं • विलक्षण भोगशक्ति युक्तचेतन विशेषस्य स्यैव देवतात्वरूपत्वात्, तस्य ब्रह्मादिभ्योपि विलक्षण भोग शक्ति युक्त प्रकृतिवियुक्त प्रत्यगात्मस्वरूपे कैमुतिकन्यायासिद्धत्वात्, तक्रतु न्यायेन प्राप्यस्या प्युपासनीयत्वा च्चैश्वर्यार्थिनां प्रकृति मिश्र चेतन विशेषात्मक ब्रह्मादि देवतान्तरेष्विव कैवल्यार्थिनां प्रकृति वियुक्त प्रत्यगात्मस्वरूप लक्षण देवतान्तरं प्राप्यतयोपासनस्य सत्त्वा त्प्राप्यतया देवतान्तरोपासकत्व लक्षण मन्यदेवतत्वं ज्ञानीतराधिकारि- त्रय साधारणम् । प्राप्यतया देवतान्तरानुपासकत्व लक्षण मनन्य देवतत्वं ज्ञानिनोऽसाधारणमेव । इत्थंच " तेषामेकान्तिनश्श्रेष्ठा ये- चैवा नन्यदेवता" इति "ब्रह्माणं शितिकण्ठंच याश्चान्यादेवतास्मृताः । प्रतिबुद्धानसेवन्ते यस्मात्परिमितं फल" मितिच देवतान्तरानुपासकत्वस्य ज्ञानीतराधिकारित्रय व्यावृत्त ज्ञानिधर्मतया प्रतिपादनं साधुसंगच्छते । "तेचैवा नन्यदेवता"इतिपाठोपि नास्मिन् कल्पे क्लेशेन समन्वेतव्यः । "याश्चान्यादेवतास्स्मृता" इत्यनेन यथोक्तरीत्या प्रकृतिवियुक्त प्रत्य- गात्मस्वरूपमपि संगृहीतं भवति । प्रकृतिवियुक्त प्रत्यगात्मप्राप्ति मूलानन्दस्यापि भगवत्प्राप्ति मूलानन्दादत्यल्पतया " यस्मात्परिमितं फल"मिति च साधुसंगच्छते । ज्ञापितंचेदं गीताष्टमाध्याय द्वाविंश श्लोकावतारिकाभाष्ये "ज्ञानिनः प्राप्यन्तु तस्मादत्यन्त विभक्त मित्या ह"इति भाषमाणै र्भाष्यकारैरपि ॥ " ऐकान्त्यं भगवत्येषां समान मधि- कारिणा"मिति गीतार्थसंग्रहाष्टाविंशश्लोके भगवद्यामुनमुनिवचनं"उदारा स्सर्वएवैत"इति गीतासप्तमाध्यायाष्टादशश्लोकभाष्ये"सर्व एवै ते मामेवो पासत इत्युदारा" इति भाष्यकारवचनं च प्रापकतया देवतान्तरानु- पासकत्व लक्षणानन्यदेवतत्व विषयमिति न विरोधः । व्यक्तमेवेदं त च्छ्लोक भाष्य एव" ये मत्तो यत्किंचिदपि गृह्णन्ति ते ममसर्वस्वदायिन" इत्यनेन ग्रन्थेन ॥ एवं च्यवन धर्मत्वमपि ज्ञानीतराधिकारित्रितय साधार णमेवेहविवक्षितं, सेव्यसेवकभावेन प्रसक्तसम्बन्धात्स्वतः परमप्राप्यभूता त्परस्मा द्ब्रह्मणोभगवतः प्राप्यान्तराश्रयणेन प्रच्युतेस्त्रयाणामविशिष्टत्वात् ।

च्यवनं हि नाम प्रसक्तसम्बन्धादुपरितनवस्तुनः केनचिद्धेतुना तादृ शसंसर्गप्रहाणपूर्वका र्वाचीनवस्तुप्राप्तिः । स्वप्राप्य प्रापकतया से व्यसेवकभावेन भगवन्त मेवोपासीनेषु चतुर्विधे ष्वधिकारिषु ज्ञानिनो भगवदेकप्राप्यास्तमेव परमप्राप्यं प्रेप्सन्त उपासनदशायामिव फलद शायामप्य निवृत्तसेव्यसेवकभावलक्षण तत्संसर्गतया यावदात्मभा व्यनुवृत्त तादृशभगवत्संसर्गा नित्ययुक्ता उच्यन्ते । इतरे त्वधि कारिण ऐश्वर्यकैवल्यलक्षण प्राप्यान्तरपरतया स्वस्वप्राप्यप्राप्तये से व्यसेवकभावेन भगवन्तमेवोपासीना स्स्वस्व प्राप्यप्राप्त्यनन्तरं नदी निस्तरणानन्तरं प्लवपरित्यागव दुपासनदशास्थितसेव्यसेवकभावल क्षण भगवत्संसर्गप्रहाणेन भगवतः प्रच्यवनात्, "सर्वेच्यवनधर्माण" इत्यविशेषेण निन्द्यन्ते । इदमेवच केषांचिन्नश्वरप्राप्यान्तरभजनरूपं सत्प्राप्यविनाशेन पुनरावृत्तिरूपं भवति , केषांचित्स्थिरप्राप्यान्तर भजनरूपंस त्प्राप्यविनाशाभावेना पुनरावृत्तिरूपं भवतीति विशेषेपि परमप्राप्यभूता द्भगवतः प्रच्युतत्व मविशिष्टमेव ज्ञानीतरेषां सर्वेषां। इत्थञ्च 'च्यवनधर्माण' इत्यस्य - च्यवनं यथोक्तलक्षणा भगवतः प्रच्यु तिः, धर्मो येषां त इत्येवार्थसिद्ध्या नात्र कैवल्यार्थिना मैश्वर्यार्थितुल्य प्राप्यपुरुषार्थविनाशाधीन पुनरावृत्तिप्रतिपादनगन्धइति ॥ ६३ ॥

ज्ञानिनां नित्यतया ऽन्येषां तत्तत्प्राप्यसिद्धिपर्यंत मनुवृत्त्य पश्चान्नि वर्तमानतयाच गीतासप्तमाध्याय सप्तदशश्लोकभाष्येऽभिहित उपासका नां भगवतासह योग स्सेव्यसेवकभावलक्षणएव नान्यादृशकेवलसं योगादिरूपइति , अयं योगः प्रापकतया प्राप्यतयाचा भिमतत्वादेव ज्ञानिनां नित्यतयाऽनुवर्ततइति, " सर्वे च्यवनधर्मा स्ते प्रतिबुद्धस्तु श्रे ष्ठभा" गितिपाठएवच स्वारसिकइति, "सर्वे च्यवनधर्माणः प्रतिबुद्धस्तु मोक्षभागि" तिपाठेपि मोक्षशब्दस्य भगवत्प्राप्तिप्रतिबन्धक सर्वविनि- र्मोक्षविषयस्य भगवत्प्राप्तिलक्षण परममोक्षस्व मुख्यतमत्वेन तद्वि षयतया "प्रतिबुद्धस्तु मोक्षभागि"त्यत्र प्रतिबुद्धस्य कैवल्यार्थिव्यावृ

त्तत्रापि निर्देश उपपद्यतइति च प्रागेवोपपादितम् ॥ ६४ ॥ अर्थपंचकरहस्ये लोकाचार्यैरपि कैवल्य मचित्सम्बन्धनिवृत्तिमात्रेण मोक्ष इति केचि द्व्यपदिशन्तीति वदद्भि स्तस्य मुख्यतममोक्षरूपत्वा भावएवख्यापितः ॥ ६५ ॥ दर्शितमोक्षधर्मवचनप्रकरण स्येदृशार्थ कत्वमेव स्वप्रकरणसमानप्रकरणसकलपूर्वाचार्यश्रीसूक्त्यनुगुणं ॥ ६६ ॥ "आर्तो जिज्ञासु रर्थार्थी ज्ञानीचेति पृथक्पृथ"गित्याधिकार्यद्भावपाठमंगी कुर्वतां वादिकेसरि रम्यजामातृमुनि वरवरमुनिप्रभृतीनामपि चेद मेवा भिप्रेत मित्यवगम्यते ॥ ६७ ॥ "भक्त म्प्रति विशेष स्त एष पार्थानुकीर्तित" इतिवाक्यशेषस्यापि भक्तावान्तरविशेषकीर्तनपरत्वमेवस्व स्वारसिकं ॥ ६८ ॥ तथाच दर्शितमोक्षधर्मवचनप्रकरणस्य प्रा गुक्तेषु कल्पेषु केना प्येकेनकल्पेन शास्त्रान्तरोक्तकैवल्यार्थ्यं पुन रावृत्त्यविरोधेन पूर्वोक्तार्थपरतायाएव स्वरसतोलाभेन न कथंचि दापि कैवल्यार्थिना मैश्वर्यार्थितुल्य पुनरावृत्तिप्रमाणता सिद्ध्यतीति सर्वथापि नात्र विरोधगन्ध इति ॥ १०१ ॥

यः पुनः - "सर्वे च्यवनधर्माणः प्रतिबुद्धस्तु मोक्षभागि"तिवचनस्य- ज्ञान्येकएव मोक्षभाक्-तदन्येऽधिकारिण आर्तार्थार्थिजिज्ञासुरूपास्त्रयोपि स्वप्राप्यपुरुषार्थं विनाशेन कालविशेषे ऽ वर्जनीय पुनरावृत्तय इति पूर्वपक्ष्याभिमतो ऽ र्थः ॥ १०२ ॥

सतु न कथं चिदपि सम्भवति - समानप्रकरण गीताशास्त्रे महताग्रन्थे नैश्वर्यार्थिनां प्राप्यभूतैश्वर्यस्य ब्रह्मादिपद प्राप्तिरूपस्य कालविशेषे ऽ वश्य विनाशित्वेना वर्जनीय पुनरावृत्तिकतां प्रतिपाद्य ज्ञानिनां प्राप्यभूत भगवत्तत्त्वस्य विनाश प्रसंगाभावेन पुनरावृत्त्यभावं प्रतिपाद्य तथैव कैवल्यार्थिना मपि जिज्ञासु शब्दितानां प्राप्यभूत प्रकृतिवियुक्त प्रत्यगात्मतत्त्वस्या विनाशित्वेना पुनरावृत्तिं प्रतिपाद्य तत ऐश्वर्यार्थिनां पुनरावृत्ति हेतु धूमादिगतेः ज्ञानिनां जिज्ञासूनांचा पुन-

रावृत्ति हेत्व र्चिरादिगतेश्च स्फुटतरं प्रतिपादनेन तद्विरोधस्य दुष्परिहरत्वात्। एवं सर्वत्र श्रुतिस्मृति ष्वैश्वर्यार्थि लक्षणैकं विधाधिकारिणां पुनरावृत्ते स्तदन्य द्विविधाधिकारिणा मपुनरावृत्तेश्च प्रतिपादन दर्शनेने हैकविधाधिकारिमात्रस्या पुनरावृत्तिं प्रतिपाद्य तदितरेषां सर्वेषामविशेषेणपुनरावृत्तिप्रतिपादनेसकलशास्त्रविरोध प्रसंगाच्च ॥१०३॥

गीताशास्त्रे ह्यष्टमाध्याये " आब्रह्म भुवनाल्लोकाः पुनरावर्तिनोर्जुने" त्यादि षोडशश्लोका द्येकोनविंशश्लोकान्तग्रन्थे नैश्वर्यार्थिनां प्राप्यभूत ब्रह्मादिपदैश्वर्यविनाशेना वर्जनीयं पुनरावृत्तिमत्वं प्रतिपादितं ॥१०४॥

"मामुपेत्य पुनर्जन्म दुःखालय मशाश्वतं। नाप्नुवन्ति महात्मान स्संसिद्धिं परमांगता" इति पंचदशश्लोकेन - " मामुपेत्यतु कौन्तेय पुनर्जन्म नविद्यत " इति षोडशश्लोकोत्तरार्धेनच परमकारणभूत भगवत्तत्त्वस्य कदाचिदपि विनाशप्रसंगाभावेन तदेकप्राप्यानां ज्ञानिनां प्राप्यविनाशप्रसंगाभावेना पुनरावृत्तिः प्रतिपादिता ॥ १०५ ॥

" परस्तस्मात्तुभावो ऽन्योऽव्यक्तोऽव्यक्ता त्सनातनः। यस्स सर्वेषु भूतेषु नश्यत्सु न विनश्यति ॥ अव्यक्तोक्षर इत्युक्त स्तमाहुःपरमांगतिम् । य म्प्राप्य ननिवर्तन्ते तद्धाम परमं मम ॥ " इति विंशैकविंशश्लोकाभ्यां जिज्ञासुशब्दितानां कैवल्यार्थिनामपि प्राप्यभूत प्रकृतिवियुक्तप्रत्यगात्म तत्त्वस्याविनाशित्वेना पुनरावृत्तिमत्त्वं प्रस्फुटं प्रतिपादितम् ॥ १०६ ॥

एवं पंचदशाध्यायेपि - " ततःपदं तत्परिमार्गितव्यं यस्मिन्गता ननिवर्तंति भूय " इति चतुर्थश्लोके - " गच्छन्त्यमूढाः पदमव्ययन्त " दिति पंचमश्लोके - " यद्गत्वाननिवर्तंते तद्धामपरमम्ममे " ति षष्ठश्लोकेच प्रकृतिविनिर्मुक्त प्रत्यगात्मस्वरूपस्य नित्यता प्रतिपादन पूर्वकं तत्प्राप्तिकामानां पुनरावृत्त्यभावएव प्रतिपादितः ॥ १०७ ॥

तस्मात " सर्वेच्यवनधर्माणः प्रतिबुद्धस्तु मोक्षभागित्यादि " वचन घटितमोक्षधर्मप्रकरणस्यैकान्ति प्रतिबुद्धशब्दित ज्ञानिलक्षणैकविधाधिकारिमात्रस्या पुनरावृत्ते स्तदितराधिकारिणां त्रयाणां पुनरावृत्तेश्च प्रतिपादनपरता नकथंचिदपि सम्भवति, दर्शितान्यथा सिद्धिगन्धानर्हा तिस्फुटार्थक कैवल्यार्थ्य पुनरावृत्तिप्रतिपादकसमानप्रकरणगीतादि ग्रन्थविरोधात । इह तत्तत्फलार्थिनां तत्तत्प्राप्यस्य विनाशादेव पुनरावृतेः प्रतिपिपादयिषिततया प्रकृतिवियुक्त प्रत्यगात्मतत्त्व लक्षण प्राप्यस्याक्षरशब्दवाच्यस्य कदाचिदपि नाशप्रसंगाभावेन तदर्थिनां जिज्ञासूनां प्राप्यविनाशाधीन पुनरावृत्ते रसम्भावितत्वाच्च ॥ १०८ ॥

किञ्च – " सर्वे च्यवनधर्माण " इत्यस्य प्रतिबुद्धेतराधिकारि सामान्योद्देशेन पुनरावृत्ति प्रतिपादनपरत्वे पंचाग्निविदां श्रुत्यादि प्रतिपन्नस्या पुनरावृत्तिमत्त्वस्य भवतामपि सम्प्रतिपन्नतया तद्वचन विरोधो भवतामपि दुरुद्धर एवस्यात् ॥ १०९ ॥

एवं पंचाग्निविदामपि मोक्षभाक्त्वस्य भवतां सम्प्रतिपन्नतया प्रतिबुद्धस्या विशेषेण मोक्षभाक्त्वेन सकलेतरव्यावृत्त्यभिधानमसंगतं ॥११०॥

नचात्र प्रतिबुद्धशब्दः पंचाग्निविदां परमपुरुषनिष्ठानांच साधारणइति नात्र कश्चिद्विरोधइति वाच्यं; - " तेषां ज्ञानी नित्ययुक्त एक भक्ति विशिष्यत " इति, " आस्थित सहि युक्तात्मा मामेवा नुत्तमां गति " मितिच गीताशास्त्रेणै कभक्तित्वेन भगवदेकप्राप्यत्वेनचा भिहितस्य ज्ञानिनः परमपुरुष निष्ठतायाः एवावगमेन तद्विभक्ता त्प्रकृति वियुक्त प्रत्यगात्म लक्षण प्राप्यान्तरनिष्ठाच्च पंचाग्निविदो व्यावृत्तत्वा त्तत्स्थानीयस्य दर्शित मोक्षधर्मवचन प्रकरण एकान्तिप्रतिबुद्धशब्दाभिहितस्याधिकारिणोपि तेषा मेकान्तिनश्रेष्ठा स्तेचैवानन्यदेवता'इति 'अह मवगतिस्तेषां निराशीः कर्मकारिणा' मितिच तद्वदेवानन्यदेवतात्वलक्षणै·

कभक्तित्वेन भगवदेकप्राप्यत्वेनच प्रतिपन्नस्य पंचाग्निविद्यावृत्ततायां दुरपह्नवतया प्रतिबुद्धशब्दस्योभयसाधारण्यासम्भवात् ॥ १११ ॥

भगवदेकप्राप्यत्वलक्षणं परमपुरुषनिष्ठत्वं पञ्चाग्निविद्यावृत्त मिति तु गीताष्टमाध्याये त्रयोविंशचतुर्विंशश्लोकावतारिकायां- "अथा त्मयाथात्म्यविदः परमपुरुषनिष्ठस्य च साधारणी मार्चिरादिकां गति माहे"त्यभिदधता भाष्यकारेणैव सुव्यक्त मुक्तम् ॥ ११२ ॥

षड्विंशश्लोकभाष्ये "द्विविधानां ज्ञानिना" मिति निर्देश स्तु चतुर्विंशश्लोके -"तत्र प्रयाता गच्छन्ति ब्रह्मब्रह्मविदो जना" इत्येकोक्त्या जिज्ञासुज्ञानिरूप द्विविधाधिकारिणा मेकोक्त्या ऽर्चिरादिगति विधानार्थं ब्रह्मप्राप्तिप्रयोजकविद्यावत्त्वेन मूलोक्तजिज्ञासुज्ञानिरूपद्वि-विधाधिकारि क्रोडीकारानुवादमात्रं, अन्यथा पूर्वोक्तजिज्ञासुभिन्न ज्ञानिन एव पंचाग्निविदादिरूपेण द्विविधत्वपरत्वे तस्यैकभक्तित्व भगवदेकप्राप्यत्वाभिधानविरोधापत्तेः ; पंचाग्निविदः प्रकृतिवियुक्त प्रत्यगात्मलक्षणप्राप्यान्तरानिष्ठत्व तन्मूलद्विभक्तत्वयो र्भवता मपि सम्प्रतिपन्नत्वात ; जिज्ञासुभिन्नस्य ज्ञानिनो द्विविधत्वेन पूर्वं क्वाप्य नुक्तत्वेनेह तथा तदनुवादायोगात् ; पंचाग्निविदो जिज्ञासुभिन्नत्वे तस्येहाप्रस्तुततया मूले भाष्ये च तस्य गत्यभिधानस्य प्रस्तुत जिज्ञासो र्गत्यकथनस्य चासम्बद्धत्वप्रसंगात् । गीताष्टमाध्यायपंचदश श्लोकावतारिकाभाष्येण "अतः पर मध्यायशेषेण ज्ञानिनः कैवल्या-र्थिन श्चापुनरावृत्ति मैश्वर्यार्थिनः पुनरावृत्तिं चाहे" त्येवंरूपेणाध्याय शेषस्य दर्शिताधिकारित्रयविषयतायां एवोक्तत्वेन तदतिरिक्ताधि कारिविषयत्वासम्भवात , पूर्वप्रक्रान्तजिज्ञासुत्याज्योपादेयविषयाष्टमा ध्यायतृतीयश्लोके - अक्षरं ब्रह्मपरम मित्यादिके पञ्चाग्निविद्याया एव जिज्ञासूपादेयविद्यात्वेन प्रतिपाद्यमानतायाः स्वद्भाष्ये व्यक्तत्वेन पञ्चा ग्निविद एव जिज्ञासुरूपतायाः स्स्पष्टत्वात ; गीताष्टमाध्यायत्रयोविंश चतुर्विंशश्लोकव्याख्यानावसरे गीतार्थसंग्रहाख्यव्याख्यायां -"ज्ञानिनां

जिज्ञासूनां चापुनरावृत्तिमार्गं " मिति पङ्क्त्या, " ज्ञानिनः परं ब्रह्म गच्छन्ति - जिज्ञासवो विविक्तात्मस्वरूपं ब्रह्म गच्छन्तीति विवेक " इति पङ्क्त्याच तत्रत्यार्चिरादिगत्यभिधानस्य ज्ञानिजिज्ञासुविषयतयैव श्रीयामुनाचार्यपादै र्व्याख्यातत्वेन तद्विरोधप्रसंगाच्च ॥ ११३ ॥

तस्मा त्प्रस्तुतो जिज्ञासुरेव पंचाग्निवित् - सच न प्रतिबुद्ध शब्देनेह विवक्षितः - अपितु सर्वशब्देनेत्येवोपगन्तव्यम् ॥ ११४ ॥

तथाच च्यवनधर्मत्वस्य पुनरावृत्तिरूपत्वे श्रुत्यादिभि रपुनरावृत्तिमत्त्वेन प्रतिपन्नस्य पंचाग्निविदः पुनरावृत्तिमत्त्वप्रतिपादन विरोधो दुष्परिहर एव ॥ ११५ ॥

यदपि मन्यन्ते पूर्वपक्षिणः - पंचाग्निविद्यानिष्ठस्य प्रकृतिमण्डले क्वचि दात्मानुभवः पूर्वं भवति - तस्मा दपगतस्य तस्य पश्चादेव ब्रह्मप्राप्तिः - आत्मानुभवा दपगमाभिप्रायकतया च्यवनधर्मत्वाभिधान मुपपद्यत इति ॥ ११६ ॥

उक्तं हि तै र्गीताष्टमाध्याय त्रयोविंशादिश्लोकभाष्य तात्पर्यचन्द्रिकायाम् -" पंचाग्निविदोपि ब्रह्मप्राप्ति रस्त्येवेति स्वीकर्तव्यम् - तत्र प्राप्तौ ज्ञानिनां परमात्मा स्वविशिष्टो भोग्यः - अक्षरयाथात्म्य निष्ठानां स्वस्वरूप मेव पूर्वं भोग्यं - वस्वादिपदप्राप्तिपूर्वकब्रह्मप्राप्ति साधनमधुविद्यान्याया दन्ततो ब्रह्मप्राप्ति" रिति, " आत्ममात्रानुभव सुखस्या स्थिरत्वादेव च्यवनधर्मत्व मुच्यते - न तावता पुन स्संसारप्रसंग " इति च ॥ ११७ ॥

त देत दत्यन्त मुपहास्यं, ईदृशकथाकल्पनायाः प्रमाणेषु पूर्वाचार्यश्रीसूक्तिषु वा क्वाप्याकरक्लेशादर्शना दतिप्रसंगभयेनातीन्द्रियार्थे स्वैरं कल्पनायोगाच्च स्वोत्प्रेक्षामात्रविजृम्भिताया अस्याः प्रमाणशरणै रंगीकारायोगा दीदृशकल्पनाया स्सर्वथैवानुपपन्नताया वक्ष्यमाणत्वात् । तादृशच्यवनधर्मत्वस्य मोक्षभाक्त्व एव पर्यवस

त्वतया प्रत्युत श्लाघाहेतुभूतस्य निन्दाहेतुत्वासम्भवात् । "सर्वे च्यवनधर्माण" इति प्रतिबुद्धेतरेषां सर्वेषां च्यवनधर्मत्वेन निन्दाया एवेह विवक्षितत्वात् । पंचाग्निविदा मपि मुख्यमोक्षस्याभ्युपगमेन - 'प्रतिबुद्धास्त्वि' ति तु शब्देन मोक्षभाक्त्वेन प्रतिबुद्धस्य स्वेतरसकल व्यावृत्तत्वाभिधानासंगते दुर्वारत्वाच्च ॥ ११८ ॥

किञ्च - पंचाग्निविदो ज्ञान्यविशिष्ट भवदभिमतपरिपूर्णब्रह्म प्राप्तिदशायामपि कैवल्यपुरुषार्थभूत प्रकृतिवियुक्तप्रत्यगात्मानुभव लोपाभावेन निवृत्तिलक्षणं भवदभिमतं च्यवनधर्मत्व मपि तस्य न सम्भवदुक्तिकम् ॥ ११९ ॥

नन्वात्ममात्रानुभवस्यैव कैवल्यार्थिपुरुषार्थतया परिपूर्णब्रह्मप्राप्ति दशायां तन्निवृत्ति र्निराबाधैव - ब्रह्मप्राप्त्यभावविशिष्ट प्रत्यगात्म प्राप्ते रेवा त्ममात्रानुभवरूपतया तदानीं विशेषणाभावादेव विशिष्टाभावसिद्धे रिति चेत्? विशेषणप्रक्षेपेण विशिष्टाभावं साधयन्तो भवन्त स्तार्किकसिद्धा इति तु दृढं विश्वसिमः ॥ १२० ॥

परन्तु अधिकन्तु प्रविष्टं नतु तद्धानिकरमितिन्यायेन ब्रह्मप्राप्ते रधिकाया स्तदानीं सम्भवेपि स्वपुरुषार्थभूत प्रकृतिवियुक्तात्म प्राप्ते र्विच्छेदाभावेन ब्रह्मप्राप्ति विशिष्टाया आत्मप्राप्ते रधिकाभ्युदय रूपायाः प्रत्युत श्लाघाहेतुत्वेन निन्दाहेतुत्वोत्कीर्तनमेवा संगत मिति विचार्यताम् ॥ १२१ ॥

प्रतियोगिनि सत्येव पूर्वक्षण वृत्तित्व वैशिष्ट्य व्यासज्यवृत्ति धर्मावच्छिन्नस्य तस्यैा भावसम्पादनव दात्मप्राप्तौ सत्यामेव किञ्चि द्विशेषण विशिष्टायास्तस्या अभावसम्पादनस्या किंचित्करत्वेन निन्दा हेतुत्वं हि दुर्वचं, अन्यथा ज्ञानिनामपीदृश यत्किंचि द्विशेषण विशिष्ट तत्पुरुषार्थाभावस्य सुवचतया तेष्वपि च्यवनधर्मत्वेन निन्दाप्रसंगस्य दुर्वारत्वात् ॥ १२२ ॥

किंच यद्विरहेणाधिकार्यन्तराणां निन्द्यत्वं शास्त्राभिमेतं – तत्स द्भावं निन्दाहेतुतया शास्त्रं प्रतिपादयतीति नहि कश्चिदनुन्मत्तो ब्रूयात् ॥ १२३ ॥

ब्रह्मप्राप्ति विरहेणैव हि ज्ञानीतरां श्च्यवनधर्मत्वेन निन्दति शास्त्रम् ॥ १२४ ॥

कैवल्यार्थिनां प्रकृतिवियुक्तात्म प्राप्ते रपेक्षितत्व दर्शनेपि ब्रह्म प्राप्त्यभावेनापि भवितव्य मितीदृशापेक्षानिर्बन्धो न क्वचि दुपलभ्यते येनेदृश कल्पनापि कथंचित्सम्भवदुक्तिका स्यात् ॥ १२५ ॥

"जरामरण मोक्षाय मामाश्रित्ययतन्तिये" इति गीतायां सप्तमा ध्यायैकोनत्रिंशश्लोके – 'जरामरणमोक्षाये' त्येतावन्मात्र निर्देशात् – तद्भाष्ये प्रकृतिवियुक्तात्म स्वरूपदर्शनायेत्येव व्याख्यानात् – "यः प्रयातित्यजन्देहंसयाति परमांगति" मित्यष्टमाध्याय त्रयोदशश्लोकभाष्ये सयाति परमांगतिं – प्रकृतिवियुक्त म्मत्समानाकार मपुनरावृत्ति मात्मानं प्राप्नोती त्यर्थइति – व्याख्यानात्, 'ते प्राप्नुवन्ति मा मेवे' ति द्वादशाध्याय चतुर्थश्लोकभाष्ये – तेपि मां प्राप्नुवन्त्येव- मत्समानाकार मसंसारिण मात्मानं प्राप्नुवन्त्येवेत्येवकार मयोगव्यवच्छेदपरं व्याख्याय ब्रह्मप्राप्ति व्यवच्छेदाभाव ज्ञापनात्, प्रत्युत पंचाग्निविदां ब्रह्मप्राप्ते रपि सद्भावस्य भाष्यादिषु सर्वत्रैव भाष्यकारै रुक्तत्वात्, कार्याधि करण वेदान्तदीपे–"पंचाग्निविदो हि प्रकृति विविक्त ब्रह्मात्मकात्म स्वरूपविदः – तेच तत्प्राप्य पुनर्न निवर्तन्त" इति पङ्क्त्या तेषां प्रकृति विविक्त ब्रह्मात्मकत्व विशिष्टात्मस्वरूप प्राप्तेरभिधानेन – वेदार्थसंग्रहे परमशब्दवाच्यतायाः स्थानविशेष प्रकृतिवियुक्तात्म स्वरूप भगव त्स्वरूपेषु त्रिष्वपि सद्भाव निरूपणप्रकरणे – भगवत्स्वरूपं परम प्राप्यत्वादेव परमम्पदं – इतरयोरपि भगवत्प्राप्ति गर्भत्वादेव परम पदत्वं – सर्वकर्म विनिर्मुक्तात्म स्वरूपावाप्ति र्भगवत्प्राप्ति गर्भेति

पङ्क्त्या प्रकृतिवियुक्तात्मस्वरूप प्राप्तेः ब्रह्मप्राप्ति गर्भत्वाभिधानेनच तेषां जायमानायाः प्रकृतिवियुक्तात्मस्वरूप प्राप्ते ब्रह्मप्राप्ति वैशिष्ट्यस्य तदानीमेव नियतत्वावगमाच्च, पञ्चाग्निविदां ब्रह्मप्राप्त्यभाव विशिष्टात्म स्वरूपावाप्तेः कदा चिदपि सम्भवा दर्शनेन - तेषां पूर्वं प्रकृतिमण्डले क्वचि च्चिरकालमात्म मात्रानुभवः - पश्चादेव ब्रह्मप्राप्तिरिति पूर्वपक्षिणां कथाकल्पनं प्रमाणा परामर्शमूल मत्यन्तहेय मेवेत्यवधेयं ॥ १२६ ॥

प्रकृतिमण्डल एव क्वचि दात्मानुभवस्थाना भ्युपगमाद्देश विशेषा वच्छिन्नत्व विशिष्टात्मानुभव लक्षण स्वप्राप्यपुरुषार्थाभाव रूपं च्यवनधर्मत्वं पञ्चाग्निविदो ब्रह्मप्राप्तिदशायां सम्भवतीतिचे त्सर्वलोक कामचारिणो मुक्तस्यापि देशविशेषावच्छिन्नत्व विशिष्ट ब्रह्मानुभव लक्षण स्वप्राप्यपुरुषार्थाभाववत्त्व लक्षण च्यवनधर्मत्व मस्त्येवेति तादृश च्यवनधर्मत्वस्य प्रतिबुद्धेतर निन्दाहेतुत्वेनाभिधानं न संगच्छते ॥१२७॥

अपिच - च्यवनशब्दस्य क्वचि न्निवृत्तिमात्र औपचारिक प्रयोगसत्त्वेपि-"तत्त्वेनात श्च्यवन्तित" इत्यादिषु सर्वत्रोपरितना द्वस्तुनो ऽर्वाचीनप्राप्तेरेव च्यवनशब्द मुख्यार्थतयाऽर्वाचीनवस्तुन उपरितन वस्तु प्राप्तिरूपः पंचाग्निविदां भवदभिमत आत्मानुभवा दपगम स्स्वरसत श्च्यवनशब्दार्थएव न भवितुमर्हति ॥ १२८ ॥

यदपि - सर्वे च्यवनधर्माण इत्यत्र - परिमित सुखानुभव विलम्बेन तदानीं निरतिशय सुखाद्भ्रष्टत्वेनापि निन्दोपपत्ति स्स म्भवतीति उपासनदशानुभूते परमात्मनि फलदशायां किंचित्काल मनुभव विच्छेदाद्वा प्राप्त भ्रंशलक्षणं च्यवनधर्मत्वमिति च कथंचि न्निन्दासमर्थनं ॥ १२९ ॥

तदपि हेयं, तथासति तत्र परब्रह्मानुभव लक्षण निरतिशय सुखानुभवाद्भ्रंश रूपास्मदभिमत च्यवनस्यैव निन्दाहेतुत्वेन ब्रह्मप्रा प्त्यर्थ स्वात्मानुभवा दपगमस्या त्मानुभवस्थाना दूर्ध्वगमनात्मकस्य

भवदभिमतौपचारिक च्यवनरूपस्य प्रत्युत प्रशंसाहेतो र्निन्दाहेतुत्वा सम्भवे प्रागुक्तासंगते स्तदवस्थत्वात ॥ १३० ॥

यदपि–"प्रतिबुद्धस्तु मोक्षभागि" तिचा व्याहत मोक्षभाक्त्वं प्रति बुद्धस्योच्यते · नता वता ऽ न्यस्य मोक्षाभाव इति तद्वचने प्रतिबुद्धस्य सकळेतर व्यावृत्तत्वाभिधान समर्थनं ॥ १३१ ॥

तदपि हेयमेव, दर्शितवचने मोक्षशब्दस्या व्याहत मोक्षलक्षणा कल्पने गमकाभावात्, निर्मूळ भवदीयकल्पना विशेषस्य वचनप्रतिपन्नमु ख्यार्थ बाधकत्वायोगात्, प्रत्युतवचनेनैव प्रतिबुद्धेतरेषां मोक्षाभावं स्वसा मर्थ्यतः प्रतिपादयता भवदीयकल्पनाविशेषस्य प्रतिरोधसम्भवाच्च॥१३२॥

किञ्च त्प्रमाणगत शब्दस्य तुल्यबळ प्रमाणान्तर प्रतिपन्नार्था नुगुण्येन लक्षणाकल्पन सम्भवेपि निर्मूळभवदीयकल्पना विशेषमात्रं न तस्य स्वानुगुणार्थ विशेषे लक्षणाकल्पना बीज म्भवितुमर्हति ॥१३३॥

पंचाग्निविदां प्रकृविमण्डलएव क्वचित्स्थानविशेषेप्रथममात्ममात्रा नुभवः, ततः पश्चात्सुचिरविळम्बेन मोक्षप्राप्तिरिति भवदीयकल्पना विशेषेहि न किंचित्प्रमाणमिति; कल्पनाच्च वचनविरोधेन नप्रभवितु मर्हतीतिच प्रागेवावोचाम ॥ १३४ ॥

एव मव्याहत मोक्षभाक्त्वं नाम प्रतिबन्धकीभूत कर्मविशेषप्र· योज्यविळम्बमन्तरेणैव मोक्षभाक्त्वमितिवक्तव्यं, तच्च प्रतिबुद्धाना· मपि सर्वेषां प्रायशोनसंभवत्येव, तेष्वपि शीघ्रमोक्षप्राप्ति प्रतिबन्धक बहुशरीर बहुकालानुभाव्यफलहेतुप्रारब्धकर्मबाहुळ्यसम्भवस्य प्रमाण प्रतिपन्नत्वादिति नायं धर्मस्सर्वेषां प्रतिबुद्धानां स्वेतरसकळव्यावर्तका कारोभवितु मर्हति ॥ १३५ ॥

प्रतिबुद्धानामपि प्रतिबन्धकीभूतप्रारब्धकर्मविशेषप्रयोज्य मोक्षवि· ळम्बः, "भोगेनत्वितरेक्षपयित्वा ऽथसम्पद्यते" ॥ शा - ४ - १ - १९॥ इत्यधिकरणेस्पष्टः ॥ १३६ ॥

तथाच - कैवल्यफलानित्यत्वसाधकतया पूर्वपक्ष्यभिमतस्य च्यवनधर्मत्वस्य कस्यचिद्दुर्वचत्वात् , सकलेतरव्यावृत्ततया सकलप्रतिबुद्धसाधारणतयाच प्रतिपद्यमानस्य मोक्षभाक्त्वस्य प्रागुक्तहेतुभि रव्याहतमोक्षभाक्त्वरूपताया दुर्वचत्वाच्च, परमप्राप्त्या परस्मा द्ब्रह्मण स्वेच्छसेवकभावसंयोगनिवृत्तिरूपप्रच्युतिशीलत्वलक्षणं यथोक्तरूपं च्यवनधर्मत्वमेवप्रतिबुद्धेतरेषां निन्दाहेतुतया दर्शितवचनाभिप्रेतं । परमात्मप्राप्तिप्रकृतिवियुक्तप्रत्यगात्मप्राप्तिलक्षण द्विविधमोक्षयोः प्रागुदाहृतै रुत्तरत्रोदाहरिष्यमाणैश्च प्रमाणैःप्रतिपाद्यमानत्वा त्तत्र परमात्मप्राप्तिलक्षणमोक्षस्यैव प्रकृष्टत्वात , " साविद्यायाविमुक्तय " इत्याद्युक्तन्यायेन प्रकृष्टमोक्षस्यैवेह मोक्षशब्दविवक्षितत्वसम्भवाच्च , प्रकृष्टमोक्षभाक्त्वमेवच सकलेतरव्यावृत्त सकलप्रतिबुद्धसाधारणाकारतया दर्शितवचनाभिप्रेत मित्यभ्युपगन्तव्यमिति नेदं वचनं कैवल्यार्थिनः फलानित्यत्व साधकमितिसिद्धम् ॥ १३७ ॥

किं बहुना - सम्प्रदायतश्शास्त्रार्थग्रहणेन यथावस्थित शास्त्रार्थस्य सर्वशास्त्रैककण्ठ्यस्यचा परिज्ञानाच्च स्वोत्प्रेक्षामात्रविजृम्भितविपरीत तर्कै र्दर्शितमोक्षधर्मवचनशकलस्य प्रागुक्तपरश्शतान्यथासिद्धिसंवलितस्या पुनरावृत्त्यादि प्रतिपादनमुखेन विशदतरकैवल्यपुरुषार्थनित्यता प्रतिपादकसमानप्रकरण श्रुतिस्मृत्यादि बहुप्रमाणविरुद्धाप्रतिष्ठित विपरीतार्थवर्णनं कुर्वाणान् तदानुगुण्येना न्यथासिद्धानेकप्रमाणान्यथा नयनेच प्रयतमानानेतान् किमहो विपरीत मेतत्पाण्डित्यमिति विद्वांसो विहसंतीति दर्शितमोक्षधर्मवचनशकलं नकिंचिदपि पूर्वपक्ष्यभिमत भिक्षादानदक्षम् ॥ १३८ ॥

यदपि प्राक्पूर्वपक्षभागे तृतीयवाक्योदाहृत रहस्यत्रयसारग्रन्थामार्गते द्वितीयांकचिह्नितवाक्योदाहृतमोक्षधर्मवचने " जिज्ञासुर्लभते भक्ति" मित्यनेन गीताशास्त्रोक्तजिज्ञासुशब्दिताधिकारिण स्स्वप्राप्यपुरुषार्थ

लाभानन्तरं प्राप्यान्तरप्राप्तिहेतुभक्तियोगलाभप्रतिपादनं प्रदर्शयन्त: पूर्वपक्षिणो जिज्ञासुप्राप्यकैवल्यपुरुषार्थस्य दर्शितवचनेना नित्यतासि द्धिम्मन्यन्ते ॥ १३९ ॥

तदप्ययुक्तं –" मुच्येतार्त स्तथारोगाच्छ्रुत्वे मामादितः कथां । जिज्ञासुर्लभते भक्तिभक्तोभक्तगतिलभेदि"ति श्रीभारत . शान्तिपर्वस्थ श्रीनारायणीयोपाख्यानान्तर्ग तैकचत्वारिंशदुत्तर त्रिशततमाध्यायस्थ वचने तत्प्रकरणाभिहित कथाविशेषश्रवणफलप्रतिपादनपरे वर्तमान स्य जिज्ञासुशब्दस्य ज्ञानप्राप्तीच्छुविषयत्वेन कैवल्यार्थि विषयत्वाभा वात् । कैवल्यार्थिनो गीताशास्त्रोक्त जरामरणमोक्षलक्षणफलानभिधा नेन भक्तेरेवफलतया निर्देशेनच भक्तियोगरूपज्ञान प्राप्तीच्छुविषय ताया स्स्पष्टत्वात् । रुग्णविषयार्तपदसाहचर्यादिभि रार्तार्थार्थिज्ञानिरूप गीताशास्त्रोक्ताधिकार्यंतरसाहचर्याभावेनच कैवल्यार्थिविषयत्वासिद्धः । तथा त्वस्याभ्युपगमेपि कैवल्यप्राप्तिप्रयोजकभक्तियोगलाभप्रतिपादक ताया एवास्य वचनस्य सुवचत्वसम्भवेन कैवल्यार्थिन स्स्वप्राप्य कैवल्यप्राप्त्यनन्तरं प्राप्यान्तरप्रापकभक्तियोगलाभपरत्वेप्रमाणाभावात । लोकविशेषे कैवल्यपुरुषार्थमनुभवतो ऽधिकारिणो निश्शेषनिर्दग्ध देहेंद्रि यादिसर्वोपकरणस्य तदानीं भारतकथाविशेष श्रवणप्रसंगस्यैवाभावेन तस्य तादृशकथाश्रवणायत्तभक्तिलाभकथायाएव सुदूरपराहतत्वाच्च । दर्शितवचनस्य सर्वथैवान्यथा सिद्धस्य कथंचिदपि कैवल्यानित्यता साधकत्वायोगात् ॥ १४० ॥

यदप्युक्तं – प्राक्पूर्वपक्षभागे तृतीयवाक्योदाहृत रहस्यत्रयसार ग्रन्थान्तर्गत तृतीय चतुर्थवाक्ययोः श्रीमुखसूक्ताख्य द्राविडब्रह्मसंहि तायां भगवदनुभवस्यानित्यत्वाभिधाने नाप्येतद्व्यवच्छेद आत्ममात्रानुभवो नित्योनेत्यंशोव्यंजितइति, अस्य षष्ठकाण्डनवमश्रीमुखसूक्त दशमगा थादिषु नाशराहित्योक्तिरपि चातुर्मास्यादिकर्मफलविशेषे त्वक्षय्यत्वो क्तिवदतिचिरकालस्थायित्वाभिप्रायेतिच ॥ १४१ ॥

नून मिय मकाण्डे ताण्डवप्राया सर्वा भवदुक्तिः -"अन्येन्द्रकं भुवन मन्यदनिन्द्रकं वा कर्तुं क्षमे कवि रभू दयमन्ववाये।" इत्युक्तभवद्गोत्रवैभवानुगुणा वैश्वामित्री सृष्टिरेव, इतः पूर्वं द्राविडवेद भाष्यकारेषु केनापि दर्शितशास्त्रस्यानेन वर्त्मना व्याख्यानाकरणादस्य वर्त्मन स्स्वरसतो मूलेना प्यलाभा दपूर्वमेव भवद्भि स्स्वोत्प्रेक्षामात्रकल्पितत्वा च्च ॥ १४२ ॥

दर्शितप्रथमकाण्डद्वितीयश्रीमुखसूक्त पंचमगाथायां भवदभिगानानुरोधेनापि कैवल्यपुरुषार्थानित्यतायां लिंगमेव प्रतिपद्य तेन षष्ठकाण्डनवमश्रीमुखसूक्त दशमगाथादिषु प्रतिपन्नां कैवल्यानित्यता श्रुतिं बाधमाने भवद्भिः - श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानां समवाये परदौर्बल्य मर्थविप्रकर्षात् ॥ ३ ॥ ३ ॥ १४ ॥ इति पूर्वतन्त्र शास्त्रार्थविचारकुशलता सम्य गाविष्कृता ॥ १४३ ॥

द्राविडवेदतदंगोपांगेषु दिव्यसूरिभि स्तत्तद्भाष्यकारै श्च कैवल्यं नित्य मित्येव सोपपत्तिक मन्यथासिद्धिगन्धानर्हं स्पष्टमेव निरूपित मिति सैषा कथा तेषु कथंचिदपि दुरारोपैव ॥ १४४ ॥

दर्शितपंचमगाथायां कैवल्योक्त्यनन्तरं भगवत्प्राप्तिलक्षणपुरुषार्थस्य नित्यत्वोक्त्या कैवल्यस्यानित्यत्वं व्यज्यत इत्युक्ति स्तावदयुक्ता, तत्र प्रथमं भगवत्प्राप्तिलक्षणपुरुषार्थस्य नित्यत्वाभिधानस्यैवासिद्ध्या ततः कैवल्यस्यानित्यत्वव्यंजनासिद्धेः ॥ १४५ ॥

इद मत्रावधेयं - नह्यत्र कैवल्यस्यानित्यत्वं साक्षा दभिधीयते - अपितु तत्सहचरितभगवदनुभवस्य नित्यत्वोक्त्या कैवल्यस्यानित्यत्वं व्यज्यत इति हि भवद्भि रुच्यते - तदेतन्न सम्भवति - षष्ठकाण्डनवमश्रीमुखसूक्तदशमगाथादिषु प्रस्फुटार्थकेन शब्देन नित्यत्वाभिधानेन तद्विरोधात , नखलु लिंगं श्रुतिं बाधितुं प्रभवति, अनेकप्रमाणगणसंवादिनी नित्यत्वसमर्थकैश्वर्यप्रावृत्तत्वमहादुःखरूपत्व

मोक्षरूपत्वाद्यभिधानलक्षण बहुळानुकूललिंगानुगृहीता चेयं कैवल्य नित्यत्वश्रुति रतिप्रबला नानार्थकतया सन्दिग्धार्थकशब्दाधीनभगव दनुभवानित्यत्वप्रतिपादनरूपेण लिंगेन परमदुर्बलेन कथमिव बाध्येत । तस्मा द्दर्शित गाथायां भगवत्प्राप्तिलक्षणपरमपुरुषार्थवाचिन श्शब्द- स्य नानार्थकस्य समानप्रकरणस्थ कैवल्यनित्यत्वश्रुत्यविरोध्याकारेण ताहशपुरुषार्थपरताया एव सिद्धया कैवल्यस्य स्वरूपाननुरूपत्वाप कृष्टत्वादिव्यंजन मेव सिद्ध्यति न पुनरनित्यत्वव्यंजन मिति ॥ १४६ ॥

दर्शितपद्यमगाथाहि - नष्ट स्संग इति चे त्प्राप मोक्ष मात्मा, परिहृत्य तं निश्चलस्थितिं प्रेप्ससि चे त्तदर्थीभूय स्वामिनं भजेत्येव मर्थिका दृश्यते ॥ १४७ ॥

निश्चलस्थितिं प्रेप्ससि चेदिति स्थाने - नित्ययोगं प्रेप्ससि चे दिति वा प्रतिसंस्कारो भवितु मर्हति - तत्रत्यस्य - मन्नुरिलि द्राविडशब्दस्यं नानार्थकस्य द्वेधापि व्याख्यानसम्भवात ॥ १४८ ॥

अस्या श्चाय मर्थः - संगः - प्राकृतविषयसंगः । नष्ट इति चेत् । विषयसंगे नष्टे सतीति यावत् । आत्मा । मोक्षं - कैवल्य लक्षणमोक्षम् । प्राप । अत्र प्रापेति भूतकालनिर्देशः प्राप्तिदार्ढ्यं ज्ञापनार्थः । तम् - कैवल्यमोक्षम् । परिहृत्य - स्वरूपाननुरूपत्वादि नोपेक्ष्य । निश्चलस्थितिं प्रेप्ससि चेत् - स्वरूपानुरूपं परमं च भगवत्प्राप्तिलक्षणं पुरुषार्थं प्राप्य पुरुषार्थान्तरचापलप्रसंगविधुरस्थितिं लब्धु मिच्छसि चेत् । नित्ययोगं प्रेप्ससि चेदिति प्रतिसंस्कार पक्षे - भगवत्सेवनेन स्वरूपाननुरूप मपकृष्टं च पुरुषार्थान्तरं प्राप्य ततः परमप्राप्त्या द्भगवतः प्रच्युति मन्तरेण तेनैव सह सेव्यसेवक भावेन याव दात्मभाविसम्बन्धं प्राप्तु मिच्छसि चेदित्यर्थः । स्वा- मिनं - परमशेषिभूतं श्रीमन्नारायणम् । तदर्थीभूय - प्रथममेव तच्छे षतैकरसो भूत्वा । भज - प्राप्यतया प्रपद्यस्वेति ॥ १४९ ॥

अत्र द्वितीयपक्षः - गीताशास्त्रे - तेषां ज्ञानी नित्ययुक्त इत्यादिषु प्रयुक्तनित्ययुक्तशब्दसमानविषयतया तदेककण्ठः चतुर्थकाण्डप्रथम श्रीमुखसूक्तदशमगाथैककण्ठ श्च ॥ १५० ॥

एव मत्र प्रथम मेव भगवतः प्राप्यतया भजनप्रतिपादनं कैवल्य मोक्षप्राप्त्यनन्तरं भगवत्प्राप्तिकथाया असम्भावितत्वाभिप्रायकम् ॥१५१॥

तथा चात्र पक्षद्वयेपि न कैवल्यपुरुषार्थस्या नित्यत्वव्यंजनकथा,- प्रत्युत तत्प्राप्त्यनन्तरं भगवत्प्राप्ते रसम्भावितत्वज्ञापनेन तस्य नित्यत्व मेवावगम्यत इति नास्या गाथायाः कैवल्यानित्यत्वसाधकता ॥ १५२ ॥

षट्सहस्रिकाभाष्ये दर्शितगाथोत्तरार्धं व्याख्यातम् - तत्रानन्तरउपभगवच्छेषतैकरसं तव स्वरूपं प्राप्य निश्चलस्थितिप्राप्तीच्छायां प्रथमं विषयसंगविसर्जनसमय एव स्वामी प्राप्यतया प्रपदनीयइति ॥ १५३ ॥

नवसहस्रिकाभाष्ये - चतुर्विंशतिसहस्रिकाभाष्ये च मन्नुरिलिलि पद मुपादाय व्याख्यातं - निरतिशयपुरुषार्थभूतभगवत्कैंकर्यंप्राप्य निश्चलं स्थातु मिच्छसि चेदिति ॥ १५४ ॥

षट्त्रिंशत्सहस्रिकाभाष्ये दर्शितपद मुपादाय व्याख्यातम् - स्वप्राप्तौ भूय स्ततोप्युपरितनः कश्चि दनुभवो ऽस्तीति स्थित्यनर्हं निश्चलस्थितियोग्यपुरुषार्थं प्राप्तु मिच्छसि चेदिति ॥ १५५ ॥

द्वादश सहस्रिकाभाष्येतु स्थिरं भगवद्विषययोगं प्राप्तुमिच्छसि चेदिति तत्पदं व्याख्यातं ॥ १५६ ॥

अत्र द्वादशसहस्रिकाभाष्यं दर्शितपदस्य नित्ययोगं प्रेप्ससिचेदित्यर्थकत्वाभिप्रायेण प्रवृत्तं, अन्यत्तु - निश्चलस्थितिं प्रेप्ससिचेदित्यर्थकत्वाभिप्रायेण प्रवृत्तमित्यवगम्यते ॥ १५७ ॥

अत्र न कुत्रापि कैवल्यपुरुषार्था नित्यत्वव्यंजको भगवदनुभव लक्षण परमपुरुषार्थ नित्यत्व निर्देशः कश्चिद्दृश्यते ॥ १५८ ॥

प्रत्युत तदर्थीभूय स्वामिनं भजेत्यंश व्याख्यानावसरे भाष्येषु कैवल्यप्राप्तेः प्राग्भगवदाश्रयणवेळायामेव भगवान् प्राप्यतयाप्रपदनी य इतिव्याख्यानेन कैवल्यंप्राप्त्यनन्तरं भगवत्प्राप्ते रसंभावितत्वाव गमनेन कैवल्यस्य नित्यत्वमेव सुष्ठुज्ञापितं भवति ॥ १५९ ॥

एवं – विषयसंगे निवृत्ते प्रकृतिविनिर्मुक्त आत्माभासमानोनि त्यत्वाज्ज्ञानानन्दलक्षणत्वाच्च स्वानुभव एव निर्मज्जये दुपासकमिति दर्शितगाथाभाष्योक्तितो मुक्तकण्ठ मप्यभिहितं भवति कैवल्यस्य नित्यत्वम् ॥ १६० ॥

अतो ऽत्र नकैवल्यपुरुषार्थस्यानित्यत्वव्यंजनावकाशः ॥ १६१ ॥

यत्तु – दर्शितगाथास्थपदविशेषस्य – नित्ययोगं प्रेप्ससि चेदिति प्रतिसंस्कारपक्ष माश्रित्य नित्यपुरुषार्थयोगो नित्ययोग इत्यभिमन्य मानाः पूर्वपक्षिण स्स्वाभिमतार्थसिद्धिं मन्यन्ते ॥ १६२ ॥

तत्तु – गीताशास्त्रे – " तेषां ज्ञानी नित्ययुक्त " इत्यादि ष्वनेकस्थलेषु प्रयुक्तं ज्ञानिविषयं नित्ययुक्त शब्दं नित्यभगवत्सम्बन्धकांक्षिपरतया व्याकुर्वाणै र्भाष्यकारै रेव दूरो त्सारितं – तदेककण्ठत्वा दस्य · नित्ययुक्तशब्दे नित्यशब्द स्येव – मन्तुरिक्तित्यत्रत्यस्य मन्त्रितिशब्दस्यापि नित्यपर्यायस्य स्वान्यव हितोत्तरक्रियाविशेषणताया एवावगमेन धात्वर्थे योग एव नित्यत्वभान सम्भवात् भगवदनुभववाचकपदान्तराभावेन तत्र नित्यत्वभानासम्भवाच्च स्वरछतश्शब्दतो ऽप्यलभ्यं चेति न किंचिदेतत् ॥ १६३ ॥

एवं चतुर्थकाण्डप्रथमश्रीमुखसूक्ते कैवल्यपुरुषार्थस्य नित्यत्व मेव स्फुट मवगम्यते ॥ १६४ ॥

तत्र अष्टभि र्गाथाभि रैहिकैश्वर्यस्या – ल्पत्वास्थिरत्वाभ्यां हेयत्वं प्रतिपाद्य नवमगाथायां महता तमसा समार्जितस्य स्वर्गाद्यामुष्मिकै श्वर्यस्याप्यतिचिरकाळानन्तर मपि वा विनाशित्वलक्षणवस्तुस्वभाववशा

स्पुनरावृत्तिलक्षणत्वस्यावर्जनीयतया हेयत्वं प्रतिपाद्य, दशमगाधाया मात्मप्राप्तिलक्षण संकोच मोक्षावलम्बिनः कैवल्यार्थिन ऐश्वर्यार्थितः प्राप्यवैलक्षण्ये प्यतिश्रमसाध्य आत्मप्राप्तिलक्षण स्सङ्कोचमोक्षोऽपि भगवन्तंमन्तरेण दुस्साधः - भगवत्प्राप्तिरेव च परममोक्षः - एवंस्थिते भगवदपेक्षया ऽत्यल्पभूते ऽतिश्रमसाध्ये कैवल्यपुरुषार्थे किमर्थं प्रवृत्तिः क्रियते,: तं विहाय भगवत्प्राप्तिलक्षण परममोक्ष एव प्रवृत्तिः क्रियता मित्य त्यल्पत्व श्रमसाध्यत्वादि दोषैरेव हेयत्व प्रतिपादनात्कैवल्यस्य स्थिरत्वमेवेति स्फुटमवगम्यते । स्थिरत्वाभावे सुदूरमपिगत्वा पुन रावृत्ति रवर्जनीयेतिदोषेणा मुष्मिकैश्वर्यस्येव कैवल्यपुरुषार्थस्यापि दूष णीयतया ऽल्पत्वादि दोषमात्रेण तद्दूषणायोगात । ऐश्वर्यवत्कैवल्यस्या-प्यस्थिरत्वे नवमगाधोक्तैश्वर्यदूषणेनैवैकोक्त्या; द्वयोरापि दूषणसम्भवेन दशमगाधारम्भ हेतु कैवल्यपुरुषार्थावलम्बनशंकाया एवानुदयेन कैव-ल्यदूषणार्थ दशमगाधाविर्भावस्यैवा नुपयोगित्वापत्तेश्च ॥ १६५ ॥

इयं हि तत्र दशमगाधारम्भिका शंका - अस्थिराचित्तत्व निबन्ध नैश्वर्य पुरुषार्थावलम्बने पुनरावृत्ते रपरिहार्यत्वेपि स्थिरभूतात्मप्राप्ति लक्षण कैवल्यपुरुषार्थावलम्बने कोदोष इति ॥ १६६ ॥

षट्सहस्रिकाभाष्ये कुरुकेशार्यैः - अस्थिरत्वादिदोषासम्भिन्नं कैवल्यं प्राप्यतया समाश्रीयत इति चेदित्याशंकयाऽवतार्य तादृशाशंका परिहारकतया हि दशमगाधा व्याख्याता ॥ १६७ ॥

एवं चतुर्विंशति सहस्रिकाभाष्येपि - ऐश्वर्यमस्थिरंचे त्स्थिरपुरुषार्थ भूतं कैवल्यं प्रतिपद्यामह इत्युक्तौ ॰ कैवल्यपुरुषार्थो दुस्साध इति सचा पुरुषार्थइतिच प्रतिपादयतीत्येवंरूपा दशमगाधावतारिकाकृता ॥ १६८ ॥

षट्त्रिंश त्सहस्रिकाभाष्येपि दर्शित दशमगाधावतारिका - भूम्या मैश्वर्यं स्वर्गानुभवश्चेत्ये तदास्थिरमित्यवो च दधस्तात् अनेवंभूत आत्म लाभः स्थिरपुरुषार्थः किलेतिचेत · पूर्वोक्ता किंचिद्गुणसद्भावेपि भग॰

वदानन्दापेक्षया ऽ स्यैकदेशरूपत्वा त्सोपि क्षुद्रः ततस्तमेव प्राप्तुं प्रय-
तध्वमित्याद्युक्त्येवंरूपा कृता ॥ १६९ ॥

एव मन्यत्राप्येवंभूतैव दशमगाथावतारिका द्रष्टव्या ॥ १७० ॥

एवं षष्ठकाण्ड नवमश्रीमुखसूक्त दशमगाथायां प्रकृतिवियुक्त स्व स्वरूपावस्थित प्रत्यगात्मतत्त्वानन्दस्य संकोचविकासविनाशादि लक्षण विकार शून्यत्वं प्रतिपादयन्त्यां तत्प्राप्तिलक्षण कैवल्यपुरुषार्थस्य नित्यत्व म्मुक्तकण्ठ मतिस्फुटमेवाभिहितम् ॥ १७१ ॥

अह्रस्वीभव न्नदीर्घीभव न्नविनाशयोग्य नन्ते काले प्यसंकोच्य विकास्य नन्त आनन्दः प्राप्तोपि, भूयः कदाप्यसम्भावितं मयि स्त-वैव दास्याधिकरण मल्पं काल मनुकुर्यां किं हन्त निरूपणे, इत्येव मर्थोहि सैषा गाथा ॥ १७२ ॥

अस्या श्राय मर्थः । अह्रस्वीभव न्नदीर्घीभवन् - संकोचविकास लक्षणविकारशीलताविधुरः । अत एव - अविनाशयोगी - विनाश विधुरः । स्थिर इति यावत् । नचेदं स्थिरत्व मतिचिरकालस्था-यित्वमात्ररूप मित्याहा नन्त इत्यादिना । अनन्ते कालेपि – अपरि च्छिन्ने कालेपि । असंकोची - अविकासी - न संकोचविकासशीलः । सर्वदैव संकोचविकासशीलतारहित इति यावत् । तथाच - पदा र्थान्तराणा मिवास्य कल्पमध्ये तदातदोत्पत्तिविनाशशीलत्व मपि नास्ति - कल्पाद्यवसानयो रपि तथात्वं नास्तीत्युक्तं भवति । तर्हि कदा पुन रस्य समाप्ति रित्यत्राहानन्त इति । अनन्तः - यथोक्तलक्षणत्वादेय कदाप्यनवसानः, नित्य इति यावत् । आनन्दः - प्रकृतिवियुक्तस्यस्वरूपावस्थित प्रत्यगात्मप्राप्तिलक्षणकैवल्यमोक्षानन्दः । प्राप्तोपि – समागतोपि । हे मायिन् - अनवधिकान्यानन्दैवि वैतृष्ण्य मुत्पाद्या त्यल्पकालस्वानुभवे प्यतिशयितचापलोत्पाद्यनव-धिकातिशयमहाश्चर्यशालिपरमशोभिन् । निरूपणे - सम्यक्परिशीलने

सति । भूयः कदाप्यसम्भावितं - इय मसम्भावितत्वोक्ति रेवं भूत त्वेपीत्यभ्युपगमवादः, पतत्पतंगप्रतिम इतिव दभुतोपमायां तात्पर्यम् । तत्रैव दास्याधिकरण मल्पकालं - क्षणकालावच्छिन्न त्वदन्यदास्यरससुख मपि । अनुकुर्या त्किं - उपमिनुया त्किम् । हन्तेत्यनेन - पर्वतपरमाण्वो रिवातिवेलवैषम्ययो रनयोः कैवल्यभगवत्प्राप्तिलक्षणपुरुषार्थयो रपि तारतम्यं वक्तव्यं किलासीदिति खेदातिशयो ऽभिप्रेत इति ॥ १७३ ॥

इद मत्र तात्पर्यं - ज्ञानानन्दलक्षणप्रत्यगात्मस्वरूपस्य स्वतस्संकोचविकासविनाशादिलक्षणविकारानर्हत्वा.त्तद्गतधर्मभूतज्ञानस्य तादृशविकारार्हत्वेपि विलक्षणप्रकृतिसंसर्गायत्तस्य तादृशविकारस्य निश्शेषप्रकृतिसम्बन्धविनिर्मोक्षदशायां कदाचि दप्यसम्भवाच्च निश्शेषप्रकृतिसम्बन्धनिवृत्त्यनन्तर माविर्भूतानवधिकातिशयविकासज्ञानानन्दमयप्रत्यगात्मस्वरूपप्राप्तिलक्षणकैवल्यस्या विनाशित्वलक्षणमोक्षरूपताया अवर्जनीयत्वेनैश्वर्या द्व्यावृत्तत्वेपि शेषभूतस्य शेषिपरिचर्याया एव स्वरूपानुरूपत्वा न्निरतिशयाश्चर्यहेयप्रत्यनीकानवधिकातिशयासंख्येयकल्याणगुणगणाकरपरमशेषि परिचर्यालक्षणपुरुषार्थ एव सर्वपुरुषार्थकाष्ठाभूत स्स्वरूपानुरूपः परममोक्ष इति स एवोपादेयो विवेकिनां, अतथाविधः कैवल्यपुरुषार्थ स्तु हेय एवेति ॥ १७४ ॥

अत्रापि गीताशास्त्रवदेव पूर्व मैश्वर्यलक्षणपुरुषार्थस्या नित्यत्वेन हेयत्वं ज्ञापयित्वा, ततः स्थिरत्वेन ततो विलक्षणत्वेन कैवल्यपुरुषार्थस्वरूपं ज्ञापयित्वा, तस्यापि हेत्वन्तरेण हेयत्व मभिधीयते ॥ १७५॥

अत्रा प्येतद्भाष्येषु कैवल्यपुरुषार्थस्य स्थिरत्व मेव सम्यग्दर्शितम् ॥ १७६ ॥

षट्सहस्रिकाभाष्ये दर्शितदशभगाधाव्याख्याने, वैषयिकसुख मल्पास्थिरत्वादिदोषदुष्टतया भवदपेक्षितं नचे त्प्राचुर्यस्थिरत्वा द्यनेक

गुणयुक्तस्य केवलात्मानुभवलक्षणसुखस्य परिग्रहः किं न सम्भवतीति चेदित्यादिना कैवल्यस्य नित्यत्व मेवाभिहितम् ॥ १७७ ॥

नवसहस्रिकाभाष्ये दर्शितगाधावतारिकायां - वैषयिकसुख मल्प मस्थिर मिति मन्यसे चेदनन्तस्य स्थिरस्य कैवल्यपुरुषार्थस्य परिग्रहे किमिति चेदित्यादिना तन्नित्यत्वं दर्शितम् ॥ १७८ ॥

चतुर्विंशतिसहस्रिकाभाष्येपि , वैषयिकसुख मल्प मस्थिरमिति वदसि चे त्ततो ऽधिकस्य स्थिरस्य कैवल्यस्य प्राप्तौ किमिति चे दित्यवतारिकया तन्नित्यत्वं वर्णितम् ॥ १७९ ॥

षट्त्रिंशत्सहस्रिकाभाष्येपि , ऐश्वर्यादी न्यल्पास्थिराणीत्यनपेक्षितानीति वदसि चेत् , तादृशो नस्त्वनन्त स्स्थिर श्च खल्वात्मानुभवः, तदनुभवे किमिति चे दित्यवतारिकया तन्नित्यत्वं कथितम् ॥ १८० ॥

एव मन्यत्रापि तदभिधानं द्रष्टव्यम् ॥ १८१ ॥

सर्वै रेतैः वैषयिकसुखस्या ल्पास्थिरत्वकीर्तनमेव न तद्धेयत्व हेतुतयोक्त मस्माभिः , येन तद्रहितं कैवल्य मादरणीय मापद्येत, अपितु तादृशस्यापि तत्स्वरूपस्य कीर्तनं कृतं , उभयो रविशेषेण हेयत्वे प्रधानहेतुस्तु शेषत्वस्वरूपानुगुण भगवत्प्राप्तिलक्षणपरमपुरुषार्थ व्यतिरिक्तत्व मेवेति श्रीपरांकुशदिव्यसूर्याशयस्य प्रस्फुट मुपपादनात्कैवल्यस्थिरत्व मसन्दिग्ध मभिहितम् ॥ १८२ ॥

एवं सप्तमकाण्डपंचमश्रीमुखसूक्तदशमगाधायां - वार्तां विदन्तो मायिन मन्तरेणा न्यस्य शेषा भवेयुः किं विरोधि जन्मव्याधिजरामरणान्युन्मूल्य , महादुःखं संमूलं निवर्त्य स्वचरणाधो निवेश्य तेन क्रियमाणं क्षेम मनुसन्धाय विवेकं प्राप्येत्येव मर्थिकाया म्महादुःखशब्देन कैवल्यनिर्देशेन कैवल्यस्य यावदात्मभाव्यपुरुषार्थत्वलक्षणं नित्यदुःखत्वमेव विवक्षितं , अन्यथैश्वर्यस्य तथात्व मनभिधायैतस्य परं तथात्वाभिधाने कारणाभावात् ॥ १८३ ॥

तदेत त्तद्भाष्ये ष्वप्युक्तम् ॥ १८४ ॥

यथोक्तं षट्सहस्रिकाभाष्ये – कैवल्यरूपमहानर्थे प्यप्रवेशं स्वच रणद्वन्द्वाधो निवेश्येति ॥ १८५ ॥

उक्तञ्च चतुर्विंशतिसहस्रिकाभाष्ये - महादुःखं समूलं निवर्त्य– आत्मानुभवरूप महादुःखं सवासनं निवर्त्य, प्रकृतिप्राकृताना मस्थैर्य मिति कश्चिद्गुणोऽस्ति अपुरुषार्था स्स्थिरादधिकं नविद्यते खलुमहा दुःखमिति ॥ १८६ ॥

भाषितंच षट्त्रिंशत्सहस्रिका भाष्येपि - महादुःखं समूलं नि- वर्त्य-जन्मनिवृत्तावनन्तर मागन्तुकं कैवल्यं नाममहादुखं सवासनं निवर्त्य, पूर्वस्थितिरेव समीचीनेति मननापादिका खल्वेतस्यक्षुद्र ता, तत्र भूयएकशरीरपरिग्रहं कृत्वापि भगवत्समाश्रयणं कर्तुं यो ग्यतास्तिहि, अयं नित्यविनाशः खल्विति ॥ १८७ ॥

अत्र सर्वत्र कैवल्यस्या नित्यताशंकागन्धस्यापि नावकाश लेशइति स्फुटम् ॥ १८८ ॥

एवं स्वप्रबन्ध प्रथम श्रीसूक्ते प्रथम द्वितीय गाथाभ्यां स्वयं भगवतोमंगळाशासनं कृत्वा तावता पर्याप्तयनुदयेन “ चतुर्विधाभज- न्तेमा ” मिति श्लोकोक्ता नैश्वर्यकैवल्यभगवत्प्राप्तयर्थिनस्त्रिविधान प्यधिकारिणो भगवन्मंगळाशासनाय स्वगोष्ठयां संयोजयितुमभिसन्धाय तत्र प्रत्यासन्नतया भगवत्प्राप्तिकामान् प्रथमं तृतीयगाथाया माहूय तावतापि पर्याप्तयनुदये नैश्वर्यकैवल्यकामा नप्याह्वयितुं प्रवृत्य चतुर्थगाथायां कैवल्यकामान् ततः पञ्चमगाथाया मैश्वर्यार्थिन श्चाह्व यतो भट्टनाथदिव्यसूरे रैश्वर्यकामेभ्यः कैवल्यकामानां प्रथममाह्वा नबीजं प्रदर्शयद्भिः श्रीमत्कृष्णपादसूरिभिरपि चतुर्थगाथावतारिकाभा ष्ये ऽयमंश स्सुस्पष्टं विस्तरेणभाषितः ॥ १८९ ॥

यथोक्तं तत्र- ईश्वरकरनिरीक्षिणइत्येतावता ऽऽत्मप्राप्ति कामा नैश्वर्यकामां आहूवयितु मुखस्य तत्र प्रथममात्मप्राप्तिकामानाहूवयति । ऐश्वर्यादात्मप्राप्तिरुत्कृष्टेतिबुद्धया नाह्वयति, तादृशमोक्षस्यानेनानर्थः तयानुसन्धानात् ; तर्हि कुतः प्रथममाहूवानमितिचेत् , भगवत्स्व स्वन्धोपकरणभूतशरीरमोक्षस्य सन्निहितत्वा त्तादृशमोक्षप्राप्तौ पुन रावृत्त्यभावा दैश्वर्यकामस्य काळान्तरेपि वा भगवत्तत्स्तन्धकरणयो ग्यतासद्भावात् अस्य कैवल्यकामस्य तादृशयोग्यता विळयाच्च दुर्गतिन्दृष्ट्वा प्रथममाह्वयतीति ॥ १९० ॥

एवमन्यत्रापि दिव्यसूरिप्रबन्धतद्भाष्येषु तत्र तत्रायमर्थः प्रति पादितोद्रष्टव्यः ॥ १९१ ॥

तथाच प्रमाणेषु क्वापि पश्चाद्भगवत्प्राप्त्यभिधानानुपलम्भा त्प्रत्यु त महादुःखत्वनित्यत्वाभिधानेन पश्चात्तद्योग्यताराहित्यस्यैवोपलम्भा द्यथो क्तरीत्या पूर्वाचार्यैः पश्चात्तद्योग्यताराहित्यस्य सुस्पष्टमेवाभिधानाच्च द्राविडब्रह्मसंहिता प्रथमकाण्ड द्वितीयश्रीमुखसूक्त पंचमगाथाभाष्येषु कैवल्यं परिहृत्य भगवत्प्राप्तीच्छायां कैवल्यप्राप्तेः प्राग्विषयसंगनिवृ त्तिकाळएव कैवल्यसंगंनिवर्त्य प्राप्यतया भगवदुपासनविधानपरत या व्याख्यानं कैवल्यप्राप्तेः पश्चाद्भगवत्प्राप्तियोग्यताविळयाभिप्रायक तया कैवल्यस्य नित्यत्वमेवावगमयतीति सिद्धम् ॥ १९२ ॥

एतेन दर्शितगाथाभाष्येषु विषयसंगनिवृत्तिकाळएव कैवल्य संगमपि निवर्त्य तदाद्येव भगवतः प्राप्यतयो पासनविधानपरतया व्याख्यानस्य मध्ये विळम्बपरिहारमात्राभिप्रायकतया समर्थनोद्देशेन गीताभाष्य तात्पर्यचन्द्रिकायां सप्तमाध्याय षोडशश्लोकभाष्यव्याख्या ने केवलात्मन्यपर्यवस्यन्निति नमरं प्रविविक्षोरध्वगस्यछा यातरुमूल स्वापवदात्मानुभवविळम्बइतिभाव इत्यनेन, अष्टमाध्याय त्रयोविंश चतुर्विंश श्लोकं भाष्यव्याख्याने कैवल्यं भगवन्तंच मन्त्रोर्यसाध

विष्यतीत्यादिष्वपि कैवल्यशब्देनात्मानुभवसुखं तदपेक्षिभिः प्राप्य मुच्यते एतच्चान्तराय कोटिनिविष्टत्वादादितः सावधानं ज्ञानिनः परिहरन्तीत्यनेनच, कैवल्यार्थिनां कैवल्यप्राप्त्यनन्तरं विळम्बेनभगवत्प्राप्तिकल्पनं तादृशविळम्बासहिष्णुतयैव ज्ञानिनामादितएव तत्परिहारित्वाभिधानंच पूर्वपक्षिणां निरस्तम् ; तादृशविळम्बेन तेषां पश्चाद्भगवत्प्राप्तौ प्रमाणलेशानुपलम्भात्प्रत्युत कैवल्यपुरुषार्थस्यान्तकाळावध्यभावप्रतिपादनमुखेन नित्यताप्रतिपादनस्यैव प्रागुदाहृतप्रमाणेषु व्यक्तत्वा दतीन्द्रियार्थे केवळतर्कस्या किंचित्करत्वात् कैवल्यस्य पश्चाद्भगवत्प्राप्तियोग्यताविळयहेतुतया महानर्थरूपत्वेनैवात्यन्त परिहरणीयत्वाभिधानात् पश्चाद्भगवत्प्राप्तिस्वरूपयोग्यतासत्त्वे महानर्थत्वाभिधानपूर्वक मत्यन्तपरिहरणीयत्वाभिधाना सांगत्यात् , मधुविद्यानिष्ठस्येदृशात्यन्तपरिहरणीयतायाः क्वाप्यभिधानादर्शनात् , माळाकारादीनामैश्वर्यविशेषप्राप्तिपूर्वकं स्वप्राप्ते र्भगवतैव दीयमानत्वदर्शनेन विळम्बमात्रेणात्यन्तपरिहरणीयत्वाभिधाना सांगत्यस्य दुर्वारत्वाच्च ॥ १९३ ॥

किंच अण्डाधिपत्य लक्षणैश्वर्यस्य कल्पावसानपर्यन्तस्थायितया ऽण्डान्तः पातिळोकानुभाव्यतया भवदभ्युपेतस्य कैवल्यस्य ततोपि विळम्बहेतुत्वायोगेन तादृशैश्वर्यस्यापि महानर्थरूपत्वेना त्यंत परिहरणीयत्वमनभिधाय कैवल्यस्य परं तदभिधानं तस्यानित्य पुरुषार्थरूपत्वं विना कथमिवसंगतं भवेत ॥ १९४ ॥

एतेन प्रागुदाहृत रहस्यत्रयसारग्रन्थे द्राविडब्रह्मसंहिता षष्ठ काण्ड नवमश्रीमुखसूक्त दशमगाथायां कैवल्यस्य नाशराहित्योक्ते श्चातुर्मास्यादि कर्मफलविशेषाक्षय्यत्वोक्तिवद्दतिचिरकालस्थायित्वाभिप्रायकत्ववर्णनमपि परास्तं, दर्शित गाथायां कैवल्यस्य प्रथमं संकोच विकासादि विकारशीलतावैधुर्येण विनाशासम्भवं प्रतिपाद्य ततः कल्पावसानादिलक्षण सुचिरकाळानन्तरं कदाचिद्विनाशस्स्यादिति

शंकापरिहारकतया ऽ नन्तेपिकाळे संकोचविकासादि विकारासम्भव प्रतिपादनपूर्वकं केनापि प्रकारेणान्यथासिद्धिगन्धानर्हं पुनः कदाप्यव- सानराहित्येन नित्यत्व प्रतिपादनदर्शनेन तस्याः कैवल्यस्याति चिर काळस्थायित्वमात्राभिप्रायकतायाः कथं चिदपि दुर्वचत्वात् । वेदान्तेषु कर्मसाध्यफळानां कृत्स्नानां नश्वरत्वस्य सहस्रधोद्‌घुष्यमाणतया त द्विरोधेन चातुर्मास्यादिकर्मणा मक्षय्यफळत्वासम्भवेन कर्मान्तरेभ्यस्तेषां श्रैष्ठय प्रतिपादनमात्रपरतया निश्चितायाः स्तैरफळाक्षयत्वोक्ते र्देवामरत्व व्यपदेशव दापेक्षिकचिरकालस्थायित्वपरत्वावश्यकत्वेपि जिज्ञासो र्ब्रह्म विदातुल्यतया ऽ नेकेषु प्रतिपन्नायाः अनावृत्तिश्रुते रपवादकाभावेन दर्शिताभिप्रायकत्वकल्पनायोगात् ; तथा सति ब्रह्मविदना वृत्तिश्रुते रपि तथात्व प्रसंगाच्च ॥ १९५ ॥

वेदान्तेषु कर्मसाध्यफळानित्यताप्रतिपादकप्रमाणानां बाहुळ्या त्तन्नित्यतास्वीकारस्य वस्तुस्वभावविरुद्धत्वाच्च हि कर्मफळाक्षय्यत्व श्रुते श्चिरकालस्थायित्व मात्रपरतास्थापिता ॥ १९६ ॥

इहतु कैवल्यफळानावृत्ते स्तथानयने किञ्चिदपि व्यवस्थापकं प्रमाणं नोपलभामहे ॥ १९७ ॥

कर्मसाध्यफळस्य प्रकृतितत्त्वनिबन्धनविलक्षणभोगरूपस्य क्षरण शीळप्रकृतितत्त्वस्वभावा देवा नित्यत्वव त्कैवल्यस्या नश्वर प्रकृतिवियुक्त प्रत्यगात्मस्वरूपनिबन्धनविलक्षणानुभवरूपस्य नित्यत्व लक्षणतत्तत्त्वस्व भावादेव नित्यत्वमपि हि दुर्वारम् ॥ १९८ ॥

अपवादकत्वेन भवदभिमतं मोक्षधर्मवचनशकलमपि परश्शता न्यथासिद्धिपराहतं न भवदभिमत मर्थं साधयितुं प्रभवतीति च प्रागेव विस्तरेण प्रतिपादितम् ॥ १९९ ॥

किञ्च - द्वयो रधिकारिणो रपुनरावृत्तिं तुल्यतया प्रतिपाद- यन्तीं बहुळोपबृंहणोपबृंहितां स्फुटार्थां श्रुतिं प्रागुक्तपरश्शतान्यथा

सिद्धिपराढतं स्वरसत एव सम्भवदविरुद्धार्थं स्मृतिरूपं च दर्शित मोक्षधर्मवचनशकलं कथ मिव बाधेत । अन्यथा विरोधाधिकरण विरोधप्रसंगात् ॥ २०० ॥

उक्तं च ज्योतिरधिकरणतृतीयसूत्रटीकायां - स्मृतय श्च श्रुत्यनुरोधेन वर्णनीयाः – अशक्यवर्णना श्चेदनादरणीया इति ॥ २०१ ॥

वर्णितं च दर्शितमोक्षधर्मवचनस्य श्रुत्याद्यविरुद्धस्वारसिकार्थ परत्वम् ॥ २०२ ॥

कैवल्यनिष्ठस्या पुनरावृत्ति श्चान्यथासिद्धयनर्हा गीताशास्त्रे भगवतैव न्यायसंचारपूर्वकं स्फुटं निर्णीता ॥ २०३ ॥

गीताशास्त्रे ह्यष्टमाध्याये – ऐश्वर्यार्थिनः पुनरावृत्ति स्तत्प्राप्यभूत ब्रह्माण्डोदरवर्तिसत्यलोकपर्यन्तलोकानां परमपुरुषसंकल्पकृतोत्पत्ति विनाशकालव्यवस्थतया कथंचिदपि दुर्वारैवेति षोडशाद्येकोनविंशान्तश्लोके निरूप्य, विंशैकविंशश्लोकाभ्यां कैवल्यनिष्ठस्य तत्प्राप्यभूत प्रकृतिवियुक्तप्रत्यगात्मतत्त्वस्य महाप्रळये प्यविनाशित्वेन नित्यतया न पुनरावृत्ति रिति प्राप्यवस्तुविनाशाविनाशाभ्यां पुनरावृत्त्यपुनरावृत्तिसम्भवो दुरपह्नवः प्रतिपाद्यते ॥ २०४ ॥

अत्र प्राप्यवस्तुविनाशाविनाशयोः पुनरावृत्त्यपुनरावृत्तिहेतुत्वोपपादनलक्षणन्यायसंचारपूर्वकं कैवल्यनिष्ठस्याभिधीयमाना ह्यपुनरावृत्ति र्नान्यथासिद्धिगन्धार्हा ॥ २०५ ॥

भाष्यकारैश्च गीताभाष्ये दर्शितमूलाभिहितन्याय मेव स्फुटतरं प्रतिपादयद्भि रय मेवार्थो ऽन्यथासिद्धिवर्णनै रविचाल्य स्सुप्रतिष्ठापितः ॥ २०६ ॥

तथाहि । अष्टमाध्याये – मा मुपेत्य पुन र्जन्मेति पंचदशश्लोका वतारिकायां –" अतःपर मध्यायशेषेण ज्ञानिनः कैवल्यार्थिन श्चापुनरावृत्ति मैश्वर्यार्थिनः पुनरावृत्तिं चाह" इत्युक्तम् ॥ २०७ ॥

अत्र ज्ञानिकैवल्यार्थिनो रेकजातीयैवा पुनरावृत्ति रेकेनैव शब्दे नाभिधीयमाना नचिरकालस्थायित्वलक्षणा मन्यथासिद्धि मर्हति ॥२०८॥

आब्रह्मभुवनाल्लोका इति श्लोकं -" ऐश्वर्यगतिं प्राप्तानां भगवन्तं प्राप्तानां च पुनरावृत्ता वपुनरावृत्तौ च हेतु मनन्तर माह" त्यवतार्य, "ब्रह्मलोकपर्यन्ता ब्रह्माण्डोदरवर्तिन स्सर्वे लोका भोगैश्वर्यालयाः पुन रावर्तिनः - विनाशिनः - अत ऐश्वर्यगतिं प्राप्तानां प्राप्यस्थानविनाशा द्विनाशित्व मवर्जनीयं - मां सर्वज्ञं सत्यसंकल्पं निखिलजगदुत्पत्ति स्थितिलयलीलं परमकारुणिकं सदैकरूपं प्राप्तानां विनाशप्रसंगाभावा त्तेषां पुन र्जन्म नविद्यत " इति हि भाष्यकारा व्याचख्युः ॥ २०९ ॥

अत्र प्राप्यवस्तु विनाशाविनाशयो रेवान्वयव्यतिरेकाभ्यां पुन रावृत्त्यपुनरावृत्तिहेतुता स्पष्ट मुपदर्शिता ॥ २१० ॥

अत्र सदैकरूपमिति भगवतो नित्यत्वं भगवत्प्राप्तिकामाना मपु- नरावृत्ति हेतुतया दर्शितं, परमकारुणिकमित्यनेन निरंकुशस्वतन्त्रेण भगवता स्वेच्छया चेतनदुःख हेत्वावर्तना सम्भवः, निखिलेत्यादि विशेषणेन भगवदन्येनावर्तना सम्भवश्च दर्शितः । सर्वज्ञत्व सत्यसंक- ल्पत्व विशेषणाभ्या मीश्वरस्य निरतिशयसर्वविधानन्दोत्पादन सामर्थ्यं संकल्पान्यथाकरणाभावज्ञापनमुखेन स्वापेक्षितानन्द विशेष करवस्त्वन्तर लाभकांक्षया चेतनस्य स्वेच्छया स्वातन्त्र्येण भगव दिच्छया च पुनरावृत्त्यसम्भवश्च दर्शितइति बोध्यम् ॥ २११ ॥

एवं सप्तदशादिश्लोकत्रयं "ब्रह्मलोकपर्यन्तानां तदन्तर्वर्तिनां च परमपुरुष संकल्पकृता मुत्पत्तिविनाशकाल व्यवस्था माह" त्यवतार्य व्याख्याय, "एवम्मद्व्यतिरिक्तस्य कृत्स्नस्य काळव्यवस्थयामत्त उत्पत्तेर्मयि प्रळयाच्चोत्पत्तिविनाशयोगित्व मवर्जनीय मित्यैश्वर्यगतिं प्राप्तानां पुनरा- वृत्ति रपरिहार्या मामुपेतानांतु नपुनरावृत्तिप्रसंग" इत्युपसंहृतं ॥२१२॥

अत्रापि पूर्वोक्तलक्षण हेतु हेतुमद्भाव एव दर्शितः ॥२१३॥

अनन्तरं विंशैक विंशश्लोकौ "अथ कैवल्यं प्राप्तानामपि पुनरावृत्ति र्नविद्यत इत्याह" त्यवतार्य, तद्व्याख्याने "सनातनः- उत्पत्तिविनाशानर्हतयानित्यः, यस्सर्वेषु वियदादिभूतेषु सकारणेषु सकार्येषु नश्यत्सुतत्र तत्रास्थितोपि नविनश्यतिसो ऽ व्यक्तोऽ क्षर इत्युक्त" इति कैवल्यार्थि प्राप्यशुद्ध प्रत्यगात्मस्वरूपस्य नित्यत्वं प्रळयकाला विनाशित्वंचाभिधाय, तदेवहेतु मभिसन्धाया पुनरावृत्तित्व म्मूलेऽभिहित मित्यभिप्रायेण तद्धाम परमम्ममेत्यंश व्याख्यानावसरे "अचि त्संसर्गवियुक्तं स्वरूपेणावस्थित म्मुक्तस्वरूपं परमं नियमनस्थान मित्यर्थः, तच्चा पुनरावृत्तिरूप" मिति तदेवोपपादितम् ॥ २१४ ॥

एव मुपपादयतां भाष्यकृतांचाय माशयः – देवतिर्यङ्मनुष्यस्थावरात्मना ऽ वस्थितस्य प्रत्यगात्मनो जननमरणयोगित्व लक्षणोत्पत्ति विनाशदर्शनेन कथं तस्याविनाशित्वं कथं वा तस्या पुनरावृत्तित्व मित्युक्ते – सर्वमिदं प्रकृतिसम्बन्धनिबन्धनं प्रकृतिसंसृष्टस्य विशिष्टात्मस्वरूपस्यैव नतु तद्वियुक्तस्य स्वरूपेणावस्थितस्य तस्य, तच्चा पुनरावृत्त्येवेति न दर्शिताशंकावकाश इति ॥ २१५ ॥

एवं कैवल्यार्थि प्राप्यभुत प्रकृतिवियुक्त प्रत्यगात्मस्वरूप प्रदर्शनस्थलेष्व पुनरावृत्तिशब्दं प्रयुंजाने र्भाष्यकारैः कैवल्यार्थिनो ऽ पुनरावृत्तिरेव प्रदर्श्यते ॥ २१६ ॥

यथोक्त मष्टमाध्याय द्वादश त्रयोदशश्लोकभाष्ये-"सयाति परमां गतिं - प्रकृतिवियुक्त म्मात्समानाकार मपुनरावृत्ति मात्मानं प्राप्नोतीत्यर्थः" इति ॥ २१७ ॥

एवं शारीरकभाष्यादिष्वपि कार्याधिकरणे श्रूयमाणा पुनरावृत्तिकस्य पञ्चाग्निविदः प्रकृतिमिश्रात्मोपासने पुनरावृत्तिप्रसंगं अत एव हेतो स्तद्वियुक्तात्मोपासकत्वंच प्रतिपादयद्भि र्भाष्यकारै रुत्पत्तिविनाशयोगि प्रकृतितत्त्वस्य पंचाग्निवित्प्राप्यकोटि प्रवेशपरिहारेण दर्शित गीता

शास्त्रोक्तरीत्या प्राप्यविनाशाविनाशयोरेव पुनरावृत्त्य पुनरावृत्ति हेतुत्वं दर्शितम् ॥ २१८ ॥

किं बहुना, द्वादशाध्याये कैवल्यप्राप्यपरतृतीयादि श्लोकत्रय भाष्ये " य एव मक्षरमुपासते तेपि मां प्राप्नुवन्त्येव मत्समानाकार मसंसारिणमात्मानं प्राप्नुवन्त्येवेत्यर्थः, ममसाधर्म्यमागताइति हि वक्ष्यते, श्रूयते च निरंजनः परमं साम्य मुपैतीति, तथा ऽ क्षर शब्दनिर्दिष्टा त्कूटस्थादन्यत्वं परस्य ब्रह्मणोवक्ष्यत" इति भाषमाणै र्भाष्यकारैः कैव॰ ल्यार्थिनो ऽ पुनरावृत्त्यादिक मस्फुटमेवभाषितं भवतीतिनास्मिन्विषये भाष्यकाराशय विज्ञानाय तद्ग्रन्थान्तरं गवेषणीयम् ॥ २१९ ॥

अत्र स्वप्राप्यप्राप्त कैवल्यार्थिविषये मम साधर्म्यमागता इति चतुर्दशाध्याय द्वितीयश्लोकस्य निरञ्जनः परमं साम्य मुपैतीति श्रुतेश्च प्रमाणतया प्रदर्शनेन परेण ब्रह्मणा परमसाम्यापन्नं प्रत्यगात्म स्वरूप मेव कैवल्यार्थिनः प्राप्यं पुनरावृत्तिगन्धासहमिति सुष्ठु निरूपितं भवति; तादृशसाम्यस्य मोक्षदशामात्रसिद्धताया स्सर्वशास्त्रैरवगमात् २२०

"इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः । सर्गेपिनोपजायन्ते प्रळये नव्यथंतिच" त्येवं रूपे चतुर्दशाध्याय द्वितीयश्लोके चेदृश साम्यापन्नस्य मुक्तकण्ठमेव पुनरावृत्त्यभावो ऽ विचाल्यो ऽ भिधीयते ॥२२१॥

दर्शित श्लोकश्रुत्यादिकं शारीरकभाष्यादिषु मुक्तैश्वर्यविषयतयै॰ वा नेकस्थलेषूदाहृतम् ॥ २२२ ॥

मुक्तैश्वर्यविषये शारीरकशास्त्रचतुर्थाध्यायचतुर्थपादे – अविभा॰ गेन दृष्टत्वात् ॥ ४ ॥ ४ ॥ ४॥ इत्यधिकरणसूत्रभाष्ये परज्योति रुपस म्पन्नसर्वबन्धविनिर्मुक्तप्रत्यगात्मस्वरूपविषयतया दर्शितश्लोकश्रुत्यादिक मुदाहृतं भाष्यकारैः ॥ २२३ ॥

एव मन्यत्रा प्युक्तविषयतयो क्तश्लोक श्रुत्याद्युदाहरणं द्रष्टव्यम् ॥ २२४ ॥

किंच – आत्मानुभवलक्षणकैवल्यपुरुषार्थ स्सनकसनन्दनाद्या वासभूतलोकानुभाव्य इति हि भवन्मतम् ॥ २२५ ॥

यथोक्तं भवद्भि स्स्तोत्ररत्नचतुर्थश्लोकभाष्ये – योगिना ममृतं स्थानं स्वात्मसन्तोषकारिणा मित्यनेन स्वात्मानुभवपराणां स्थान मप्युक्तं – सनकादियोगिना ममृतं स्थानं स्वात्मसन्तोषकारिणामपि स्थानं भवतीत्यर्थ इति ॥ २२६ ॥

सनकसनन्दनाद्यावासभूतो लोकश्च जनलोकः, "द्वे कोट्यौतु जनो लोको यत्र ते ब्रह्मण स्सुताः । सनन्दनाद्याः कथिता मैत्रेया मलतेजस " इति श्रीविष्णुपुराणद्वितीयांशसप्तमाध्यायवचनात् ॥२२७॥

तदुपरि च तपोलोकसत्यलोकौ द्वौ वर्तेते ॥ २२८ ॥

इत्थं च आब्रह्मभुवना ल्लोकाः पुनरावर्तिनोर्जुनेत्यादिना भगवता सत्यलोकशब्दित ब्रह्मलोकपर्यन्तानां तदन्तर्वर्तिनां च पुनरावृत्तिप्रतिपादनप्रकरणे सत्यलोका धराधरजनलोकानुभाव्यपुरुषार्थस्य चिरकालस्थायित्वाभिप्रायकापुनरावृत्तिव्यपदेशः कथमिव संघटेत ॥२२९॥

यस्मा ल्लोका दूर्ध्वो र्ध्वलोकानुभाव्यपुरुषार्थः पुनरावृत्तिलक्षण स्स्वेनैव यस्मिन् प्रकरणे ऽभिधीयते ॥ २३० ॥ तल्लोकानुभाव्यपुरुषार्थ मपुनरावृत्तिलक्षणं तस्मिन्नेव प्रकरणे नह्यनुन्मत्तः कश्चि द्ब्रूयात् ॥२३१॥

ब्रह्मलोकान्तलोकानुभाव्य पुरुषार्थान्तराणां तत्प्राप्यस्थाननाशेन विनाशवत्तादृशलोकान्तःपातिजनलोकानुभाव्य पुरुषार्थस्यापि प्राप्य स्थानविनाशतो विनाशावश्यंभावेन तदनुभाविनां पुनरावृत्ति र्दुर्वर्जनीया ॥ २३२ ॥

किंच - पुनरावृत्तिलक्षणतया ऽभिहितपुरुषार्था दतिशयितदीर्घ कालावस्थायित्वाभिप्रायेणैव हि कैवल्यस्या पुनरावृत्तिलक्षणत्व मुक्त मिति भवद्भि र्वक्तव्यं, अन्यथा विलक्षणनिर्देशायोगात् ॥ २३३ ॥

एवं च सत्यलोकान्तब्रह्माण्डोदरवर्तिकृत्स्नलोकानुभाव्य सर्वपुरुषार्थानां पुनरावृत्तिलक्षणत्वाभिधानपूर्वक मपुनरावृत्तिलक्षणतया ऽभिधीयमान मिद मात्मप्राप्तिलक्षणं कैवल्यं ब्रह्माण्डोदरानुभाव्यकृत्स्नपुरुषार्थो द्ब्रह्माण्डविनाशकालनियतविनाशा दतिशयितचिरकालस्थायि ब्रह्माण्डबहिर्भूतलोकानुभाव्य पुरुषार्थरूपं सन्मोक्षरूपमेव पर्यवस्यति; कैवल्यापुनरावृत्त्युक्ते रतिचिरकालावस्थायित्वाभिप्रायकल्पक भवदुक्त्यनुरोधेनापि - कैवल्यार्थिप्राप्यस्थानपरतया भवदुदाहृतेन तादृशस्थानस्याविनाशित्वरूपामृतत्वप्रतिपादनमुखेन ब्रह्माण्डबहिर्भूतत्वमेव ज्ञापयता · योगिना ममृतं स्थान मित्यादिश्रीविष्णुपुराणवचनेनापि चेति तस्य जनलोकानुभाव्यत्वकथन मनित्यत्वकथनं च स्ववचनभंगीप्रतिकूलं पूर्वोत्तरग्रन्थसन्दर्भा पर्यालोचनमूलं च स्फुट मवगम्यमानं विदग्धविबुधजनपरिहास्य मेव ॥ २३४ ॥

एवं भाष्यकारै रष्टमाध्यायषोडशश्लोकभाष्ये - "ब्रह्मलोकपर्यन्ता ब्रह्माण्डोदरवर्तिन स्सर्वे लोका भोगैश्वर्यालयाः पुनरावर्तिनः विनाशिनः - अत ऐश्वर्यगतिं प्राप्तानां प्राप्यस्थानविनाशा द्विनाशित्व मवर्जनीय" मिति ब्रह्माण्डोदरवर्तिकृत्स्नलोकानां भोगैश्वर्यानुभवस्थानत्वं तदनुभाव्यपुरुषार्थस्य पुनरावृत्तिलक्षणत्वं च प्रतिपादयद्भि रात्मप्राप्तिलक्षणकैवल्यपुरुषार्थस्य भवदभिमतरीत्या जनलोकानुभाव्यभोगैश्वर्यरूपत्वे कथ मपुनरावृत्तिलक्षणत्व मुच्येत ॥ २३५ ॥

अनित्यत्वेनाभिप्रेते स्फुटस्फुरद्विरोधायाः कैवल्यपुरुषार्थविषयिण्या मुक्ते रनेकस्थलस्थितायाः कथं वा विरोधो भाष्यकारै र्न परिहियेत ॥ २३६ ॥

सप्तमाध्यायषोडशश्लोकभाष्ये भेदेन निर्दिष्टयो रार्तार्थार्थिनोः तयो र्मुखभेदमात्रं - ऐश्वर्यविषयतयैक एवाधिकार इत्येकजातीयाधिकारित्वमत्र हि तै रुक्तं, निमित्तैक्यात् ॥ २३७ ॥

प्राक्चतुर्थवाक्योदाहृतस्तोत्ररत्न चतुर्थश्लोकभाष्यग्रन्थेन - भोग इह स्वर्गस्वाराज्यादिसुखानुभव स्स्वात्मानन्दानुभव श्चेत्युभयरूपेण कैवल्यस्य भोगैश्वर्य एव ह्यन्तर्भावो भवद्भिः कृतः ॥ २३८ ॥

भवदभिमतरीत्या कैवल्यस्य भोगैश्वर्यान्तर्भूततायां भाष्यकारा भिमतत्वे चार्तार्थार्थिनो रिव कैवल्यार्थिनोपि भोगैश्वर्यार्थिलक्षणैक विधाधिकारिकोटावेव निवेशो भाष्यकारैः क्रियेत ॥ २३९ ॥

नच तथा निवेशः कृतः ॥ २४० ॥

तस्मा दार्तार्थार्थिनो भोगैश्वर्यार्थित्वलक्षणैकजातीयाधिकारिता मभिधाय जिज्ञासुशब्दितस्य कैवल्यार्थिन स्तत्रान्तर्भाव मनभिधाय पृथगधिकारिता मेवाभिदधतां भाष्यकृतां कैवल्यंनानित्यपुरुषार्थभूत भोगैश्वर्यान्तर्भूत मपितु नित्यपुरुषार्थभूतापवर्गैश्वर्ये एवान्तर्भूत मित्ये वाभिमेतमिति स्पष्ट मवगम्यते ॥ २४१ ॥

स्पष्टीभविष्यतिचेद मुपरिष्टा त्तृतीयविप्रतिपत्तिविचारे ॥ २४२ ॥

एव मष्टमाध्याये दशमश्लोके "भ्रुवोर्मध्ये प्राणमावेश्ये"त्यैश्वर्यार्थिनः प्रयाणकाले भ्रूमध्ये प्राणस्थापनस्य, द्वादशश्लोके "मूध्न्याधायात्मनः प्राण" मिति कैवल्यार्थिनो मूर्ध्निप्राणस्थापनस्य चाभिधानात् प्रयाणकाले तथा प्राणस्थापनस्य तत्तत्प्रदेशस्थनाडीतो निष्क्रमणार्थत्वाच्च मूर्धन्य नाड्या निष्क्रमण मपुनरावृत्तिलक्षण मोक्षपुरुषार्थहेतुः, तदन्य नाड्या निष्क्रमणं पुनरावृत्तिलक्षण पुरुषार्थान्तर हेतुरित्युपनिष त्प्रसिद्धरीते रेवोच्यमानत्वादपि कैवल्यार्थिन श्शताधिक मूर्धन्यनाड्या निष्क्रान्तस्य प्राप्यभूतं कैवल्यं नित्यपुरुषार्थभूता ऽपुनरावृत्तिलक्षण मोक्षरूपमेवेत्यभि हितं भवति ॥ २४३ ॥

श्रूयते हि छान्दोग्याष्टमप्रपाठके षष्ठखण्डे षष्ठखण्डिकायां " शतंचै काच हृदयस्यनाड्यस्तासा म्मूर्धानमभिनिस्सृतैका । तयोर्ध्वमायन्नमृतत्व मेति विष्वङ्ङन्या उत्क्रमणे भवन्ती " ति ॥ २४४ ॥

स्मर्यतेचायमर्थः –"ऊर्ध्वमेक स्थित स्तेषांयोभित्वा सूर्यमण्डलम् । ब्रह्मलोकमतिक्रम्य तेनयातिपरांगति" मिति याज्ञवल्क्यस्मृति तृतीयाध्याय सप्तषष्ट्यधिकशततमश्लोके ॥ २४५ ॥

अत्र श्रुतिस्मृत्योरमृतत्व परगतिशब्द प्रतिपन्नमोक्षं प्रत्येव हेतुताया मूर्धन्यनाडीनिष्क्रमणस्य प्रतीत्या तादृशनाडीनिष्क्रान्तेन कैवल्यार्थिना प्राप्य ाणस्य कैवल्यपुरुषार्थस्य नित्यपुरुषार्थभूत मोक्षरूताहि स्पष्टा ॥ २४६ ॥

नच – मूर्धन्यनाडीनिष्क्रान्तस्यापि कैवल्यनिष्ठस्य मध्ये कैवल्य लक्षण नश्वरपुरुषार्थान्तरसत्त्वेपि नक्षतिः, अन्ततो ब्रह्मप्राप्तिलक्षण मोक्ष फला भ्युपगमेनतदर्थतया नाडीविशेष निष्क्रमणसार्थक्यसम्भवात्, अतोमध्ये सम्भावितस्य कैवल्यस्या नित्यत्वाभ्युपगमे नेदं बाधकमिति वाच्यं; दर्शित श्रुतिस्मृतिभ्यां मूर्धन्य नाडीनिष्क्रान्तस्य मध्ये फलान्तरानुभवविळम्ब मन्तरेणैव मोक्षफलावाप्तेः प्रतिपाद्यमानतया दर्शित कल्पनाया अत्रावकाशासम्भवात् । दर्शितकल्पनायाः प्रमाणलेश स्पर्शाभावस्य प्रागेवाभिहितत्वात् । मोक्षेतरपुरुषार्थार्थितादशायामपि मूर्धन्य नाडीनिष्क्रमणार्चिरादिगत्यादि स्वीकारे मधुविद्यानिष्ठानां ब्रह्म लोकस्थैश्वर्य मनुभूय ब्रह्मणासह मोक्षकांक्षिणामपि च स्वप्राप्यावांचीनफलप्राप्त्यर्थं गमनारम्भदशायामेव तत्स्वीकारप्रसंगा त्तत्रप्रमाणलेशाभावा त्प्रत्युतप्रमाणविरोधाच्च ॥ २४७ ॥

तदिदं व्यक्ती भविष्यत्युपरिष्टात् ॥ २४८ ॥

इदमत्रावधेयं, कैवल्यपुरुषार्थस्या नित्यत्वं सर्वथैवासम्भावितं- तदनित्यत्वस्य तद्विच्छेदरूपत्वात् । कैवल्यार्थिनाम पुनरावृत्ते र्गीताशास्त्रादिषु बहुधोद्घुष्यमाणत्वात । तत्तत्पुरुषार्थार्थिनां पुनरावृत्यपुनरावृत्ति व्यपदेशस्य तत्तत्पुरुषार्थविच्छेद तदभावपरत्वात् । कैवल्यार्थिनां तत्प्राप्त्यनन्तरं तद्विच्छेदस्य दुर्वचत्वाच्च ॥ १ ॥

तत्तत्पुरुषार्थविच्छेदश्च तत्तत्पुरुषार्थहेतुप्राप्यवस्तुनश्वरत्वस्वभावप्रयुक्तो वा तदनुभवस्थानाविनाशप्रयुक्तो वा वाच्यः ॥ २ ॥ तत्र प्राप्यवस्तु नश्वरत्वस्वभावप्रयुक्त एवाव तस्य विच्छेदो न सम्भवति, कैवल्य पुरुषार्थस्य प्रकृतिवियुक्तप्रत्यगात्मस्वरूपानुभवलक्षणतया तादृशात्म स्वरूपस्य कदापि नाशासम्भवात ; प्रकृतिविशिष्टप्रत्यगात्मस्वरूपस्य प्राप्यत्व एव क्षरणशीलप्रकृतिरूपविशेषणनाशप्रयुक्त विशिष्टप्राप्यानु भवलक्षणपुरुषार्थविनाशप्रसंगावकाशसम्भवा च्च ॥ ३ ॥ अत एवोक्तं श्रीविष्णुपुराणे प्रथमांशे द्वाविंशाध्याये – " तत्रान्यज्ञानरोधेन योगिनो यान्ति ये लयम् । संसारकर्षणोप्तौ ते यान्ति निर्बीजतां द्विजे"ति ॥ ४ ॥ कैवल्यार्थ्यपुनरावृत्तिविषयस्या स्य श्लोकस्याय मर्थः । ये योगिनः - आत्म योगिनः । तत्र – पूर्वोक्तलक्षणे प्रत्यगात्मस्वरूपे । अन्यज्ञान रोधेन - पदार्थान्तरस्मृतिनिरोधेन - तदेकविषयान्तिमस्मृत्येति यावत् । लयं - उपाधिवियोगेन स्वस्वरूपेणा वस्थानम् । यान्ति – स्थूलसूक्ष्मा चित्संसर्गलक्षणसकलोपाधिविनिर्मुक्ताविर्भूत स्वस्वरूपा भवन्तीति यावत् । हे द्विज । ते – प्रकृतिविनिर्मुक्तप्रत्यगात्मस्वरूपावाप्तिलक्षण कैवल्याख्यपुरुषार्थं प्राप्तवन्त आत्मयोगिनः । संसारकर्षणोप्तौ – कृष्यत इति कर्षणं क्षेत्रं, संसारकर्षणे – प्राकृतविषयभोगहेतुसंसार रूपक्षेत्रे, उप्तौ – सस्यावापे । निर्बीजतां - तत्प्रयोजकवासनारेणु लक्षणबीजरहिततां । यान्ति - वितुषव्रीहीणा मंकुरणहेतुतुषांशाभावेन सस्यारम्भहेतुताविलयव त्सकलोपाधिविनिर्मोक्षदशापन्नप्रत्यगात्मनामपि पुनश्शरीरारम्भहेतुभूत वासनारेणुलक्षणसूक्ष्मतम प्रकृतिसंसर्गस्यापि निश्शेषनिवृत्त्या पुनस्संसारारम्भहेतुताविलीयतएवेतियावत् । तथाचै तेषां पुनरावृत्तिस्वरूपयोग्यतागन्धस्य नविद्यतइति ॥ ५ ॥ इमंश्लोकं- "आत्मयोगिनामन्तिमप्रत्ययेनावश्यंभाव्यं, अन्यथा पुनरावृत्ते " रित्यमतार्थ व्याकुर्वद्भि श्श्रीविष्णुचित्तार्यैरपि "कृष्यतइति कर्षणं केदा रः, संसारकेदारे, उप्तौ - सस्यावापे, वितुषव्रीहिवदबीजतां यान्ती" ति

वद्भिरयमर्थः स्पष्टं ज्ञापितः ॥ ६ ॥ तथाच - कैवल्यं प्रमानांसंसारमण्डले पुनरावृत्तिप्रसंगस्यैव नावकाशइत्यवगम्यते कैवल्यपुरुषार्थस्वरूपपरामर्शे॥ ७ ॥ प्राप्यस्थानविनाशेनापि नैतेषां पुनरावृत्तिस्तुवचा, पंकमध्यएव पंकलेपनिश्शेषनिवृत्तिरिव प्रकृतिमण्डलएव निश्शेषप्रकृतिसंसर्गनिवृत्ते रप्यसम्भावितत्वेन निश्शेषप्रकृतिसंसर्गवियुक्त प्रत्यगात्मस्वरूपलक्षणकैवल्यपुरुषार्थस्य प्रकृतिमण्डले दुष्प्रापतया तत्प्राप्तिस्थानस्य प्रकृतिमण्डलबहिर्भूत नित्यविभूत्येकदेशरूपतया एव वक्तव्यतया तथाभूतस्या नित्यत्वप्रसंगाभावेन नित्यत्वात । योगिनामभृतंनित्यादि वचनेनापि तथात्वस्यैव ज्ञापनात । अन्यथा ब्रह्मनिष्ठानामपि निश्शेषाविद्यानिवृत्ते र्देशविशेषस्यापेक्षतया विलयप्रसंगाच्च ॥ ८ ॥ व्यक्तीभविष्यति चैतत्तत्त्वमुपरिष्टा द्यथावसरम् ॥ ९ ॥ तस्मा त्कैवल्यपुरुषार्थस्या नित्यत्वं सर्वथैवासम्भवदुक्तिकमिति ॥ २४९ ॥

तथाच - कैवल्यार्थिनां गीता तद्भाष्यादि ष्वसकृदनावृत्तिं प्रतिपादनमेव प्रमाणान्तरनिरपेक्षं कैवल्यपुरुषार्थस्य नित्यत्वं दुरपह्नवं साधयतीति प्रमाणान्तरोपन्यास प्रयासो प्यनुपादेय एवेति सिद्धम् ॥ २५० ॥

अत्र पूर्वपक्षिणो वदन्ति - द्वौतावत्कैवल्यनिष्ठौ । तत्र ब्रह्मात्मकस्वात्मानुसन्धान लक्षणोपासननिष्ठः पञ्चाग्निविच्छन्दित एकः, तस्यापि मध्ये कतिपयकालानुभाव्यतया कैवल्यपुरुषार्थाभ्युपगमात । आत्ममात्रोपासकोन्यः । तत्र प्रथमस्य मध्ये चिरकालं कस्मिंश्चिल्लोकविशेषे कैवल्यपुरुषार्थानुभवा त्पश्चाद्ब्रह्मप्राप्तिस्वीकारा द्वितीयस्य तु पुनरावृत्तेरेव स्वीकाराच्च द्वयोरप्यधिकारिणोः किंचित्कालानुभवगोचरस्य पश्चान्निवर्तमानस्य च कैवल्यपुरुषार्थस्यानित्यत्वं सर्वथैव दुरपह्नवम् । तत्र पंचाग्निविच्छन्दितस्य प्रथमस्यैव गीतासप्तमाध्याय षोडशश्लोके - आर्तो जिज्ञासु रर्थार्थी त्यत्र जिज्ञासुशब्देन निर्देशः । तत्रैवच गीता तद्भाष्ययो मूर्धन्य नाडीनिष्क्रमणा पु-

नरावृत्त्यर्चिरादिगतीना मभिधानम्, नतु द्वितीयस्य। प्रथमस्याप्य पुनरावृत्त्यभिधानं पुनरवरोहाभावमात्रा भिप्रायकम्। नच तावता कैवल्यपुरुषार्थस्य नित्यत्वसिद्धिः, तन्निवृत्तिपूर्वकमेव तस्य ब्रह्म प्राप्तेः पश्चादभ्युपगमादिति ॥ २५१ ॥

तदिदमुक्तं सै गीताष्टमाध्याये त्रयोविंशचतुर्विंशश्लोकभाष्य तात्पर्यचन्द्रिकायां - "अयं पंचाग्निविद्यानिष्ठो न केवलात्मोपासकः - अपितु ब्रह्मात्मक स्वात्मानुसन्धायीतिभाव" इति, "पंचाग्निविदोऽपि ब्रह्म प्राप्तिरस्त्येवेति स्वीकर्तव्यम्। तत्र प्राप्तौ ज्ञानिनां परमात्मा स्ववि-शिष्टो भोग्यः। अक्षरयाथात्म्यनिष्ठानान्तु स्वस्वरूपमेव पूर्वं भोग्यम्। वस्वादिपदप्राप्तिपूर्वक मधुविद्यान्याया दन्ततो ब्रह्मप्राप्ति"रिति, "नचात्र जिज्ञासो रन्यस्वात्म याथात्म्यविदिति भाष्यते - जिज्ञासुवेद्यतयो रुः स्वभावविप्रर्षयो रत्र च पंचाग्निविद्योदाहरणात्। मध्येच कैवल्यार्थिनएव मूर्धन्यनाड्यानिष्क्रमण मनावृत्ति श्चोक्ते"ति, "अतएव सप्तमे प्रकान्तो जिज्ञासुः परमात्मप्राप्तिकाम ज्ञानिव्यतिरिक्तत्वा द्ब्रह्मात्मक स्वात्मानुसन्धायीति नभ्रमितव्य"मिति, "अर्चिरादिगतिनिषेध स्तु ब्रह्मात्मकस्वात्मानुसन्धानरहित स्वात्मोपासनविषय" इति, "यत्तु नरुच्यते - येतु शिष्टा स्त्रयो भक्ताः फलकामाहि तेमताः। सर्वे च्यवनधर्माण इति - तत्राप्यात्ममात्रानुभव सुखस्या स्थिरत्वादेव च्यवनधर्मत्व मुच्यते - नच तावता पुनस्संसारप्रसंग" इति, "एवमव्यक्तादितत्त्वचिन्तकानामिव प्रत्यगात्मतत्त्वचिन्तकानामपि तदुचितदेश कालं ततो तिशयितं फलमुपपद्यते, अतएव हि भूमविद्यायां प्रत्यगात्ममात्रोपासकस्या ष्यतिवादित्व मुक्तम्। ब्रह्मात्मकस्वात्मानुसन्धानेतु ब्रह्मप्राप्तौ विश्रमादपुनरावृत्ति रिति विशेषः। अतएवाक्षरानुभवस्यां तवत्त्वे तदर्थिनः कथं कैवल्यार्थिव दपवर्गाधिकार्यन्तरत्वमित्यपि निरस्तम् - बाह्यान्तरभोक्तव्यविभागा दावृत्त्यनावृत्ति योग्यताभेदाच्च तद्भेदोपपत्ते"रिति च ग्रन्थेन ;- विंशैकविंशश्लोकभाष्यतात्पर्य

चन्द्रिकायां - "वक्तव्याच कैवल्यार्थिनामवरोहाभावा दपुनरावृत्तिः । अत एव तत्परमेवेदं श्लोकद्वय"मिति , "नकेवलं भगवत्प्राप्तिरेवा पुनरावृत्तिरूपा - किन्तु परिशुद्धजीवप्राप्तिर प्यवरोहणाभावात्तथेति भाव'' इति- च;- ग्रन्थेनच ॥ २५२ ॥

तदेतत्सर्वं पूर्वपक्षिणां भाष्याद्याकरग्रन्थविरुद्धं स्वोक्तिनामेव परस्परविरुद्धं प्रमाणलेशविधुरं केवल स्वोत्प्रेक्षाविजृम्भित विपरीत तर्कमूल मसमंजसंचे त्यनादरणीयमेव प्रामाणिकैः॥ २५३ ॥

द्विविधकैवल्यनिष्ठकल्पनं तावदमूलकमेव, प्राचीनभाष्याद्याकर ग्रन्थेषु प्रमाणेषु चैकविधस्यैव कैवल्यनिष्ठ स्योपलम्भेन द्विविधयोः कैवल्यनिष्ठयोः क्वाप्यनुपलम्भात । द्वयोः प्रामाणिकत्वे गीताभाष्ये भाष्यकारै रसकृ त्कैवल्यनिष्ठस्वरूप तत्फलोपासनादिस्वरूपं वर्णयद्भिः - एकस्य स्वरूपादिक मीदृशम् - अन्यस्यान्यादृशमिति विवेकस्या वश्यप्रदर्शनीयस्याकथने सामान्यत एकस्यैव कथनेच्च कारणाभावात् । श्रीभाष्यघटकस्य कस्यचिद्वाक्यविशेषस्या न्यादृशकैवल्यनिष्ठविषयकत्वाभिमानस्या दर्सायस्य यथावस्थितभाष्यार्थापरिज्ञान निबन्धनत्वाच्च ॥ २५४ ॥

तदिदं व्यक्तीभविष्य त्युपरिष्टादितीह तत्प्रपंचनादुपरम्यैतदभ्युपगमानुरोधेप्यदर्साय वाक्यार्थासामंजस्यं ताव न्निरूप्यते ॥ २५ ॥

गीता तद्भाष्ययोः कैवल्यनिष्ठस्या पुनरावृत्तिवर्णनं पुनरवरोहाभावमात्रविषयतया न कैवल्यनित्यत्वसाधकमिति कथनं त्वयुक्तं, तत्रत्या पुनरावृत्तिशब्दस्य तदधिकारि प्राप्तपुरुषार्थस्य पश्चाद्विनाशापरपर्याय तन्निवृत्त्यभावमात्र बोधकत्वेना वरोहाभावपरत्वाभावात् ॥ २५६ ॥

अत एव - आब्रह्म भुवनाल्लोकाः पुनरावृत्तिनोर्जुने त्यष्टमाध्याय षोडशश्लोकभाष्ये - "ब्रह्मलोकपर्यन्ता ब्रह्माण्डोदरवर्तिनस्सर्वे लोका भोगैश्वर्यालयाः , पुनरावर्तिनः - विनाशिनः । अत ऐश्वर्यगतिं प्रा

प्तानां प्राप्यस्थानविनाशा द्विनाशित्वमवर्जनीय " मिति व्याकुर्वद्भि र्भाष्य कारैः पुनरावृत्ति र्विनाशरूपैव व्याख्याता ॥ २५७ ॥

इत्थ मैश्वर्यार्थिनां प्राप्यपुरुषार्थस्य पुनरावृत्तिशब्देन विनाशं प्रतिपाद्य तत्प्रतिकोटितया कैवल्यार्थिनां पुरुषार्थस्य ततो वैलक्षण्य प्रतिपादनार्थं मेकविंशादिश्लोक तद्भाष्यप्रयुक्तस्या पुनरावृत्तिशब्दस्या विनाशित्वपरत्वा हि दुर्वारा ॥ २५८ ॥

किञ्च – ऐश्वर्यार्थि पुरुषार्थस्यैव प्राप्यवस्तु विनाशप्रयुक्त वि- नाशावर्जनीयतायाः कैवल्यार्थि पुरुषार्थस्यापि प्रसक्तायाः परिहारार्थं विंशश्लोके – यस्ससर्वेषु भूतेषु नश्यत्सुनविनश्यतीति तत्प्राप्यात्मवस्तुनो विनाशाभाव प्रतिपादनपूर्वकं तत्पुरुषार्थस्या विनाशित्वप्रदर्शनायकृत एकविंशश्लोके – यं प्राप्यनानिवर्तन्ते तद्धाम परमम्ममेत्य पुनरावृत्ति निर्देशः – कैवल्यपुरुषार्थस्य प्राप्यवस्तु विनाशप्रयुक्त विनाशितायां नावकाश इत्येतत्पर इत्यत्रत्या पुनरावृत्तिपरशब्दाना मविनाशित्वपरता- हि दुरपह्नवा ॥२५९॥

एवं – कैवल्यपुरुषार्थस्य ब्रह्माण्डोदरवर्तिजन लोकानुभाव्यतया भवद्भिस्स्वीकारेण तदनुभव कल्पकालात्प्रागेव कदाचि न्महाप्रळय प्रसक्तौ ब्रह्माण्डस्यैव विनाशेनैश्वर्यपुरुषार्थनिष्ठानामिव पंचाग्निविद्रूप कैवल्यपुरुषार्थनिष्ठानामपि स्वप्राप्यपुरुषार्थस्थानभूतजन लोकविनाशाय त्पुरुषार्थनाश प्रत्यवरोहरूप पुनरावृत्त्यो र्दुर्वारतया तदीयापुनरावृत्तेः प्रत्यवरोहाभाव रूपतया समर्थनमपि न निर्वहत्येव ॥ २६० ॥

एवम पुनरावृत्ते रवरोहाभावमात्ररूपतां वर्णयित्वा कैवल्यानुभव स्थाना त्परमव्योमाधिरोहिणां पंचाग्निविदां कैवल्यानुभव निवृत्त्या कै- वल्यस्थानित्यतानिरूपण मप्य साधु , प्रकृतिवियुक्तात्मानुभवरूप कैव- ल्यपुरुषार्थस्याधो ऽवरोहे प्रकृत्यावरणविशेषवशा त्कथंचि न्निवृत्तेस्स- म्भवदुक्तिकत्वे प्यूर्ध्वाधिरोहे प्रकृत्यावरणप्रसंगस्यै वाभावेन – अधि-

क्षंविति न्यायेन भगवदनुभवस्याधिकस्य सम्भवेपि प्राक्प्राप्तस्य प्रकृतिवियुक्तप्रत्यगात्मानुभव लक्षण कैवल्यपुरुषार्थस्य विच्छेद कथा प्रसंगस्यैवाभावात् ॥ २६१ ॥

एवं प्रागुदाहृत श्रीविष्णुपुराण द्वाविंशाध्यायवचनेन कैवल्यस्य विपयप्रावण्य हेतु पुनर्लेषक्लेश प्रसंगासहिष्णु निश्शेष प्रकृतिसंसर्ग विकलरूपतया स्पष्टमेवावगमेन प्रकृतिवियुक्त प्रत्यगात्मस्वरूपानुभवलक्षण कैवल्यपुरुषार्थस्य सकृत्प्राप्तौ पुनर्विच्छेदस्यैव न प्रसंगावकाशः – प्रकृत्या प्रत्यगात्मतिरोधान प्रसंगस्यैवाभावात् ॥ २६२ ॥

अत एव भाष्यकारैरपि – गीता द्वादशाध्यायस्थ कैवल्यार्थि प्राप्यभूत प्रकृतिवियुक्त परिशुद्ध प्रत्यगात्मस्वरूपपर तृतीयादिश्लोकभाष्ये – "अपरिणामित्वेन स्वासाधारणाकारान्नचलति न च्यवत इत्यचलं तत एव ध्रुवं नित्य" मित्यनेन – यादृशावस्थापन्न प्रकृतिवियुक्त परिशुद्ध प्रत्यगात्मस्वरूपस्य प्राप्तस्य पुनस्स्वासाधारणाकारा च्यवनं विना नित्यैकरूपत्वं – तादृशप्रत्यगात्मस्वरूपस्यैव कैवल्यार्थिना प्राप्यत्ववर्णनं, " य एष मक्षरमुपासते तेपि मां प्राप्नुवन्त्येव – मत्समानाकार मसंसारिणमात्मानं प्राप्नुवन्त्येवेत्यर्थः। मम साधर्म्यमागता इति हि वक्ष्यते। श्रुतिरपि च – 'निरंजनः परमं साम्य मुपैती' ती"त्यनेन – तेषां यथोपासनमेव – प्रकृतिसम्बन्ध गन्धराहित्यलक्षण निरंजनत्वेन परेण ब्रह्मणापरमसाम्यापन्न पुनस्संसारगन्धा सहिष्णुदशापन्न संसार्यात्मस्वरूप प्राप्तिवर्णनं च संगच्छते ॥ २६३ ॥

अत्र – " इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः । सर्गेपि नोपजायन्ते प्रळये न व्यथन्ति चे " ति चतुर्दशाध्याय द्वितीयश्लोकोदाहरणेन निरंजनः परमं साम्यमुपैतीति श्रुत्युदाहरणेन च कैवल्यनिष्ठानां स्वोपासनानुगुण स्वप्राप्यभूत प्रकृतिवियुक्त परिशुद्ध प्रत्यगात्मस्वरूप प्राप्तिः पुनस्संसारसम्बन्ध गन्धासहिष्णु निश्शेषप्रकृतिसम्बन्ध विकल लक्षण मुक्तिरूपनित्य पुरुषार्थएवेति स्पष्टमुपदर्शितं भाष्यकारैः ॥२६४॥

तदित्थमेव • " यं प्राप्य न निवर्तन्ते तद्धाम परमं मम " इत्यष्टमाध्यायश्लोकेन • " तन्मम परमंधाम परमं नियमनस्थानं " अचेतनप्रकृतिरेकं नियमनस्थानम् • तत्संसृष्टरूपा जीवप्रकृतिर्द्वितीयं नियमन स्थानम् • 'अचित्संसर्गवियुक्तं स्वरूपेणावस्थितं मुक्तस्वरूपं परमं नियमनस्थानमित्यर्थः, तच्चा पुनरावृत्तिरूप " मित्येवं रूपेण तद्भाष्येण च दर्शितमित्येषोऽन्यथा पुनरावृत्तिप्रतिपादनस्यावरोहाभावमात्र विषयतावर्णनेन कैवल्यपुरुषार्थस्यानित्यतावर्णनं पूर्वपक्षिणां पूर्वोत्तरग्रन्थ परामर्शाभावमूलमेव • तत्परामर्शे पूर्वोक्तरीत्या तन्नित्यताया एव सिद्धेः ।। २६५ ॥

इत्थं कैवल्यपुरुषार्थस्वरूप शोधकप्रमाणै स्तत्स्वरूपस्य पुनस्संसारसम्बन्धगन्धानर्ह मुक्तिलक्षण नित्यपुरुषार्थरूपताया एव सिद्धया स्वैरं द्विविधानां कैवल्यनिष्ठानां कल्पनं तेषां बाह्यान्तरभोक्तृव्यविभागकल्पनम् • तत्र केषांचित्पुनरावृत्तेरेव कल्पनम् • अन्येषा मूर्ध्वाभिरोह मङ्गीकृत्या धोऽवरोहाभावमात्रेणा पुनरावृत्ति समर्थनम् • अन्तत उभयेषामपि कैवल्यपुरुषार्थस्या नित्यतावर्णनं चे त्येवमादिकं सर्वं पूर्वपक्षिणां स्वोत्प्रेक्षामात्रविजृम्भित विपरीततर्कमूलमेवेति सिद्धम् ॥ २६६ ॥

किंच • सर्वे च्यवनधर्माण इति मोक्षधर्मवचनप्रकरणस्य • चतुर्विधा भजन्ते मामित्यादि गीतासप्तमाध्याय वचनप्रकरणस्य चै ककण्ठतायाः सप्तमाध्यायसप्तदशश्लोक भाष्यतात्पर्यचन्द्रिकायां पूर्वपक्षिभिरेवाभिहिततया सर्वे च्यवनधर्माणइत्यत्र ज्ञानीतराधिकारित्र यविषय सर्वशब्दस्य पंचाग्निविद्रूपकैवल्यनिष्ठ संग्राहकत्वेपि तदित रकैवल्यनिष्ठासंग्राहकत्वेन तस्य पुनरावृत्तिमत्व मनित्यत्वंच पूर्वपक्ष्यभिमानानुरोधेपि सुतरामेव न केनापि प्रमाणेन सिद्ध्यति, दर्शित–मोक्षधर्मवचनस्य तद्विषयकत्वाभावात् • तद्ग्राहकप्रमाणान्तरस्य कस्यचित्ते ष्वनुदाहरणाच्च ॥ २६७ ॥

एवं केषांचित्कैवल्यनिष्ठाना मूर्ध्वाधिरोहेणान्येषा मधोवरोहेणच तदीयपुरुषार्थानित्यत्ववर्णनं प्रमाणविरुद्धम प्युपलभ्यते स्पष्टम् ॥ २६८ ॥

भगवच्छास्त्रे बृहद्ब्रह्मसंहितायां प्रथमपादे द्वितीयाध्याये - " सं- प्राप्याचार्य चरण मुपाय मवगम्य च । महाश्चाकारिणो भूत्वाह्याजीवं प्राकृतान्तनुम् । द्विधा मुक्तायेभवन्ति द्विविधास्ते प्रकीर्तिताः । केवलास्सेवकाश्चेति केवलास्तनुवर्जिताः । सेवकाद्विविधाज्ञेयाः किं- कराऽरूपसेवकाः । कैंकर्यं गन्धमाल्यादि मार्जनालेपवर्तनम् । पक्ष्म- पाताद्यह प्रेमवीक्षणं रूपसेवनम् । एवम्मुक्ता महादेवि मम लोके विशन्ति हि । " इत्यादिना केवल सेवकभेदेन मुक्तद्वैविध्यं तत्र केव- लानामशरीरत्वं सेवकानां सेवमौपयिक शरीरयोगं द्विविधानामपि नित्य विभूतिप्रवेश सद्भावंचाभिधाय; ततः किंचिदुपरिष्टात् - "मामेवशरणंयाता स्सर्वभावेनसिन्धुजे । अतीतादुस्तराम्मायां केवला स्सेवकाद्विधा । बहवोमत्पदंयाता स्सेवका स्सेवकामम । गमना गमनैर्मुक्ताः केव- लास्तुभवन्ति ही " ति केवलानां सेवकानांच द्विविधानामपि मुक्तानां भगवन्तमेव शरणमुपगम्य भगवत्सम्बन्धिनित्य विभूत्याख्य महालोक प्रवेशनिबन्धन दुस्तरमायातीतत्वं परमविशेषेणाभिधाय, तत्र सेवका- ख्यानां परं भगवदनुभवा साधारणस्थानरूप परमपदं प्राप्य भगव त्सेवकभावेनावस्थानमभिधाय, केवलाख्यानांतु तदधस्ता त्संसारमण्ड- लोपरिष्टाच्च मध्य एवोर्ध्वंस्थित परमपदाधिरोहलक्षण गमनाधस्स्थित संसार मण्डलावरोह लक्षणागमन विनिर्मुक्ततयैवावस्थानं च हि स्पष्टमभिधीयते ॥ २६९ ॥

तदिदं सर्व मभिसन्धायैवोक्तं लोकगुरुभिरपि स्पष्टमर्थ पंचक रहस्ये - "केवलोनामे" त्यारभ्य तत्स्वरूप प्रपंचनपूर्वकं - "योगफलभूता- त्मानुभवमात्रमेव पुरुषार्थतयानुभूय पश्चा त्संसारसम्बन्ध भगवत्प्राप्ति स्वरूपयोग्यताविलयं प्राप्य यावदात्मभाव्यशरीरचारी कश्चि"दिति॥२७०॥

तस्मां त्प्रत्युत प्रमाणविरोधादपि कैवल्यनिष्ठाना मूर्ध्वाधिरोहा थो ऽवरोहकल्पनासम्भवेन कैवल्यपुरुषार्थस्य नित्यताया दुरपह्नवंसिद्ध्या तदनित्यत्ववर्णनं सर्वथैवासम्बद्धम् ॥ २७१ ॥

अतो गीतादौ कैवल्यार्थिना मपुनरावृत्तिवर्णनं नावरोहा भाव मात्राभिप्रायकं- अपितु पूर्वोक्तरीत्या कैवल्यपुरुषार्थ नित्यत्वाभिप्रा- यकमेवेति सिद्धम् ॥ २७२ ॥

तदनुभवेस्थानमपि संसारमण्डलादूर्ध्वं परमव्योमैकदेशरूपं नित्य मेवेति व्यक्तीभविष्यत्युपरिष्टात् ॥ २७३ ॥

यत्तु- वेदान्ताचार्यकुमारै र्वरदाचार्यैः रहस्यत्रय सारसंग्रह चर- माधिकारे- कैवल्यार्थिनः पूर्वकर्मावशेषा त्पुनर्विषयानुभवस्वीकारेण च्यवनधर्मत्वोपपादनं पश्चाद्भाग्यपरिपाकविशेषवशेन भगवदुपासनेतदधी नार्चिरादिगति भगवत्प्राप्तिस्वीकारेणा पुनरावृत्त्युपपादनंचकृतम् ॥२७४॥

तदत्यन्तहेयं- तथासति संसारिमात्रस्या पुनरावृत्तित्व कथन सम्भवे नैश्वर्यार्थिनां पुनरावृत्तेः कैवल्यार्थिना मपुनरावृत्तेश्च विभज्य कथने कारणाभावात् ॥ २७५ ॥

तत्फलोद्देश्यक तदुपासन निष्ठस्या पुनरावृत्तिकथनं तदुपासन साध्य तत्फल सिद्ध्य व्यवहितोत्तर काल विषयमेवाहि वाच्यं ॥२७६॥

इत्थं च कैवल्यप्राप्ति पश्चात्तन ब्रह्मोपासन साध्य ब्रह्मप्राप्ति लक्षण फलानन्तर मपुनरावृत्ति सम्भवे तस्याः ब्रह्मोपासन फलभूतायाः कैवल्यार्थ्युपासन फल रूपत्वाभावेन कैवल्यार्थिनो ब्रह्मोपासकेभ्यः पार्थक्येना पुनरावृत्तिकथनं निरर्थकमेव ॥ २७७ ॥

गीताष्टमाध्याय त्रयोविंश चतुर्विंशश्लोकद्वयभाष्येच- पृथक्पृथ ग्गत्यपुनरावृत्ति श्रुतिवैयार्थ्यापत्ति हेतुनैव- तद्य इत्थं विदुरित्यादिश्रुते र्भिन्नभिन्नाधिकारिविषयत्वं भाष्यकारै स्समर्पितम् ॥ २७८ ॥

अतः कैवल्यार्थिविषये पृथग्गत्यपुनरावृत्त्यभिधानं कैवल्यार्थिनां तदर्थोपासननिष्पत्त्यनन्तर तदर्चिरगति तत्साध्यकैवल्य प्राप्त्यव्यव- हितोत्तरकाला पुनरावृत्तिविषयकत्वमन्तरेण न कथंचिद प्युपपद्यत इति न किंचिदेतत् ॥ २७९ ॥

कैवल्यनिष्ठस्यैव पंचाग्निविद्रूपतया वक्ष्यमाणत्वा त्तस्यचार्चिरादि गत्या निष्प्रत्यूह एवभवतः स्वप्राप्यपुरुषार्थ प्राप्त्यपुनरावृत्ती ब्रह्म निष्ठवदेवेति च व्यक्तीभविष्यत्युपरिष्टात् ॥ २८० ॥

यद्यपि क्रममुक्त्यधिकारिविषये कथंचिद् पुनरावृत्तिव्यपदेशः क्वचित्सम्भवति ॥ २८१ ॥

तथापि कैवल्यार्थिविषया पुनरावृत्तिव्यपदेशो न क्रममुक्त्यभिप्रायको वक्तुं शक्यः- द्वयोरधिकारिणो र्विभज्यनिर्दिष्टयो स्तुल्यतया पृथग पुनरावृत्तिव्यपदेशस्य तुल्यकालविषयस्यैव वक्तव्यत्वेन तद्विरोधात्- सूत्रकारैरपि तद्य इत्थं विदुर्येचेमे ऽरण्ये श्रद्धातपइत्युपासत इत्याद्य पुनरावृत्तिश्रुते रव्यवधानेन ब्रह्मप्राप्तिं प्रतिपादयन्त्याः क्रममुक्तिपरत्वासम्भव मभिप्रेत्यैवबादरिपक्षस्य- तत्रापि तुल्यतया द्विविधाधिकारिणा मव्यवधानेन ब्रह्मप्राप्तिमपुनरावृत्तिं च प्रतिपादयन्त्या स्तस्या एकविधाधिकारिणां क्रममुक्तिपरतायाः - अन्यविधाधिकारिणा मव्यवहित मुक्तिपरतायाश्चसुतरामेवा सम्भवमभिप्रेत्यैव जैमिनिपक्षस्य च निरासदर्शनाच्च ॥ २८२ ॥

एवं कैवल्यपुरुषार्थस्या नित्यत्वकथनं सकलप्रमाण पूर्वाचार्य श्रीसूक्तीनां विरुद्धमित्युपपादितमेव खलु प्राक् ॥ २८३ ॥

स्वोक्तिविरुद्धमप्युपलभ्यत इत्यतोपीदमनित्यत्व वचन मत्यन्त हेयम् ॥ २८४ ॥

इदमत्रावधेयं, पूर्वपक्षिभिर्हि रहस्यत्रयसार स्तोत्रभाष्यतात्पर्यचन्द्रिकादिषु कैवल्यपुरुषार्थस्यानित्यत्वं वर्णितं, न्यायसिद्धांजन जीवपरिच्छेदान्तेतु- "अनपायि योगसाध्यमैश्वर्य" मिति वरदविष्णुमिश्रवाक्य मुदाहरद्भिरेभिरेव तस्य नित्यत्वं निरूपितं, एवं - तात्पर्यचन्द्रिकायां- गीतायां सप्तमाध्याय षोडशश्लोके तद्भाष्ये च- जिज्ञासुशब्देन प्रक्रांतो ऽष्टमाध्याय द्वाविंशश्लोक तद्भाष्यपर्यन्तग्रन्थेन स्वानुगुण स्वरूप फलोपासनादिभि र्निरूप्यमाणः प्रस्तुतोयः कैवल्यनिष्ठः- स एव- तदुपरितन श्लोकावतारिकाभाष्ये- अथात्मयाथात्म्यविदः परमपुरुषनिष्ठस्य च साधारणीमर्चिरादिकां गतिमाहेत्यादिरूपे- आत्मयाथात्म्य विच्छब्देना प्युच्यतइत्यभिहितं, न्यायसिद्धांजनंतु- यस्त्वयं- आत्मयाथात्म्यविदः परमपुरुष निष्ठस्य च साधारणीमर्चिरादिकां गतिमाहेत्यादिग्रन्थः- सतुप्रस्तुतत्वमात्रेण कैवल्य निष्ठ परमपुरुष निष्ठविषय इतिनमन्तव्यं, किंतुपरमात्मात्मक स्वात्मानुसन्धातृ स्वात्मशरीरक परमात्मानुसन्धातृभेदभिन्न ब्रह्मविद्विषय एवेत्यादि ग्रन्थे दर्शिताष्टमाध्याय द्वाविंशश्लोक तद्भाष्यपर्यंतग्रन्थे पूर्वप्रस्तुतः केवल प्रत्यगात्मोपासक कैवल्यनिष्ठः तस्मादन्य आत्मयाथात्म्य विद इत्युपरितनग्रन्थ निर्दिष्टः

पंचाग्निविच्छिदितो ब्रह्मविदिति निरूपितं- अतः परस्पर विरुद्धोऽदसीयग्रन्थइति ॥ २८५ ॥

इदं पुनरत्रावधेयं- इदमत्र पूर्वपक्षिणः प्रष्टव्याः- केनप्रमाणेन कैवल्य पुरुषार्थस्या नित्यत्वं भवन्तोवर्णयंताति ॥ १ ॥ नतावत्प्राप्य विनाशात्तत्साधयितुं शक्यं ॥ २ ॥ नहि तदर्थिनः कर्मसाध्यं न श्वरमाचिद्वस्तु तन्मिश्रं वा प्राप्यं ॥ ३ ॥ येन पुनरावृत्ति स्सम्भाव्येत ॥४॥ अपितु प्रकृतिवियुक्तं स्वस्वरूपावस्थितं प्रत्यगात्मवस्तु ॥ ५ ॥ तच्च न क्षरणशीलं ॥ ६ ॥ क्षरस्सर्वाणि भूतानि कूटस्थोऽक्षरउच्यतइति हि मुक्तस्वरूपं गीतं ॥ ७ ॥ कैवल्यार्थिनः प्राप्यंच- कूटस्थाक्षरादि शब्दवाच्यं प्रकृति वियुक्तं स्वरूपेणावस्थितं प्रत्यगात्म वस्त्विति च गीता तद्भाष्यादिषु च समन्ततोभिहितं ॥ ८ ॥ नापि प्राप्यस्थानविनाशा दनित्यत्वं साधयितुंशक्यं- योगिनाममृतं स्थानं स्वात्म सन्तोषकारिणामिति प्रागुदाहृत विष्णु पुराणवचने कैवल्यार्थि प्राप्यस्थानस्या मृतशब्देन नित्यनाशा एवावगमा त्तन्नित्यताया स्सप्रपंच मुत्तरत्रस्थापयिष्यमाणत्वाच्च ॥ ९ ॥ नापिच- सर्वं च्यवनधर्माण इति मोक्षधर्मवचन प्रामाण्या त्कैवल्य पुरुषार्थस्या नित्यत्वं सुवचम् - दर्शितवचनघटितप्रकरणस्य - गीता सप्तमाध्याये तेषां ज्ञानी नित्ययुक्त इत्यादिसप्तदशश्लोकभाष्यतात्पर्यचन्द्रिकायां तत्प्रकरणेनैककण्ठतया भवद्भि रेवोदाहृततया तच्छ्लोक भाष्ये - तेषां ज्ञानी विशिष्यते - कुतः - नित्ययुक्त एकभक्ति रिति च - तस्य हि मदेकप्राप्यस्य मयायोगो नित्यः - इतरयोस्तु यावत्स्वाभिलषितप्राप्तिमयायोग इति ग्रन्थेन ज्ञानीतरयो रधिकारिणो र्यावत्स्वाभिलषितप्राप्त्येव वर्तमानतया प्रतिपादितस्य सेव्यसेवकभाव लक्षणस्य भगवता सह योगस्य स्वाभिलषितप्राप्त्यनन्तरं निवृत्तेरेव प्रतिपन्नतया तदेककण्ठस्य दर्शितमोक्षधर्मवचनस्यापि सेव्य सेवकभावलक्षण भगवद्योगनिवृत्तिरूप च्यवनधर्मत्वपरताया एव सिद्धया तादृशवचनेन कैवल्यपुरुषार्थनिवृत्ते रसिद्धेः ॥ १० ॥ स्थलान्तरे ऽष्टमाध्यायत्रयोविंशादिश्लोकभाष्यतात्पर्यचन्द्रिकायां पंचाग्निविद्रूपस्य कैवल्यनिष्ठस्य भगवत्प्राप्त्यर्थं तत ऊर्ध्वगमनवशा त्कैवल्य निवृत्त्या च्यवनधर्मत्वोपपादनमपि प्रागेव प्रत्युक्तं - प्रकृतिवियुक्त प्रत्यगात्मस्वरूपावाप्तिलक्षणकैवल्यपुरुषार्थस्य पश्चा द्विच्छेदासम्भवस्योपपादितत्वात, भगवत्प्राप्त्यर्थोर्ध्वगमनस्य प्रत्युत श्लाघाहेतुत्वेपि

निन्दाहेतुत्वासम्भवेन दर्शितवचनस्य तादृशोर्ध्वगमनपर्यवसन्न च्यव नार्थकत्वासम्भवस्यापि दर्शितत्वा च्च ॥ ११ ॥ किंच - यथोक्त रीत्या तादृशच्यवनधर्मत्वस्य निन्दाहेतुत्वासम्भव मभिप्रेत्यैव तत्कल्पं विहाय तदुपरि - उदासनदशानुभूते परमात्मनि फलदशायां किंचि त्काल मनुभवविच्छेदा द्वा प्राप्तभ्रंशलक्षणं च्यवनधर्मत्वमिति चरमं कल्पान्तर मभिदधानै र्भवद्भि रेव भगवदनुभवविशेषनिवृत्तिरूपमेव च्यव नधर्मत्वं युक्तं - नान्यादृशमिति दर्शितम् ॥ १२ ॥ ईदृशच्यवनधर्म त्वस्यैव दर्शितवचनार्थत्वाभिप्रायेणैव च भवद्भिः - सप्तमाध्यायसप्तदश श्लोकभाष्यतात्पर्यचन्द्रिकायां - आर्तस्यार्थार्थिन श्चैकाधिकारित्वनिर्ण या दितरयो रिति द्विवचनं · एतेनात्मार्थार्थिनोः फलदशायां पर मात्मनो भोग्यतया ऽनुसन्धानं नास्तीति सिद्ध मित्युक्तं भवद्भि रेव ॥ १३ ॥ तस्मा दुक्तमोक्षधर्मवचनस्य भवद्भि रेवान्यादृशार्थक ताया अन्ततो भवद्भिरेवोक्ततया नैतेन वचनेन कैवल्यस्या नित्यता सिद्धिः ॥ १४ ॥ तत्साधकं प्रमाणान्तरं च न किंचिद्दर्शितं भवद्भिः॥१५॥ द्राविडवेदतद्भाष्यादिष्वपि पूर्वाचार्यैः कैवल्यस्य नित्यत्वमेव प्रति पाद्यत इत्यपि च प्रागेवोपपादितम् ॥ १६ ॥ एवं स्थिते - सर्वे च्यवनधर्माण इति मोक्षधर्मवचनं प्रमाणीकृत्य समन्ततो रहस्यत्रय सारस्तोत्रभाष्यादिषु कैवल्यपुरुषार्थानित्यत्वोद्घोषो भवता मविवेचित रमणीयाकाण्डताण्डवमात्ररूप एवेति सिद्धम् ॥ १७ ॥ किं बहुना - युष्मत्तः प्राचीनेषु केनाप्यनभिहितं भवदुपज्ञमिदं कैवल्यपुरुषार्थानि- त्यत्वं ग्रन्थान्तरेषु तत्र तत्र निरूप्य पुन स्तस्मि न्नर्थे सकलप्रमाण पूर्वाचार्यसम्प्रदायविरोधं पर्यालोचयद्भि भवद्भिरेवन्यायसिद्धांजने भं ग्यन्तरेण तन्नित्यत्वं प्रतिपादयद्भि र्ग्रन्थान्तरस्थस्वोक्ततदनित्यत्ववा दासामंजस्यं स्वयमेवांगीकृत मिति नातीवास्माक मत्र कथनीयमस्ती त्युपरम्यत इति ।

इति शारीरकमीमांसामहार्णवान्तःपातिनि श्रीशैलानन्तपुरुष
श्रीरंगाचार्य विरचित कार्याधिकरणवाद कल्लोळे
कैवल्यपुरुषार्थनित्यत्व विषयप्रथमविप्रतिपत्ति
विचारनामा तृतीयस्तरंगः ॥